This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री॥गणेशाय नमः॥ ज्योतिर्मात्रस्वरूपाय निर्मलज्ञानरूपिणे॥ नमः शिवाय
शान्ताय समस्तगुणवस्तये॥१॥ ऋषय ऊचुः॥ आख्यातं भवता सूत विश्वेशमाहात्म्य
मुत्तमं॥ समस्ताघहरं पुण्यं समासेन श्रुतं च नः॥२॥ इदानीं श्रोतुमिच्छामो माहात्म्यं
त्रिपुरौघैद्विपुरद्विषः॥ तद्भक्तानां च माहात्म्यमशेषाघहरं परं॥ तन्मंत्राणां तथा
नानां तत्सज्जापाध्यसत्तम॥ तत्कथायाश्च तद्भक्तेः प्रभावमनुवर्णय॥ सूत उवा
च॥ एतनाच देवमर्त्यानां परं श्रेयः सनातनं॥ यदीश्वरकथायां वो जाता भक्तिर
हेतुकी॥ अतस्तद्भक्तिलेशस्य माहात्म्यं वर्ण्यते मया॥ आयुःकल्पायुतैर्नालं वक्तुं
विस्तरतः क्वचित्॥ सर्वेषामपि पुण्यानां सर्वेषां श्रेयसामपि॥ सर्वेषामपि यज्ञा
नां जपयज्ञः परः स्मृतः॥ तत्रादौ जपयज्ञस्य फलं स्वस्त्ययनं महत्॥ शैवं षडक्षरं २

दिव्यं मंत्रमाकुमर्षयः॥ देवानां परमो देवो यथा वै त्रिपुरांतकः॥ मंत्राणां परमो मंत्रस्त
था शैवः षडक्षरः॥ एषः पंचाक्षरो मंत्रः केवलो मुक्तिदायकः॥ संसेव्यते मुनिश्रेष्ठै
रशेषैर्मुक्तिकांक्षिभिः॥ अस्यैवाक्षरमाहात्म्यं नालं वक्तुं चतुर्मुखः॥ श्रुतयो यत्र
सिद्धांतं गताः परमनिर्वृताः॥ सर्वज्ञः परिपूर्णश्च सच्चिदानंदलक्षणः॥ स शिवो
यत्र रमते शैवे पंचाक्षरे शुभे॥ तेन मंत्रराजेन सर्वोपनिषदात्मना॥ लेभिरे मुनयः
सर्वे परं ब्रह्म निरामयं॥ नमस्कारेण जीवत्वं शिवेति परमात्मनि॥ ऐक्यं गतमतो मं
त्रः परं ब्रह्ममयो ह्यसौ॥ भवपाशनिबद्धानां देहिनां हितकाम्यया॥ आहो नमः शिवा
येति मंत्रमाद्यं शिवः स्वयं॥ किं तस्य बहुभिर्मंत्रैः किं तीर्थैः किं तपोध्वरैः॥ यस्यो नमः
शिवायेति मंत्रो हृदयगोचरः॥ तावद्भ्रमति संसारे दारुणे दुःखसंकुले॥ यावन्नोच्चा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयंतीमंमंत्रंदेहभृत्सुतंसत्कृतं ॥ मंत्राधिराजराजोयंसर्ववेदांतशेखरः ॥ सर्वज्ञाननि
धानंचसोयंशैवःषडक्षरः ॥ कैवल्यमार्गदीपोयमविद्यासिंधुवाडवः ॥ महापातक
दावाग्निःसोयंमंत्रःषडक्षरः ॥ स्त्रीभिःशूद्रैश्चसंकीर्णैर्धार्यतेमुक्तिकांक्षिभिः ॥ नास्य
दीक्षानहोमश्चनसंस्कारोनतर्पणं ॥ नकालोनोपदेशश्चसदाशुचिरयंमनुः ॥ महा
पातकविच्छित्त्यैशिवइत्यक्षरद्वयं ॥ अलंनमस्क्रियायुक्तोमुक्तयेपरिकल्पते ॥ उपदि
ष्टःसद्गुरुणाभक्तःक्षेत्रेचपावने ॥ सद्योयथेष्टलाभायसिद्धिंददातीतिकिमद्भुतं ॥
अतःसद्गुरुमाश्रित्यग्राह्योयंमंत्रनायकः ॥ पुण्यक्षेत्रेषुजप्तव्यःसद्यःसिद्धिप्रयच्छ
ति ॥ गुरवोनिर्मलाःशांताःसाधवोमितभाषिणः ॥ कामक्रोधविनिर्मुक्ताःसदाचारा
२ जितेंद्रियाः ॥ एतैःकारुण्यतोदत्तोमंत्रःक्षिप्रंप्रसिध्यति ॥ क्षेत्राणिजपयोग्यानिस २

मासात्कथयाम्यहं ॥ प्रयागःपुष्करंरम्यंकेदारंसेतुबंधनं ॥ गोकर्णंनैमिषारण्यंसद्यः
सिद्धिकरंनृणां ॥ अत्रानुवर्ण्यतेसद्भिरितिहासःपुरातनः ॥ असकृच्छृण्वतांसम्यक्पापिष्ठ
ण्यनांमंगलप्रदः ॥ मथुरायांयदुश्रेष्ठोदाशार्हइतिविश्रुतः ॥ बभूवराजामतिमान्
महोत्साहोमहाबलः ॥ शास्त्रज्ञोनयविद्धीरोधैर्यवानमितद्युतिः ॥ अप्रधृष्यःसुगंभीरः
संग्रामेष्वनिवर्तनः ॥ महारथोमहेष्वासोनानाशास्त्रार्थकोविदः ॥ वदान्योरूपसंपन्नो
युवालक्षणसंयुतः ॥ सकाशीराजतनयामुपयेमेवराननां ॥ तांतुकलावतींनामरू
पशीलगुणैर्युतां ॥ कृतोद्वाहःसराजेंद्रःसंप्राप्यनिजमंदिरं ॥ रात्रौतांशयनारूढांसंग
मायसमाह्वयत् ॥ सास्वभर्त्रासमाहूताबहुशःप्रार्थितासती ॥ नववंधेमनस्तस्मिन्न
वागच्छदंतिकं ॥ संगमायसमाहूतानागतानिजवल्लभा ॥ बलाद्दाशार्हस्तुकामस्तामुप

तिष्ठ महीपतिः॥ भामास्य श्रीमहाराज कारणं कांप्रतेस्थिता॥ धर्मार्थधर्मौ विनासिंजो
मा कार्षीः साहसं मयि॥ कचित्रियेण मे कुंयजो च तेनु मनीषिणां॥ दंपत्योः प्रीतियो
गेन संगमः प्रीतिवर्द्धनः॥ प्रिययदामे जीयेतन दासं गोत्स्खलेमयि॥ कामीतिः किंकु
र्वंतु सोवला द्रोगेन योषितां॥ अप्रीतां रोगिणी नारी मंतर्वत्नी ध्वतव्रतां॥ रजस्वला
मस्नातां चना कामेत वलात्सुमान्॥ प्रीणनं लालनं पोषां रंजनं मादवं दया॥ उवतौ कु
सुमे चैव विधेयं सुखमिच्छता॥ इत्युक्तोपि तया साध्व्या सराजा स्मरविह्वलः॥ वस्त्रां
ताकृष्य तां हस्तेपरि रेभे रिरंसया॥ तां स्पृष्टमात्रां सहसातन्ताप पिंडसंन्निभां॥
निर्दहंती मिवालानेत साजभयविह्वलः॥ राजोवाच॥ अहो सुमहदाश्चर्यं मिदं दृ
२ ष्टं तव प्रिये॥ कथमग्निसमं जातं वपुः पल्लवकोमलं॥ इत्थं सुविस्मितं भीतं राजानं २

राजवल्लभां॥ प्रत्युवाच विहस्येनं विनयेन सुविस्मिता॥ राज्ञीउवाच॥ राजन् मम पुरा बा
ल्येदुर्वासास्तु मुनिपुंगवः॥ शैवीं पंचाक्षरीं विद्यां कारुण्येनोपदिष्टवान्॥ तेन मंत्रानुभावे
न मम्मांगं कलुषोज्झितं॥ स्प्रष्टुं न शक्यते पुंभिः पापकैर्मंत्रवर्जितैः॥ त्वया राजन् प्रकृ
तिना कुलटा गणिकादयः॥ मदिरास्वादनिरता निषेव्यं ते स्त्रियः सदा॥ न स्नानं क्रि
यते नित्यं न मंत्रो जप्यते त्वया॥ नाराध्यते त्वयेशानः कथं मां स्प्रष्टुमर्हसि॥ राजोवा
च॥ तां समाख्याहि सुश्रोणी शैवीं पंचाक्षरीं शुभां॥ विद्यां विध्वस्तपापोहं त्वयाद्य
मिरतिं प्रिये॥ राज्ञीउवाच॥ नाहं तवोपदेशं हि कुर्यां मम गुरुर्भवान्॥ उपतिष्ठतु
राजन् गर्गमं शैविदांवरं॥ सूत उवाच॥ इति संभाषमाणौ तौ दंपती गर्गसंनिधिं॥
प्राप्य तच्चरणौ मूर्ध्ना ववंदाते कृतांजली॥ अथ राजा गुरुं प्रीतं मभिपूज्य पुनः पुनः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ समाप्य च विनीतात्मा रहस्यात्मनोरथं ॥ राजोवाच ॥ कृतार्थं मां गुरो कुरु गुरो संतापं क- ४
रुणार्द्रधीः ॥ शैवीं पंचाक्षरीं विद्यां मुपदेष्टुं त्वमर्हसि ॥ अनाश्रितं यत[illegible]दाश्रालयं हृत-
तेराजकर्मणा ॥ तस्मात् पंचयेनस्तुष्येन तं मंत्रं देहि मे गुरो ॥ एवमभ्यर्थितो राजा आगर्गो ब्राह्म-
णपुंगवः ॥ तौ चिनाय महापुण्यं कालिंदीतटमुत्तमं ॥ तत्र पुण्यतरोर्मूले निषण्णो य-
मुनिः स्वयं ॥ पुण्यतीर्थाप्लुतं दांतं राजानं सत्तुपोषितं ॥ प्राङ्मुखं चोपविश्याथ न-
त्वा शिवपदांबुजं ॥ तन्मस्तके करं न्यस्य ददौ मंत्रं शिवात्मकं ॥ तन्मंत्रधारणाद्दे-
व गुरोर्हस्तसंगमात् ॥ निर्ययुस्तस्य वपुषो वायसाः शतकोटयः ॥ ते दग्धपक्षाः क्रो-
शंतो निपतंतो महीतले ॥ भस्मीभूतास्ततः सर्वे दृश्यंते स्म सहस्रशः ॥ दृष्ट्वा तद्वायस-
कुलं दह्यमानं सुविस्मितो ॥ राजा च राजमहिषी तं गुरुं पर्यपृच्छतां ॥ भगवन्निदमा-

श्चर्यं कथं जातं शरीरतः ॥ वायसानां कुलं कष्टं किमेतत्साधु भण्यतां ॥ गर्ग उवाच ॥
राजन्नायसहस्रेषु भवतां परिधावतां ॥ संचितानि दुरंतानि संति पापान्यनेकशः ॥
तेषु जन्मसहस्रेषु यानि पुण्यानि संति ते ॥ तेषां माधिक्यतः क्वापि जायते पुण्ययोनि-
षु ॥ तथा पापीयसीं योनीं कस्मिंश्चिदपि न गच्छति ॥ साम्ये जन्मभयश्चैव मानुषीं ची यो-
निमाप्तवान् ॥ शैवी पंचाक्षरी विद्या यदा नेह दर्पं गता ॥ अघानां कोटयस्तत्तः काक-
रूपेण निर्गताः ॥ कोटयो ब्रह्महत्यानामगम्यागमकोटयः ॥ स्वर्णस्तेयसुरापानभ्रूण-
हत्यादिकोटयः ॥ भवकोटिसहस्रेषु येन्ये पातकराशयः ॥ क्षणाद्भस्मीभवंत्येव शैवे
पंचाक्षरे धृते ॥ असंख्या वाघराजेंद्र दग्धाः पातककोटयः ॥ अनयामहत्तालाविहर
स्व यथासुखं ॥ इत्याभाष्य तु निःश्रेष्ठं तन्मंत्रमुपदिश्य च ॥ ताभ्यां विस्मितचित्ताभ्यां सहि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ नःस्वगृहं ययौ ॥ गुरुः स्वयमनुज्ञाप्य मुदितो गौरवदंपती ॥ तत्स्य भवनं प्राप्य देजतुस्वम
हाद्युती ॥ राजा हृदं समाश्लिष्य पत्नीं चंदनशीतलां ॥ संतोषं परमं लेभे निःस्वः प्राप्य यथा
निधिं ॥ अशेषवेदोपनिषत्पुराणशास्त्रावतंसो यमघातकारी ॥ पंचाक्षरस्यैव महाप्र
भावो मयास्मासात्कथितो वरिष्ठः ॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे पंचाक्षरी
महिमानुवर्णनं नाम प्रथमोध्यायः ॥ ॥ सूत उवाच ॥ अथान्यदपि वक्ष्यामि महात्म्यं त्रि
पुरद्विषः ॥ श्रवणमात्रेण येनाभ्युदितं ये न सर्वसंशयः ॥ अतः परतरं नास्ति किंचित्सा
पविशोधनं ॥ सर्वानंदकरं श्रीमत्सर्वकामार्थसाधनं ॥ दीर्घायुर्विजयारोग्यभुक्तिमुक्ति
फलप्रदं ॥ यदनन्येन भावेन महर्षेराधनं परं ॥ आर्द्रा नाम पिशुन्काणां मत्यानां मह
५ नामपि ॥ एतदेव विनिर्दिष्टं सर्वाघानां विशोधनं ॥ महामुनिर्विनिर्दिष्टैः प्रायश्चित्तै ५

रयोनमैः ॥ सर्वकालेष्वभेद्यानामघानां क्षयकारणं ॥ इदमेव परं श्रेयः सर्वेशास्त्र
विनिश्चितं ॥ यदनन्यापरमेशस्य पूजनं परमोदयं ॥ जानता जानता वापि येनके
नापि हेतुना ॥ यत्किंचिदपि देवाय दत्तं कर्म विमुक्तिदं ॥ माघकृष्णचतुर्दश्यां मु
पवासोतिदुर्लभः ॥ तत्रापि दुर्लभं मन्ये रात्रौ जागरणं नृणां ॥ अतीवदुर्लभं मन्ये
शिवलिंगस्य दर्शनं ॥ सुदुर्लभतरं तत्र पूजनं परमेशितुः ॥ भवकोटिशतोत्पन्न
पुण्यराशिविपाकतः ॥ लभ्यते वा पुनस्तत्र बिल्वपत्राणि चेन्नृविभोः ॥ वर्षाणामयु
तं येन स्नातं गंगामसरिज्जले ॥ सकृद्बिल्वार्चनेनैव तत्फलं लभते नरः ॥ यानि यानि
तुपुण्यानि दिनानीह युगे युगे ॥ माघासितचतुर्दश्यां नानि तिष्ठंति हस्तरः ॥ एतामे
वप्रशंसंति लोके ब्रह्मादयः सुराः ॥ मुनयश्च वशिष्ठाद्या माघे सितचतुर्दशीं ॥ अत्रै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पवासः केनापि कृतः कृतं शतायने॥ रात्रौ जागरणं पुण्यं कल्पकोटिशताधिकं॥ त
र केन बिल्वपत्रेण शिवलिंगार्चनं कृतं॥ त्रैलोक्ये तस्य पुण्यस्य को वा साहश्यमिच्छति॥
अत्रानुवर्ण्यते पुण्या गाथा परमशोभना॥ गोपनीयापि कारुण्यात्प्रेमेन प्रकाशि
ता॥ इक्ष्वाकुवंशजः श्रीमान्राजा परमधार्मिकः॥ आसीन्मित्रसहो नाम श्रेष्ठः सर्व
धनुर्भृतां॥ स राजा सकलास्त्रज्ञः श्रुतिपारगः॥ वीरोनंतबलोत्साहो नित्योद्योग
दयानिधिः॥ पुण्यानामिव संघातस्तेजसामिव पंजरः॥ आश्चर्याणामिव क्षेत्रं पस्य
मूर्त्तिर्विराजते॥ हृदपद्मालंश्रियाकांतं च पदे पदे॥ यस्य पौरुष्यसामंतचू
डामणिमरीचिभिः॥ एकदा मृगयाकेलिलोलुपः स महीपतिः॥ विवेश गहनं घोरं
बलेन महतावृतः॥ तत्र विद्याधविक्रीडैः शार्दूलान्गवयान्मृगान्॥ रुरून्वरा

हान्महिषान्मृगेंद्रानपि भैरवान्॥ स रथी मृगयासक्तो गहने दावितश्चरन्॥
कमपि ज्वलनाकारं निजघान निशाचरं॥ तस्यानुजः सुदुर्बुद्धिर्दृष्ट्वा दूरे तिरो
हितः॥ भ्रातरं निहतं दृष्ट्वा चिंतयामास चेतसा॥ अहो खल्वेष दुर्द्धर्षो देवानामसुरा
मपि॥ छद्मनैव प्रजेतव्यो ममस्यान्नान्यथा॥ इति व्यवसितः पापो राक्षसो मा
नुषाकृतिः॥ आससाद नृपश्रेष्ठं सुसातइवमन्निमान्॥ तं विनम्राकृतिं दृष्ट्वा स्व
सतां कर्तुमागतं॥ चक्रे महानसाध्यक्षं मनसा तत्स महीपतिः॥ अथ तस्मिन्वने रा
जा कंचित्कालं विहृत्य सः॥ निवृत्तो मृगयां हित्वा स्वपुरीं पुनराययौ॥ तस्य राजेंद्र
स्य मदयंतीति नामतः॥ दमयंती नलस्येव बभूव दयिता सती॥ ततः कस्मिंश्च स
मये राजा निमंत्र्य मुनिपुंगवं॥ वसिष्ठं गृहमानिन्ये संप्राप्ते पितृवासरे॥ रक्षसा
सूदरूपेण संमिश्रितनराभिषं॥ शाकामिषं पुरःक्षिप्तं दृष्ट्वा गुरुरथाब्रवीत्॥ धिग्धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिनु रामिषं राजंस्तथैवेन त्वत्प्रकारिणा॥ खलेनोपहतं मेघजलोरसो भविष्यंसि
र सः स्तनम विज्ञाय शास्त्वैवं स गुरुस्ततः॥ पुनर्विमृश्य ते शापं चकार बाद्दशाब्दि
कं॥ राजापि कोपितः प्राह यदिदं मेन चेष्टितं॥ न ज्ञातं च यथा शप्तो गुरुश्चैव शाप
म्यहं॥ इत्यपोंजलिमादाय गुरुं शप्तुं समुद्यतं॥ पतिस्तां पादयोर्नम्य मदयंती न्य
वारयत्॥ न तो निवृत्तः शापात्तु तस्या वचन गौरवात्॥ तत्साजपादयो रंभः पादौ
कल्मषतां गतौ॥ कल्माषांघ्रिरितिख्यातस्ततः प्रभृति पार्थिवः॥ वभ्रव गुरुशापे
न राक्षसो वनगोचरः॥ स बिभ्रद्राक्षसं रूपं कालांतकयमोपमं॥ चखाद विविधा
न्जंतून्मानुषादीन्वनेचरः॥ स कदाचिद्वने क्वापि रममाणौ किशोरकौ॥ अपश्य
७ द् नकाकारी नवोढौ मुनिदंपती॥ राक्षसो मानुषाहारः किशोरं मुनिनंदनं॥ जग्धुं ७

जग्राह शापार्तो व्याघ्रो मृगशिशुं यथा॥ कृसो गृहीतं भर्तारं दृष्ट्वा भीता च तत्प्रिया॥
उवाच करुणं बाला क्रंदंतीऽस्य राघवे पिता॥ भो भो मा मा कृथाः पापं सूर्यवंशयशोधर॥
मदयंतीपतिस्त्वं हि राजेंद्रो न तु राक्षसः॥ न स्वाद मम भर्तारं प्राणप्रियतरं प्रभो॥ अ
नाथानां शरणं त्वं नीनां त्वमेव हि यतीनां गतिः॥ पापाभामिवृत्तं सघातैः किं मे दुष्टे जडा तु भि॥
देहे चैन चातिभारेण विना भर्त्रा महात्मना॥ बालोऽयं वेदविच्छांतस्तपस्वी वकुशास्त्रवि
त्॥ जीवितोस्य प्राणदानेन जगद्रक्षा तवाकृता॥ कृपां कुरु महाराज बालायां ब्राह्मणस्त्रि
यां॥ अनाथकृपणार्तेषु नृत्ते सद्गुणाः खलु साधवः॥ इत्थमभ्यर्थ्यमानोऽपि गुरुशापोदः स
निर्घृणः॥ चखाद विप्रं दुष्टः सविप्रं तु ऽड राक्षसः॥ अथ साध्वी कृशा दीना विल
प्य भृशदुःखिता॥ आह संभर्तुरस्थीनि चितां चक्रे यथोत्त्वणं॥ भर्तारमनुगच्छं
ती संविशंती हुताशनं॥ राजानं राक्षसाकारं शापास्त्रेण जघान तं॥ रे रे पार्थिवपापो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्थायामेपस्थितपतिः॥ अतः पातिव्रतायास्ते शापं तु दत्त्वा विषोल्बणं॥ अद्यप्रभृति
नारीषु यदायमपि संगतः॥ न दाष्टलिस्तथेत्युक्ता विवेश ज्वलनं सती॥ सोपि राजा कु
रोः शापमनुभूय तत्कृतावधिं॥ पुनः स्वरूपमास्थाय स्वगृहं मुदितो ययौ॥ शालाविस्र
सतीशापं मदयंती राजनुप्रियं॥ पतिं निवारयामास वैधव्यादतिबिभ्यती॥ अनप
त्यः सन्निर्विण्णो राज्यभोगेषु पार्थिवः॥ विसृज्य सकलां लक्ष्मीं ययौ भूयो विकाननं॥
स्थर्यं वैराग्यतिक्षिसेवासिष्ठोनुनिस्सृतमः॥ तस्यात्सुतादयामास मदयंत्यां सुतोत्तमं॥
विसृष्टराज्यो राजापि विचचार सकलां महीं॥ ओयांती पृष्ठतो पश्यत्पिशाची घो
ररूपिणी॥ सा हि सृत्तमनी घोरा ब्रह्महत्या दुरत्यया॥ यदा सौराजाप विवशो मुनिपु
त्रमभक्षयत्॥ तेनात्मकर्मणायांती ब्रह्महत्यास्य पृष्ठतः॥ कुद्धेषु निर्वाणां मु
पदेशेन भूपतिः॥ तस्यां निर्वेदमन्विष्यन्नृराजा निर्विण्णमानसः॥ नानादेशानि तीर्था

नि चचार बहून्वत्सरान्॥ यदा तीर्थेषु सर्वेषु स्नात्वापि च मुहुर्मुहुः॥ न निवृत्ता ब्रह्महत्या
मिथिलायां ययौ तदा॥ बाह्योद्यानगतस्तस्यां श्रुत्वयापरयार्दितः॥ ददर्श तत्र नि
र्मायं गौतमं विमलाशयं॥ कृताशनमिवाशेषं तपस्विजनसेवितं॥ विवस्वंत
मिवासं तच नदोषतमोनुदं॥ शशांकमिव निःशंकमवदातगुणोदयं॥ महेश्वर
मिव श्रीमद्दिजराजकलाधरं॥ शांतं शिष्यगणोपेतं तपसामेकभाजनं॥ उप
स्त्य स राजेंद्रः प्रणनाम मुहुर्मुहुः॥ गौतमोपि स निश्रेष्ठो राजानं रविवंशजं॥
अभिवंद्य महनिःश्वासमसि तं समभाषत॥ गौतम उवाच॥ कच्चित्ते कुशलं राजन्
कच्चिदव्याहतं पदं॥ कुशलिन्यः प्रजाः कच्चिद्विरोधजनोपि वा॥ किमर्थमिह सं
प्राप्तो विसृज्य सकलां श्रियं॥ किं च ध्यायसि भो राजन्दीर्घमुष्णं च निःश्वसन्॥
राजोवाच॥ सर्वे कुशलिनो ब्रह्मन्नूवयं त्वदनुकंपया॥ राज्ञामनुत्तमं वंशं नाम ब्रह्म

यत्ता हि सेपदः ॥ किंतु मां बाधते ह्येषा पिशाची घोररूपिणी ॥ अलक्ष्मीनाम यद्दपरे भो
स्मैयं तापदे पदे ॥ यन्मया भ्रापदृश्येन कृतं महोदुरत्ययं ॥ नशांतिं ओयते तस्य पा
यश्चित्त सहस्रकैः ॥ इष्टाश्च विविधा यज्ञाः कोशा सर्वे दक्षिणाः ॥ सरित्सरांसिस्ना
नानि यानि रम्याणि भूतले ॥ निषेवितानि सर्वाणि क्षेत्राणि श्रमनामया ॥ जप्यान्य
खिलमंत्राणि ध्याताः सकलदेवताः ॥ मया व्रतानि चीर्णानि पर्णमूलफलाशिना ॥
तानि सर्वाणि कुर्वंति स्वस्थं मां न कदाचन ॥ अद्य मे जन्मसाफल्यं संप्राप्तमिव लक्ष्यते ॥
यस्य संदर्शनाद्देव ममानंदभागभूत् ॥ अन्विच्छन्लभते कापि वर्षेप्रगेमेनोरथं ॥
इत्थं जनन्वा दोषि संप्राप्तोम पिसत्तमं ॥ ओजन्मसंचितानां तु पुण्यानामुदयो ह्ययं ॥
भीतो मैयद्भवान्भवभातानां आलोनयनगोचरः ॥ कस्माद्दुःखादिहायातो भवान्
भवभयापहः ॥ दूरभ्रमणविश्रांतं शोकेनामिह चागतं ॥ इच्छाम्यथं मिवासर्थं तु दि ९

तोसिमुखश्रिया ॥ आनंदयसि मे चेतः प्रेम्णा संभाषणादिना ॥ अथ मेलयपात्पुरार
णस्य पृच्छतेनसः ॥ शांतिं कुरु महाभाग येनाहं सुखमाप्नुयां ॥ इति तेन समादिष्टो गौत
मः करुणानिधिः ॥ समादिदेश घोराणामघानां साधुनिष्कृतिं ॥ गौतम उवाच ॥ सा
धु राजेंद्र धन्योसि महाघेभ्यो भयं त्यज ॥ शिवे शालरिभक्तानां क भयं शरणैषिणां ॥
शृणु राजन्महाभाग क्षेत्रमन्यत्सतिष्ठितं ॥ महापानकसंहारि गोकर्णाख्यं मनोरमं ॥
यत्र स्थितिर्नपापानां महतामपि ॥ स्वतोयाशेषपापघ्नो यत्र संनिहितः शि
वः ॥ यथा कैलासशिखरे यथा मंदरमूर्धनि ॥ निवासो निश्चितः शंभोस्तथा गोकर्ण
मंडले ॥ नाग्निना न प्रकाशांके न न तारागृहनायकैः ॥ तमो विशीर्यते सम्यग्यथास्य वि
त्वदर्शनात् ॥ तथैव नेनरेस्तीर्थैः नैव सेवैमनोरमैः ॥ अघः पापविशुद्धिः स्याद्य
था गोकर्णदर्शनात् ॥ अपि पापशतं कृत्वा ब्रह्महत्यादिमानवः ॥ सकृत्स्नात्वा विरवगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णे न विभेनेति यमात्क्वचित्॥ तत्र पूर्वं महात्मानस्तपसा सिद्धिमागताः॥ इंद्रोपे
नेर न्द्र[illegible] धैर्यैः सिद्धिकांक्षिभिः॥ तत्रैकेन दिनेनापि यत्कृतं व्रतमुत्तमं॥ त
दन्यत्राब्दलक्षेण तपस्तदतिसंभृतं॥ यत्रेंद्रब्रह्मविष्ण्वादिदेवानां हितकाम्यया॥
महाबलाभिधानेन देवः संनिहितः स्वयं॥ घोरेण तपसा लब्धं रावणाख्येन राक्षसा॥
तल्लिंगं स्थापयामास गोकर्णे गणनायकः॥ इंद्रो ब्रह्मा मुकुंदश्च विश्वेदेवा मरुद्
गणाः॥ आदित्या वसवो रुद्राः शशांकश्च सतारकः॥ एते विमानगतयो देवास्ते सहपा
र्षदैः॥ पूर्वद्वारि निषेवंते तस्येश्वप्रातिकारणात्॥ योन्योन्यं तु स्वयं साक्षाच्चित्रगु
प्तश्च पावकः॥ पितृभिः सह रुद्रैश्च दक्षिणद्वारमाश्रिताः॥ वरुणः सरितां नाथो गंगा
दिसरितां गणैः॥ आसेवने महादेवं पश्चिमद्वारमाश्रितः॥ तथा वायुः कुबेरश्च देवे
१० रीभद्रकर्णिका॥ मातृभिश्चंडिका घाभिरुत्तरद्वारमाश्रितं॥ विश्वावसुश्चित्रर १०

रथश्चित्रसेनो महाबलः॥ सहगंधर्ववर्गैश्च पूजयंति महाबलं॥ रंभा घृताची मेना च
पूर्वचित्तिस्तिलोत्तमा॥ उर्वशी पुरतः शंभोर्नृत्यंत्याद्याः सुरस्त्रियः॥ वसिष्ठः कश्यपः क
ण्वो विश्वामित्रो महातपाः॥ जैमिनिश्च भरद्वाजो जाबालिः क्रतुरंगिराः॥ एते च पंच रा
जेंद्र सर्वे ब्रह्मर्षयो मताः॥ देवं महाबलं भक्त्या समंतात्समुपास्महे॥ मरीचिर्नारदोऽत्रि
श्च दक्षाद्याश्च मुनीश्वराः॥ सनकाद्या महात्मान उपरिष्टादुपासते॥ तथैव मुनयः
साध्या अजिनांबरधारिणः॥ दंडिनो व्रतिमुंडाश्च स्नातका ब्रह्मचारिणः॥ अगस्त्यश्च म
त्रावयवास्तपसा दग्धकिल्बिषाः॥ सेवंते परया भक्त्या देवदेवं पिनाकिनं॥ तथा
देवाः सगंधर्वाः पितरः सिद्धचारणाः॥ विद्याधराः किंपुरुषाः किन्नरा गुह्यकाः खगाः
नागाः पिशाचा वेताला दैत्याश्च महाबलाः॥ नानाविभवसंपन्ना नानाभरणवा
हनाः॥ विमानैः सूर्यसंकाशैरग्निवर्णैः शशिप्रभैः॥ विद्युत्पुंजनिभैरन्यैः समंतात्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिवायतं॥प्रस्तुवंति च गायंति पठंति प्रणमंति च॥प्रनृत्यंति प्रहृष्यंति गोकर्णे
पृथिवीपते॥त्वं भ्रंते भीक्षितानुकामानुरमंते च यथा सुखं॥गोकर्णसदृशं क्षे
त्रं नास्ति ब्रह्मांड गोलके॥तत्रघोरं तपस्तप्तमगस्त्येन महर्षिणा॥तथा सनत्कुमा
रेण प्रियव्रतमनुरतैरपि॥अग्निना दृढवर्मेण कुदर्पेन च पार्थिव॥तथा देव्या भ
द्रकाल्या शिशुमारेण धीमता॥दुर्मुखेन फणींद्रेण मणिनागाह्वयेन च॥इलाव
र्तादिभिर्नागैर्गरुडेन च बलीयसा॥रसातारावणेनापि कुंभकर्णेन कृयेन च॥वि
भीषणेन पुण्येन तपस्तप्तं महात्मना॥एते चान्ये च गीर्वाणाः सिद्ध दानव मानवाः॥
गोकर्णे देवदेवं शिवं सामाराध्य भक्तितः स्थानेभ्यः॥निलिंगानि स्थापयित्वा सहृ
स्रशः॥लेभिरे परमां सिद्धिं तथा तीर्थानि चक्रिरे॥असंख्यातानि सर्वेषां देवानां
११ संनिपार्थिव॥विसृत्याथ देवदेवस्य ब्रह्मणः परमेष्ठिनः॥कार्तिकेयस्य वीरस्य ११

गजवक्त्रस्य चानघ॥धर्मस्य क्षेत्रपालस्य दुर्गायाश्च महात्मने॥गोकर्णे शिवलिं
गानि विद्यंते कोटिकोटिशः॥असंख्यानि तीर्थानि तिष्ठंति च पदे पदे॥बहुनात्र
किमुक्तेन गोकर्णस्थानि पार्थिव॥सर्वाण्यस्मानि लिंगानि तीर्थान्यंभांसि सर्व
शः॥गोकर्णे शिवलिंगानां तीर्थानामपि भूरिशः॥वर्ण्यते महिमा राजन् पु
राणेषु महर्षिभिः॥गोकर्णे कोटितीर्थं च तीर्थानां मुख्यतां गतं॥सर्वेषां शिवलिं
गानां सार्वभौमो महाबलः॥कलौ महाबलः श्वेतस्वेता यामति लोहितः॥पाप
रे पीतवर्णश्च कलौ श्यामो भविष्यति॥आकोलसप्तपातालकूह सोपि महाबलः॥
प्रांते कलियुगे घोरे म्लेच्छतां तु प्रयास्यति॥पश्चिमांबुधितीरस्थं गोकर्णतीर्थ
मुत्तमं॥ब्रह्महत्यादिपापानि दहतीति किमद्भुतं॥ये चात्र ब्रह्महं नारी ये च भक्त
कुहरां॥ये सर्वे गुणहीनाश्च परदाररताश्च ये॥ये दुष्टा नाडया चाराकुली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाः कल्पणाश्रये ॥ तुष्याः कृताः स्वलाभ दास्तिनाश्चैवासि मासिनः ॥ ते सर्वे प्राप्य गोक
र्णं स्नात्वा तीर्थजलेषु च ॥ देवं महाबलं दृष्ट्वा प्रयाताः शांकरं पदं ॥ तत्र पुण्या सुतीर्थे
षु पुण्येषु पुण्यवासरे ॥ ये चैवं यति महेशानं नेकृशास्तु नरं स्तरायः ॥ यदा कदाचिद्गोकर्णे यो
वा को वापि मानवः ॥ प्रविश्य पूजयेदीशं स गच्छेद्ब्राह्मणः पदं ॥ रवीन्दुसोमवारेषु यदा
दर्शो भविष्यति ॥ तदा जलनिधौ स्नानं दानं च पितृतर्पणं ॥ शिवपूजा जपो होमो व्रत
च यो द्विजार्चनं ॥ यत्किंचित्क्रियते कर्म तदनंतफलप्रदं ॥ व्यतीपातादियोगेषु रविसं
क्रमणेषु च ॥ महाप्रदोषवेलासु शिवपूजा विमुक्तिदा ॥ अथैकां नेव स्यामितिथिंपा
र्थिवमुक्तिदं ॥ यस्यां किल महाव्याधो लेभे शंभोः परं पदं ॥ माघमासे महापुण्या या
मा कृष्णचतुर्दशी ॥ शिवलिंगमिषत्वपत्रं डुलेभं हि नलुष्टयं ॥ अहोवल्लवलीमायाप
१२ या शेवीमहाल्लेखि ॥ ते पापस्य तेज नेमृटे महामहे स्थितिः यी ॥ उपवासो जागरणं १२

संनिधिः परमेश्वरी तु ॥ गोकर्णं शिवलोकस्य च पूर्णं सोपानपद्धतिः ॥ अस्तु राजन्नहम
गोकर्णादधुनागतः ॥ उपास्येनां शिवतिथिं विलोक्य च महोत्सवं ॥ यस्यां शिवतिथौ
सर्वे महोत्सवदिदृक्षवः ॥ आगताः सर्वदेशेभ्यश्चातुर्वर्ण्या महाजनाः ॥ स्त्रियो वृद्धा
श्च बालाश्च चतुराश्रमवासिनः ॥ आगत्य दृष्ट्वा देवेशं लेभिरे कृतकृत्यतां ॥ यथा
स्य हमप्यमी शिष्याः रूपयश्च तथापरे ॥ राजर्षयः सराजेंद्रसनकाद्याः सुदुर्बधः ॥ स्नाता २
सर्वेषु तीर्थेषु समुपास्य महाबलं ॥ लब्ध्वा च जन्मसाफल्यं प्रायाताः सर्वतो दिशः ॥
अनुगां घनरंद्रेण जनकेन विधस्तुणा ॥ निमंत्रितोहं संप्राप्तो गोकर्णाच्छिवमंदिरात्
त्वलागमन्निकमपंगदृष्ट्वा ध्यायेमहंपथि ॥ महानंदेन मनसा कृतार्थोस्मि महामते ॥
॥ इति श्री स्कंदपुराणे ब्रह्मोत्तरखंडे गोकर्णमहिमानुवर्णनं नाम द्वितीयोध्यायः ॥
राजा उवाच ॥ किंदृष्टं भवेता ब्रह्मन्नाश्चर्यं पथि कुत्रवा ॥ तन्ममाख्याहि येनाहं कृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृ सत्यमाप्नुयां ॥ गौतम उवाच ॥ गोकर्णो दहमागच्छन्नापि देवो विद्यां पते ॥ जी
ले मध्याह्न समये लब्धवान् विमलं सरः ॥ तत्रोपस्पृश्य सलिलं विनीय च परिश्र
मं ॥ सुस्निग्ध शीतलच्छायं न्यग्रोधं समुपाश्रयं ॥ अथाविरूरेचं ज्ञालीद्विज मध्या
कृशाकृतिं ॥ शुष्कास्यत्तु रवी निराहारां कुष्ठरोग निपीडितां ॥ कुष्ठरोग परीतांगी
तु द्यक्षिमिकुला कुलां ॥ पूयशोणित संसक्त सरतटलसाकृतिं ॥ महाय स्वा
गलस्थेन कंटसंरोधा विकूलां ॥ विनष्टदंतामध्यक्षं विलुठंती मुहुर्मुहुः ॥ चंडाके
किरस्पृष्ट खरोत्सरजासिसुलां ॥ विणम्रत्र प्रयदिग्धांगी मस्त ॥ धेगेंरु रासदां ॥
रुरु रोग कृश्वास ऋश्वथन्नो डीवक्रव्यथां ॥ विध्यस्तकेशायय शामपत्य त्रसुरणां
सुरवीं ॥ तादृग्यथांच तां तास्य कुपयाहं परिप्लुतः ॥ प्रतीक्ष मरणं तस्याः स्थ
१२ णतचेव संस्थितः ॥ अथांतरिक्षेपदवीं सिंचितामिव रश्मिभिः ॥ दिव्यं विमान १२

मानीतमद्राक्षं शिवकिंकरैः ॥ तस्मिन्नु रवींदुवन्हीनां तेजसामिव पंजरान् ॥ विमा
नेस्थये संकारातान पश्यं शिवकिंकरान् ॥ ते चेत्रिशूल खट्वांग टंकचर्मासिपाणयः ॥
चंद्रार्धेन्हषणाः सांद्रचंद्रकुंदारुयचेसः ॥ किरीटकुंटलभ्राजन्महाहवलयोज्व
लाः ॥ शिवानुगामयादष्टाश्चत्वारः शुभलक्षणाः ॥ तानापतत आलोक्य विमानस्था
नु विस्मितः ॥ उपसृत्यांतिकं वेगाद पृच्छं गगने स्थितान् ॥ नमोनमो वस्त्रिदशो
त्तमेभ्यास्त्रिलोचन श्रीचरणानुगेभ्यः ॥ त्रिलोक रक्षाविधिमावहद्भ्यस्त्रिशू
लं च मोसिग दाधरेभ्यः ॥ विदितादि मया यूयं महेश्चरपरानुगाः ॥ इयं आलो
रक्षार्थं गतिवीवीयिनोदजा ॥ उत सर्वेन नार्घार्घं विजयाय कृतोद्यमाः ॥ अत
कारुण्यतो महयं यस्माद्यमिहागमाः ॥ शिवपुरुषाउचुः ॥ एवागेदरं यतेद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंडाली मरणोन्मुखी ॥ गत्वा मां नेतुमायाताः संदिष्टाः प्रभुणा वयं ॥ इत्युक्तः शि
वदूतैस्तैरकंपश्च पुनरप्यहो ॥ विस्मयाविष्टचित्तस्तान्कृतांजलिरपृच्छत ॥
अहो पापीयसी घोरा चंडाली कथमर्हति ॥ दिव्यं विमानमारोढुं शुनीवाध्वर
मंडपं ॥ आजन्मतोऽशुचिम्प्रायां पापां पापानुगामिनीं ॥ कथमेनां दुराचारां शिवलो
के निनीषथ ॥ अस्या नास्ति शिवज्ञानं नास्ति घोरतरं तपः ॥ सत्यं नास्ति दया नास्ति
कथमेनां निनीषथ ॥ पशुमांसकृताहारां यारुणां परिलोदरां ॥ जीवहिंसारतां नि
त्यं कथमेनां निनीषथ ॥ न च पंचाक्षरीजप्तानेन कृतं लिंगपूजनं ॥ न ध्यातो भग
वाञ्छंभुः कथमेनां निनीषथ ॥ नोपोषिता शिवतिथिर्न कृतं भक्तमोहितं ॥ नेष्टा दं
१४ प्रत्तोदिकं वापि कथमेनां निनीषथ ॥ न च स्नातानि तीर्थानि दत्तानि न कृतानि १४

च ॥ न च व्रतानि चीर्णानि कथमेनां निनीषथ ॥ ईक्षणपरिहृत्तो व्याकिंसुसंभा
षणादिषु ॥ सत्संगरहितां चंडां कथमेनां थिनिनीषथ ॥ जन्मांतरार्जितं किंचित्सुकृत्याः
सुकृतमस्ति वा ॥ तत्कथं कुष्ठयक्ष्मेणक्रिमिभिः परिभूयते ॥ अहो ईश्वरचर्यैयं
दुर्विभाव्यां शरीरिणां ॥ पापात्मानोपि नीयंते कारुण्यात्परमं पदं ॥ इत्युक्तास्ते म
यादनादेवदेवस्य भक्तिनः ॥ प्रसन्नमौनमथश्री स्वात्सर्वसंशयभेदिनः ॥ शिवदू
तुस्तुः ॥ ब्रह्मन्महत्तरं श्रयं पृष्णु कौतूहले यदि ॥ इमां मुद्दिश्य चंडाली यद्वृत्तं
भवता शुभा ॥ आसीदियं पूर्वभवे कांचिद्ब्राह्मणकन्यका ॥ सौमनी नाम संपूर्णसो
मबिंबसमानना ॥ उत्फुल्लमल्लिकादामसुकुमारांगलक्षणा ॥ केकयद्विजमुख्यस्य
कस्यचित्तनया सती ॥ तां सर्वलक्षणोपेतां रतेरिव परां ॥ वर्द्धमानां पितुर्गे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेषी स्याः सखि विल्मि लाजनाः दिने दिने वर्द्धमाना बंधुभिर्लालिता भृशं ॥ सा शनैर्यौवनं
भेजे स्मरस्येव महाधनुः ॥ अथ सा बंधुवर्गैश्च समेतेन कुमारिका ॥ पित्रा प्रदत्ता कस्मै
चिद्द्विजाय द्विजसत्तम ॥ सा भर्तारमनुप्राप्य नवयौवनशालिनी ॥ किंचित्कालं शुभा
चारा रेमे बंधुराचला ॥ अथ कालवशात्तस्याः पतिः स्त्रीरुजादितः ॥ रूपयौवनका
लोपि पंचत्वमगमत्सुने ॥ स्वतेभर्तर्यरिष्टः स्वैनविदग्धहृदया सती ॥ उवास कंचित्कालं सा
सुशीला विजितेंद्रिया ॥ अथ यौवनभारेण जृंभमाणेन नित्यशः ॥ बभञ्ज हृदयं त
स्याः कंदर्पपरिकंपितं ॥ सुगुप्ता बंधुवर्गेण सा शिपि महता भृशं ॥ न शशाक मनो रोढुम
दर्शीनाकृष्टमंगना ॥ सती प्रमन्मथाविष्टा रूपयौवनशालिनी ॥ विधवापि विरोधेण आ
रमागेरता भवत् ॥ न सा लोके न चिदपि जारिणी निविचक्षणा ॥ श्रुगरूतात्सदृशाचारं कि
१५ चित्कालमसंनमा ॥ तां दोहदसमाक्रांतां घननीलिमसंयुतां ॥ कालेन बंधुवर्गोपि दिगुत्वी १५

धविद्दूषितां ॥ इति भीतो महाक्रुशात्यक्त्वांतालेभेदुरत्ययां ॥ स्वयं कामेन नृत्यंती
श्रोलूणा हीनसेवया ॥ राजानीत्रलदंडेन यतयोभोगसंग्रहात् ॥ लीदंशु नायथैया
भेसुरयैवापि तु पयः ॥ रूपं कुष्टजाविष्टकुलं नश्यति कुस्त्रिया ॥ इति सर्वे समालो
च्य समेताः पतिमोदताः ॥ तत्यजुर्गोत्रतो दूरं नीत्वा तां सकचग्रहं ॥ सदूशोत्सर्गमु
त्सृष्टा सा नारी सर्वबंधुभिः ॥ विचरंती वहि ग्रामाद्दुष्टाभ्रदेणकेनचित् ॥ सतां
दृष्ट्वा वरारोहां पीनोन्नतपयोधरां ॥ गृहं निनाय यत्सात्म्याय धनवान्छूद्र
नायकः ॥ सा नारी तस्य महिषी भूत्वा तेन दिवानिशं ॥ रममाणा कचिद्दशौन्यवत्स
रूहवल्लभा ॥ मत्तसापि सिता हारं निस्यमापिनवा रुणा ॥ लेभे सुतं च भद्रेण र
ममाणा रतिप्रिया ॥ कदाचित्तद्र्जेरि क्षापिपा तेपीन सुसौरा तु सा ॥ इयेषपिशिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हारं मंदिरामदविह्वला॥ अथ मेषु बद्धेषु गोभिः सह वहिर्व्रजे॥ ययौ कृपाणमादा
य सुतालमोधानि रामसुखा॥ अविमृश्य मदावेशान्मेषबंधाऽभिषङ्किया॥ एकं जघा
न गोवत्सं क्रोधांतं न निद्रो दुर्भगा॥ निहतं गृहमानीय श्रीला गोवत्समंगना॥ भीता गि
रिशिवे स्याह कृतेन चिह्नत्सु ण्यकर्मणा॥ सामकुर्वे मिवध्यासो विशिष्ठामोसवल्लालसा॥
छित्वा तमेव गोवत्सं चकाराहारमीप्सितं॥ गोवत्सा दुर्दशारीरेणकृता हाराथसापुनः॥
तद्दर्द देहं निक्षिप्य बलिभूक्क्रोशकैतवान्॥ अहो व्याघ्रेण भग्नोयं जग्धो गोवत्स
कोव्रजे॥ इति तस्याः समाकर्ण्य दंसर्वे गेहेषु शुश्रुवे॥ अथ सर्वे भूद्विजनाः समागम्यांति
के स्थिताः॥ हतं गोवत्समालोक्य व्याघ्रेणेति भृशं चरुः॥ गतेषु तेषु सर्वेषु स्वस्थानं च
१६ तनोनिद्रोः॥ तद्वर्जां गेहमागत्य दृष्ट्वा नृगृह विह्वरं॥ एवं च कुलिधे काले गते सा १६

भर्तृवल्लभा॥ कालस्य वशमापन्ना जगाम यममंदिरं॥ यमोपि धर्ममालोच्य तस्याः कर्म
च पौर्विकं॥ विचर्य निरयावासात्सा कृते चंडालजातिका॥ सा विचित्रच्छायमधुरा श्रु चंडाली
गर्भमाश्रिता॥ तत्र संभवजा संधाप्रदांतांगारमेव का॥ नासिला कोपि चंडालोद्
दृष्टे कुत्रचिन्नास्थिता॥ नीता दृष्टा मपि स्तुतां कृपया पर्यपोषयत्॥ अभोज्येन क दन्ने
न भुंजानाली ठेन रतिना॥ अपेयेश्च रसैर्मा त्रापो षिता सा दिने दिने॥ जासं धासापि का
ले न बाल्ये कुष्ठरुजार्दिता॥ दुदानके न चिक्षापि चंडाले नाति दुर्भगा॥ अंती बाल्यासा
कालेविध्वस्त पितृ मातृका॥ दुर्भगेति परिस्यक्ता बंधुभिश्च सहोदरैः॥ ततः स्तुधार्दि
ता दीना शोचंती विगतेक्षणा॥ गृहीत यष्टिः कृच्छ्रेण संचचाल सलोष्टका॥ पत्तनेषु पि
सर्वेषु याचमाना दिने दिने॥ चंडालोच्छिष्ट पिंडेन जठराग्निमतर्पयत्॥ एवं कृच्छ्रेण

महतानीत्यास्तु यत्फलं वयः ॥ जरयाग्रस्तसर्वांगी दुःखमापदुरत्ययं ॥ निरन्नपानवसना
साकदाचिन्महाजनान् ॥ आधारस्थं स्या शिवनिर्थी गछंतीस्तु कुधेऽध्यमान् ॥ तस्यान्तु देव
याश्रयां देश देशांतयायिनां ॥ विप्राणांमाग्निहोत्रिणां सस्त्रीकानां महालनां ॥ २ राश्री
यस्तावरोधानां सहास्तिरथवाजिनां ॥ सपरिवार घोषाणां याचश्चादिशोभनां ॥ त
थान्येषांच विदूरस्थ दुःसंकीर्णोनां सहस्रशः ॥ हसनां गायतां क्वापिन्नृत्यतामनुधावतां ॥
जिघ्रतां पिबतां कामाकृष्टतां प्रतिगर्जतां ॥ संप्रयाणे मनुष्याणां संभ्रमः सुमहानभू ॥
इति सर्वेषु गच्छत्सु गोकर्णं शिवमंदिरं ॥ पर्वस्ति दिदिविजाः सर्वे विमानस्थाः सकौतुकाः ॥
अथेयमपि चंडाली वसनाशानतत्परा ॥ महाजनान्याचयितुं संचचाल शनैः शनैः ॥
करायलंबेनान्यस्याः प्राग्जन्मार्जितकर्मणा ॥ दिनैः कतिपयैर्याता गोकर्णक्षेत्रमायये ॥
१७ नतोचिदूरे मार्गस्य निषण्णा धिष्ठितांजलिः ॥ याचमानांस्तु कुःपांथानू चभाषेकृपणं वचः ॥ १७

प्राग्जन्मार्जितपापौघैः पीडितायाश्चिरं मम ॥ आहारमात्रदानेन दयां कुरुत भोजनाः ॥
न स्नाता नहि नाथा रायी मायां मन्दहीतले ॥ महापंकनिमग्नायां दयां कुरुत भोजनाः ॥
महाविनालपात्री यां पीडितायां महारुजा ॥ अंधायामपि वृद्धायां दयां कुरुत भोजनाः ॥
चिरोपवाससंदीप्तजठराग्निविवर्द्धनैः ॥ संदह्यमानसर्वांग्यां दयां कुरुत भोजनाः ॥
अनुपार्जितपुण्यायां जन्मांतरशतेष्वपि ॥ पापोद्यां मंदभाग्यायां दयां कुरुत भोजनाः ॥
त्रातारः परमात्मानोत्तां सतारः परमाशिषां ॥ कृतौ रोवकुपुण्योनां दयां कुरुत भोजनाः ॥
एवमभ्यर्थयंत्यास्तस्यां डाल्याः प्रसृतेंजलौ ॥ एकः पुण्यतमः पांथः प्राक्षिपद्बिल्वमंजरी ॥
तो मंजलो जनिपतां सा विमृश्य पुनः पुनः ॥ अभक्ष्येयमसाथ दूरे प्राक्षिपकालुरा
तस्याः करेण निर्मुक्ता रात्रौ सा बिल्वमंजरी ॥ पपात कस्यचिद्दिष्ट्या शिवलिंगस्य म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तके॥ सेवं शिवचतुर्दश्यां श्री पांथजनान्मुरुः॥ याचमामापि यत्किंचिन्मूले भेदेव योगतः॥
यत्रीषिताऽनया रात्रिर्भद्रकाल्यास्कृष्टतः॥ किंचिदुत्तरतः स्थानं तद्व्येनीति दूरतः॥
ततः प्रभाते प्रष्टा सा शोकेन महतालुता॥ ताने निर्विघ्नलेदीना स्वदेशायैव केवलं॥ श्रांता
चिरोपवासेन निपतंती पदे पदे॥ क्रंदंतीव कुररी गाढं वेपमाना क्षुधातुरा॥ दह्यमाना
कैलापेन नष्टदेहा सयष्टिका॥ अतीसैला चूर्णीभूमिं निपपात विचेतना॥ अथ विश्वेश्व
रः शंभुः करुणामृतवारिधिः॥ एनामोनयते स्मान्युक्तः स विमानकान्॥ एषा प्रध्य
त्तिश्चं त्यास्तवेह परिकीर्तिता॥ यथा संदर्शिता शंभोः कृपणेषु कृपालुता॥ कर्मणः परि
पाकोऽथ्यां गतिं परस्य महामते॥ अथ भाविपरस्थानमारोहति निरामयं॥ यदेतया सर्व १८
१८ भवे नाम्नतानादिकं कृतं॥ स्कंदलिपासादिभिः क्लेशैस्तस्मादिह निषीद्यते॥ यदेपॉमदवै

गां घात्यच्कै पापं महोल्बणं॥ कर्मणानेन जातं संध्याबभ्रूवात्रैव जन्मनि॥ अपि विशिष्य गोवत्सं
यदेषा भक्षयत्पुरा॥ कर्मणानेन चंडालीवभूवेह विगर्हिता॥ यदेषार्यपथं हित्वा आरमा गे
रतातुरा॥ तेन पापेन केशापि विनिष्टा दुर्भगेनिच॥ यदाश्लिष्टा मदा पैवे गाऽसारेण विध
वातुरा॥ तेन पापेन महता वकुष्ठव्रणान्विता॥ कामार्त्ता यदि यं स्वैरं भर्तुर्द्रोणमरामिता
पुरा॥ महास्थूकृपयक्रिमिभिः॥ पीडितानेन पाप्मना॥ यदेतया पर्वभयेषु सापी ताविन
ठयो॥ महायस्मान्निर्जितहत्तैः पीड्यते तेन पाप्मना॥ स्तुग्धमानि निर्वाणेनि नेष्टा प्रसादिकं कृ
तं॥ सर्वभोगविहीनेयं तेन दुःख्न तेन न पाप्मना॥ अन्यैश्च यत्सर्वमसेस्तुपापचिन्हानि कृत्स्नशः
लस्यं तेन मुनिशार्दूल सविवेकैर्महात्मभिः॥ अनयैव कुररीगात्रीय स्पुत्र धनवर्जिता॥ येच
दुर्लक्षणाः क्लिष्टा याचकाविगतस्त्रियः॥ यासोमपानरायनभूषणाभ्यंजनादिभिः॥ ही
नाविरूपानिर्विर्घाविकलांगाः कुभोजनाः॥ येदुर्भगानिंदिता अथ ये चान्यपरसेवकाः॥ एते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वं भवे सर्वेषु मसापकारिणः ॥८॥ एवं विमृश्य यत्नेन दक्षालो कजनस्थितिं ॥ बुधो न कुरुते
पापं यदि कुर्यात्स मे ऽत्महा ॥ देहार्थं मानुषोजंतो वै कुकर्मैकभाजनं ॥ सदा सत्कर्मसे
वितनुष्कर्म सनतं स्यजेन्नु ॥ पुण्यं तु सुखाय कुर्यान्न तु दुःखाय पापमाचरेत् ॥ इह यो रे कृत
रं लोके गच्छेन्न कुत्सितो भरः ॥ इमं मानुष्यमाश्रित्य देहं परमदुर्लभं ॥ यः आत्महितवान्कु
र्यादेवमेके समाश्रयेत् ॥ अथ पापानि सर्वाणि कुर्वन्नापि सदा नरः ॥ त्रियमेकमतिर्ध्या
येत्स सेनरातिपातकं ॥ स्नात्वा सर्वे भवे वै चेषा यदा श्रामा यमालयं ॥ तदा कविनर्कः सुमहान्वा
सीधर्मसभासदं ॥ यद्यपि श्राह्मणी ह्येषा सत्कुलाचारदूषिता ॥ अतोस्माभिरिहानीतान
रकं यातु नवा ॥ अन्यथा साधिनो यात्वे पुण्यशीले शोस्तिवा नवा ॥ अथापि सत्त्विमृश्यैव धा
१९ र्यौ दंडोत्र नान्यथा ॥ चंद्र जन्मसहस्रेषु कृतपुण्यविपाकतः ॥ स्नाणां सत्कुले जन्मलभ १९

ते हि कथंचन ॥ अतोस्यापर्वं सर्वेषु दूराघं नास्ति जन्मसु ॥ अन्यथा सत्कुले सत्र कथमेष
प्रपद्यते ॥ अत्रैव जन्मन्यनया कृतं नं होष्ठरस्य ॥ अथापि नरकावासे श्रायशो ये नमर्हति ॥
किं तु गोवत्सकं हत्वा विसृज्य गतसाध्वसा ॥ एषा स्त्रियो वेश्या ह प्राग्जन्मार्जितकर्मणा ॥ प
देषापापविशिष्टेसेस्कृदप्युरमंगलं ॥ शिवनामवदेज्ञनया नहि गच्छेत्सुरं पदं ॥ एक जन्मकृ
ताघस्य दारुणस्यापि यत्फलं ॥ कर्मेणानुभवेत्तैषा भृत्वा वै डालजातिकं ॥ तस्मादन्यतमः
कोवा नरकोस्ति नृणामिह ॥ अनेककर्कशरासंघातैः यस्कुंठपरिपीडनं ॥ दुःकुलेजन्मदारि
ड्यं महाव्याधिर्विषद्धताः ॥ एके कृत्य नरकः सर्वैयत्राथ किंपुनः ॥ प्राग्जन्मपुण्यभारे
ण यन्मा मानवि वशाभ्यूशीलत् ॥ तेनैषाम्यभ वे भरिपुण्यमनेकरिष्यति ॥ तेन पुण्येन म
हता निस्तीर्य घोघयातनाः ॥ नीतानतुरूपेरं ते प्रयास्यति परं दंविभो ॥ एता दशानां स
र्वांनोराशास्तारो न च यं कृचितु ॥ विचार्य स्वयमेवेशो यद्युक्तं न तत्करोतुसः ॥ एवं वैवस्वतपुरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वैर्यमनुरोगमैः॥ विस्मयचित्तस्तु साधो रियं तु कापतद्भुवि॥ आदौ यदेषा शिवमा
मनारी प्रमादतो वाप्यसती जगाद॥ तेने हभः स्तुरूहतेन नरां भोः बिल्वांकुरा राध्य
न पुण्यमाप॥ श्रीगोकर्णे शिवतिथावुपोष्य शिवमस्तके कृत्वा जागरणं ह्येषा चक्रे
बिल्वार्पणं निशि॥ अकामतः कृतस्यापि स्वपुण्यस्यैव च यत्फलं॥ अद्यैव भोक्ष्यते सेयं
परस्य नस्तव नो स्पृहा॥ ॥गौतम उवाच॥ इत्युक्त्वा शिवदूतास्ते तस्याः चंडालयोषि
तः॥ जीवलेशं समाकृष्य पुष्पुं दिव्यतेजसा॥ तां दिव्यदेहसंक्रांतां तालेजो राशिसमु
ज्ज्वलां॥ विमाने स्थापयामासुः श्रीमान्तो शिवकिंकराः॥ अथ सा परमोदाररूपलाव
ण्यशालिनी॥ दिव्याभरणदीप्तांगी दिव्यांबरविराजिनी॥ देहेन दिव्यगंधेन दिव्यते
२० जविकासिनी॥ दिव्यमाल्यावतंसेन विराजविमानगा॥ रत्नछत्रपताकाद्यैर्गइतवा २०

त्रनिस्वनैः॥ मध्ये सा शिवदूतानां मोदमाना वरानना॥ अनुभूतानिजस्यानिस्य
लोस्य त्यापुनः पुनः॥ भीता त्रस्ता ददाश्चर्या दृष्टास्य मभिवो त्थिता॥ काहं के मी महा
सिद्धाः को यं लोको मनोरमः॥ क्व गतं मे वपुः कष्टं चंडचंडालगोत्रजं॥ अहो सुमहा
दाश्चर्यं दृष्टं माया विलासजं॥ यस्य याभवलक्षेषु भ्रांतं भ्रांतं पुनः पुनः॥ अहो ईश्वर
पूजायां माहात्म्यं विस्मयावहं॥ पत्रमात्रेण संतुष्टो यो ददाति निजं पदं॥ इति तां आ
त्त निर्वेदां स्मरंती भगवत्पदं दिव्यं विमानमारोप्य ते मे हेश्वरकिंकराः॥ आलोकयत्सु
सर्वेषु लोकेषु सविस्मयं॥ आमंत्र्य तामथो निन्युः परमेश्वरसंनिधिं॥ राजन्कु म
हदाश्चर्यं माख्यामं गिरिजापतेः॥ माहात्म्यं भक्तिलेशस्य सर्वाघौघविनाशनं॥ राजो
उवाच॥ भगवन्परमेशस्य कीदृशो लोकउत्तमः॥ तस्य मे लक्षणं ब्रूहि यच्चास्ति मयि

दया॥ गौतम उवाच॥ ब्रह्मादिसुरनाथानां लोकेष्वपि सुदुर्लभः॥ यआनंदः सदा
तत्र स लोकः पारमेश्वरः॥ सर्वाभिगमनं यत्र ज्योतिर्यत्र प्रतिष्ठितं॥ कोपि नास्ति
तमो योगः स लोकः पारमेश्वरः॥ गुणत्रयविनिर्मुक्ती यसंप्राप्ताय यत्र योगिनः॥ नप
तेसु पुनः सर्वे स लोकः पारमेश्वरः॥ यत्रैवासनकुर्वेति क्रोधलोभमदादयः॥ तत्राव
स्थानमन्याघाः स लोकः परमेशितुः॥ सर्वेषां निगमानां च यदेकं क्षेत्रमुच्यते॥ यस्मा
न्नास्ति परं किंचित्तत्स्यदं पारमेश्वरं॥ प्रत्याहारासनध्यानप्राणसंयमनादिभिः॥
यत्र योगपथैः प्राप्तिं यतंते योगिनः सदा॥ यत्र देवः सदानंदं निर्मलज्ञानरूपया॥
आस्ते देव्या सह क्रीडन् स लोकः पारमेश्वरः॥ अन्यानेकसहस्रेषु सभ्यैते पुण्यराशि
२२ भिः॥ आरूढाः पुरुषा नार्यः क्रीडंते यत्र संगताः॥ तेजो यत्रोसमालीनादुर्विभाव्यमनो २२

रमे॥ अहोरात्रादिसंख्यानं न विंदति कदाचन॥ स लोकः परमेशस्य दुर्लभो हि कुयोगि
नां॥ एतत्र कि सुधापूर्णास्तेरेव प्रतिपद्यते॥ येनतत्कथाश्रवणकीर्तनजातहर्षा ये स
र्वभूतसुहृदः प्रशामैकनिष्ठाः॥ संसारचक्रमतिवाह्य निरस्तमोहास्तेषां करं पदवम
वाप्य सुरवं रमंते॥ तथा त्वमपि राजेंद्र गोकर्णगिरिशालयं॥ गत्वा प्रशामिताघौघः कृत
कृत्यत्वमाप्नुहि॥ तत्र सर्वेषु तीर्थेषु स्नात्वाभ्यर्च्य महाबलं॥ कृत्वा शिवचतुर्दश्यामुप
ग वासं समाहितः॥ कृत्वा जागरणं रात्रौ विल्वैरभ्यर्च्य शंकरं॥ सर्वपापविनिर्मुक्तः शिव
लोकमवाप्स्यसि॥ एवं तेन विमलो राजन्नुपदेशो मया कृतः॥ स्वस्ति तेस्तु गमिष्यामि मिथि
लाधिपतेः सुरी॥ इत्यामंत्र्य मुनिः प्रीत्या गौतमो मिथिलां ययौ॥ सोपि हृष्टमना राजा
गोकर्णं प्रत्यपद्यत॥ तत्र दृष्ट्वा महादेवं स्नात्वाभ्यर्च्य महाबलं॥ निर्धूताशेषपापौघो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ले भैरवाभीः परं पदं ॥ यदमां शृणुयास्मि स्वकथां शैवीं मनोहरां ॥ श्रावयेद्वा जनान्भक्त्या
स याति परमां गतिं ॥ श्रद्धानः सकृद्वापि य इमां शृणुयात्कथां ॥ त्रिसप्तकुलजैः सा
र्धं शिवलोकमवाप्नुयात् ॥ इति कथितमेषश्रेयसामादिबीजं भवशतदुरितघ्नं ध्व
स्तमोहांधकारं ॥ चरितममरगेयं मन्मथारेरुदारं सततमपि निषेव्यं स्वस्तिमा
नस्तु लोकः ॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवचतुर्दशीमाहात्म्यकथनं ना
म द्वितीयोध्यायः ॥ ॥ सूत उवाच ॥ ॥ अथापि शिवमाहात्म्यं वक्ष्यामि परमद्भुतं ॥ श्रु
मो० ३ ण्वतां सर्वपापघ्नं भवपाशविमोचनं ॥ दुस्तारदुरितांभोधौ मज्जतां विषयात्मनां ॥
शिवपूजां विना कश्चित्प्लवो नास्ति निरूपतः ॥ शिवपूजां सदा कुर्याद्बुद्धिमानिह मानवः ॥
२२ अशक्तश्चेत्सकलां पूजां पश्येद्भक्तिविनम्रधीः ॥ अश्रद्धयापि यः कुर्याच्छिवपूजां विमुक्ति २२

दं ॥ पश्येद्वा सोपि कालेन प्रयाति परमं पदं ॥ आसीत्किरातदेशेषु नाम्ना राजा विमर्षणः ॥
शूरः परमदुर्धर्षो जितशत्रुः प्रतापवान् ॥ सर्वदा मृगयासक्तश्चपलो निर्घृणो बली ॥
सर्वमांसाशनः क्रूरः सर्ववर्णांगनारतः ॥ तथापि कुरुते शंभोः पूजां नित्यमतंद्रितः ॥
चतुर्दश्यां विशेषेण पक्षयोः शुक्लकृष्णयोः ॥ महाविभवसंपन्नां पूजां कृत्वा समोदते ॥
हर्षेण महता युक्तोऽनृत्यत्तिस्रो त्रिगायति ॥ तस्यैवं वर्तमानस्य नृपतेः सर्वभक्षिणः ॥
दुराचारस्य महिषी चेष्टितेनान्वतप्यत ॥ सा वै कुमुद्वती नाम राज्ञी शीलगुणान्विता
एकदा पतिमासाद्य रहस्येतमपृच्छत ॥ तव नेत्रचरितं राजन्महदाश्चर्यकारणं ॥ कु
ते महान् दुराचारः क्व भक्तिः परमेश्वरे ॥ सर्वदा सर्वभक्षस्त्वं सर्वस्त्रीरतिलालसः ॥
सर्वहिंसापरः क्रूरः कथं भक्तिस्तवेश्वरे ॥ इति पृष्टः स भूपालो विमृश्य सुचिरं त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फः॥ त्रिकालज्ञः महर्षेस्तेनां प्रोवाच सत्कुलं हलं॥ राजोउवाच॥ अहं पूर्वभवे कस्मिन्नासं
रमे योवराजने॥ पंपानगरमाश्रित्य सपर्यैदाभिसमंमतः॥ रवेकालेहुगधसूतस्मै न
नगरे तन्मे॥ कदाचिद्गतः सोहंमनोज्ञं शिवमंदिरं॥ पूजां वर्तमानायां चतुर्दश्यां यां
महालितिथौ॥ अपश्यं तु स्वथकुशाद्वहिर्द्वारं समाश्रितः॥ अथाहं परमक्रुद्धे दंडहस्तोप्र
धाविलः॥ तस्माद्देशाद्दयेकोन प्राणरक्षापरायणः॥ ततः प्रदक्षिणीकृत्य तद्देवशि
वमंदिरं॥ द्वारदेशं पुनः प्राप्य तन्मध्ये व निवारितः॥ पुनः प्रदक्षिणीकृत्य मनोज्ञं शिवमं
दिरं॥ बलिपिंडादि लोभेन पुनर्द्वारमुपागतः॥ एवं पुनः पुनस्तत्र कृत्वा योघं प्रदक्षिणं॥
द्वारदेशे समासीनं निजमुर्निशितैः शरैः॥ सविद्धमात्रः सहसा शिवद्वारि हतः सकः॥
२३ जातोस्म्यहं कुलेश्रेष्ठे प्रभावाछिवसंनिधिं॥ दृष्टा चतुर्दशीपूजां दीपमालाविलोकि २३

ता॥ तेन पुण्येन महता त्रिकालज्ञोस्मि भामिनी॥ प्राग्जन्मवासनाभिश्च सर्वं मद्ध्योस्मि
निर्द्धनः॥ विदुषामपि दुर्लक्ष्यां प्रकृतिं वासनामयी॥ अतोहं मर्त्ययामी शं चतुर्दश्यां
जगद्गुरुं॥ त्वमपि श्रद्धया भद्रे भज देवं पिनाकिनं॥ राज्ञी उवाच॥ त्रिकालज्ञोसि राजें
द्र प्रसीद द्विरिजापते॥ तत्सर्वं जन्मचरितं च कुमहेसि तत्वतः॥ राजोवाच॥ त्वं तु पूर्वे
भवेका चित्कपोती व्योमचारिणी॥ कापि लब्धवती किंचिन्मांसपिंडं यदृच्छया॥ त्वदु
ही ८ लमथालोक्य गृध्रः कोप्यामिषं वली॥ निरामिषः स्वयं वेगादभिदुद्राव भीषणः॥
तत्संत्रासी स्वयं चित्रस्ता विदुता सिवरानने॥ तेनानुयाता घोरेण मांसपिंडं जिघृक्षया
या॥ दिष्ट्या श्रीगिरिमासाद्य श्रांता नागचरी शिवालये॥ प्रदक्षिणं परिक्रम्य ध्वजाग्रे स
मुपस्थिता॥ अथानुद्रुत्य सहसा तीक्ष्णतुंडो विहंगमः॥ तां निर्विद्य निपात्याधो मांसमा २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दायत्वग्निनान्॥ अदक्षिणप्रक्रमणाद्देवदेस्यैवेभत्स्लितः॥ तस्याग्रेभरणा
श्चैव जातासीहन्त्पापगना॥ ॥राज्ञीउवाच॥ ॥श्रुतं सर्वमशेषेण प्राग्जन्माच
रितं मया॥ जातं च महदाश्चर्यं भ्रमितिश्च मम चेतसि॥ अन्यथा भोक्तुमिच्छामि त्रि
कालज्ञ महामते॥ इदं शरीरं तु त्वन्यथा स्यात् कां गतिं पुनः॥ ॥राजोवाच॥ अ
नेन भवे जन्मनि षष्ठेहं द्विजायसैंधवो नृपः॥ स्वजयेरास्तु तां त्वं हि मामेव प्रतिपत्स्यसे॥
तु तृतीये चैव भवे राजा सौराष्ट्रे भाविता स्म्यहं॥ कलिंगराजतनया त्वं मे पत्नी भविष्य
सि॥ चतुर्थे तु भाविष्यामि भवे गांधर्वभूमिपः॥ मागधी राजतनया तत्र त्वं माम
पास्यसि॥ पंचमेऽवंतिनाथोहं भविष्यामि भवांतरे॥ दशार्णराजतनया त्वमेव मम
२४ वल्लभा॥ अस्मात्जन्मनि षष्ठेहमानर्तेभविता नृपः॥ ययातिवंशजा कंन्या भार्या मा २४

मेव यास्यसि॥ पांड्यराजकुमारोहं सप्तमे भविता भवे॥ तत्र मत्सदृशो नान्यो रूपौ
दार्यगुणान्वितः॥ सर्वशास्त्रार्थतत्त्वज्ञो बलवान्दृढविक्रमः॥ सर्वलक्षणसंपन्नः सर्व
लोकमनोरमः॥ पद्मवर्ण इति ख्यातः पद्ममित्रसद्युतिः॥ भविता त्वं च वैदर्भरूपेण
प्रतिमा भुवि॥ नाम्ना वसुमती ख्याता रूपावयवशोभना॥ सर्वराजकुमाराणां म
नोनयनंदिनी॥ सा त्वं स्वयंवरे सर्वान्विहाय नृपनंदनान्॥ वरं प्राप्स्यसि मामेव दम
यंतीव नैषधं॥ सोहं जित्वान्नृपान्सर्वो त्वां प्राप्य वरवर्णिनीं॥ स्वराष्ट्रस्थो खिलान्
भोगान्भोक्ष्येवषंगणान्भूणा बहून्॥ इष्ट्वा च विविधैर्यज्ञैर्वाजिमेधादिभिः शुभैः॥
संतर्प्य पितृदेवर्षीन्दानैश्च द्विजसत्तमान्॥ संपूज्य देवदेवेशं शंकरं लोकशंकरं॥
पुत्रे राज्यधुरं न्यस्य गंतास्मि तपसे वनं॥ तत्रागस्त्यान्मुनिवरात् ब्रह्मज्ञानमवाप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च॥ तथा सह गमिष्यामि शिवस्य परमं पदं॥ चतुर्दश्यां चतुर्दश्यामेवं संपूज्य शं
करं॥ सप्तजन्मसु राजोहं भविष्यामि वरानने॥ इसेन तु कृतं लब्धं पूजादर्शनमा
त्रतः॥ कुमारमेयो दुष्टात्मा केद्दशीव तमस्कृतिः॥ सूत उवाच॥ ॥ इत्युक्त्वा निजना
थेन सा राज्ञी शुभलक्षणा॥ परं विस्मयमापन्ना पप्रच्छ याम्मास तं मुदा॥ सो पि राजा तथा
सार्द्धं भुक्त्वा भोगान्यथेप्सितान्भुवि॥ जगाम सहजन्माते शंभोस्तत्परमं पदं॥ यएतां छिव
पूजाया माहात्म्यं परमाद्भुतं॥ शृणुयात्कीर्तयेद्वापि स गच्छेत्परमं पदं॥ ॥इति श्रीस्कं
दपुराणे ब्रह्मोत्तरखंडे चतुर्दशी माहात्म्यं चतुर्थोध्यायः॥ ॥सूत उवाच॥ शिवो गुरुः
॥२५॥ शिवो देवः शिवो बंधुः शरीरिणां॥ शिव आत्मा शिवो जीवः शिवादन्यं न विद्यते॥ शिव ॥२५॥
मुद्दिश्य यत्किंचिद्दत्तं जप्तं हुतं कृतं॥ तदनंत फलं प्रोक्तं सर्वागमविनिश्चितं॥ भक्त्या

निवेदितं शंभोः पत्रं पुष्पं फलं जलं॥ अल्पादल्पतरं वापि तदानंत्याय कल्पते॥
विहाय सकलान्धर्मान्सकलागमचोदितान्॥ शिवमेकं भजेद्यस्तु मुच्यते
कर्मबंधनात्॥ या प्रीतिरात्मनः पुत्रे या कलत्रे धने पि सा॥ कृता चेच्छिवपू
जायां सिद्धंतीति किमद्भुतं॥ तस्मात्केचिन्महात्मानः सकलान्विषयान्सवान्
त्यजंति शिवभक्त्यर्थे स्वदेहमपि दुस्त्यजं॥ सा जिह्वा या शिवं स्तौति तन्मनो
ध्यायते शिवं॥ तत्कर्णौ तत्कथालोलौ तौ हस्तौ तस्य पूजकौ॥ ते नेत्रे पश्यतः पूजां
तच्छिरः प्रणतं शिवे॥ तौ पादौ यौ शिवक्षेत्रं भक्त्या पर्यटतः सदा॥ यस्येंद्रियाणि
सर्वाणि वर्तंते शिवकर्मसु॥ स संतरति संसारं भुक्तिं मुक्तिं च विंदति॥ शिवभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतु लोभमयैश्चंडालः पुल्कसो पि वा ॥ नारी नरो वा षंढो वा सद्यो मुच्येत संसृतेः ॥ किं
कुलेन किमाचारैः किं शीलेन गुणेन वा ॥ भक्तिलेशः पुनः शंभोः सर्वदः सर्वदेहिनां ॥
उज्जयिन्यामभूद्राजा चंद्रसेनसमाख्यया ॥ ज्ञानी मानुषरूपेण द्वितीय इव वासवः ॥
तस्मिन्पुरे महाकालं वसंतं परमेश्वरं ॥ समर्चयत्ससौभाग्याच्चंद्रसेनोनन्योपासनः ॥
तस्याभवत्सखा नाम्ना शिवपारिषदाग्रणीः ॥ माणिभद्रो जितात्मा च सर्वलोकनमस्कृ-
तः ॥ तस्यैकदा महीभर्तुः प्रसन्नः शंकरानुगः ॥ चिंतामणिं ददौ दिव्यं माणिभद्रो महा-
मणिं ॥ स मणिः कौस्तुभ इव द्योतमानोर्कसंनिभः ॥ दृष्टः श्रुतो वा ध्यातो वा नृणां य-
२८ च्छति मंगलं ॥ तस्य कांतितलस्पृष्टं कांस्यं ताम्रमयं त्रपु ॥ पाषाणादिकमन्यद्वा स- २८

द्यो भवति कांचनं ॥ स तं चिंतामणिं कंठे बिभ्रद्राजा सनंगतः ॥ रराज राजा देवानां मध्ये
भानुरिव स्वयं ॥ श्रुत्वा चिंतामणिग्रीवं तं श्रुतारा जसत्तमं ॥ प्रवृद्धतर्षा राजानः सर्वे
क्षुब्धहृदोभवन् ॥ स्निह्यल्के चिद याचंत धार्ष्ट्यात्के च नडु मेदाः ॥ देवलब्धमजानंतो
मणिं मत्सरिणो नृपाः ॥ सर्वेषां क्षुभिताया च्चायं पदाव्यथः कृतास्तु ना ॥ राजानः सर्व
देशानां संरंभं चक्रिरे तदा ॥ सौराष्ट्राः कैकयाः शाल्वाः कलिंगाः शकमद्रकाः ॥ पांचाला
वंगाः सौवीरा मागधा मत्स्यसृंजयाः ॥ एते चान्ये च राजानः सहाश्वरथकुंजराः ॥
चंद्रसेनं मृधे जेतुमुद्यमं चक्रुरोजसा ॥ ते तु सर्वे सुसंरब्धाः कंपयंतो वसुंधरां ॥
उज्जयिन्याश्चतुर्द्वारं रुरुधुर्बहुसैनिकाः ॥ संरुध्यमानां स्वपुरीं दृष्ट्वा राजाथ रुद्रतेः

चंद्रसेनो महाकालं तमेव शरणं ययौ ॥ निर्विकल्पो निराहारः स राजा दृढनिश्च-
यः ॥ अर्चयामास गौरीशं दिवा नक्तमनन्यधीः ॥ एतस्मिन्समये तत्रैव नगरे त्तमे- २
चरंती का ॥ गोपिका काचिन्महाकालांतिकं ययौ ॥ सा पंचहायनं बालं वहंती गतभ-
र्तृका ॥ राज्ञा कृतां महापूजां ददर्श गिरिजापतेः ॥ सा दृष्ट्वा सर्वमाश्चर्यं शिवपूजां म-
होदयां ॥ प्रणिपत्य स्वशिबिरं पुनरेवाभ्यपद्यत ॥ एतत्सर्वमशेषेण स दृष्ट्वा वल्लवीसुतः ॥
कुतूहलेन विदधे शिवपूजां विमुक्तिदां ॥ आनीय हृद्यपाषाणं शून्ये तु शिबिरांतरे ॥
अविदूरे स्वशिबिराच्छिवलिंगमकल्पयत् ॥ यानि कानि च पुष्पाणि हस्तलभ्यानि
चालनः ॥ आनीय स्नापयल्लिंगं पूजयामास भक्तितः ॥ गंधालंकारवासांसि धूपदी-
२८ पाक्षतादिकं ॥ विधाय कृत्रिमैर्द्रव्यैर्नैवेद्यं चाप्यकल्पयत् ॥ भूयो भूयः समभ्यर्च्य २८

पत्रैः पुष्पैर्मनोरमैः ॥ नृत्यं च विविधं कृत्वा प्रणनाम पुनः पुनः ॥ एवं पूजां प्रकुर्वाणं शि-
वस्यानन्यमानसं ॥ सा पुत्रं प्रणयाद्गोपी भोजनाय समाह्वयत् ॥ यदा रतोपि बहुशः
संपूजायां सक्तमानसः ॥ बालोपि भोजनं नैच्छत्तदा माता समाययौ ॥ तं विलोक्य शि-
वस्याग्रे निषण्णं मीलितेक्षणं ॥ चकर्ष पाणिं संगृह्य कोपेन समताडयत् ॥ आकृष्ट-
स्ताडितो वापि नागच्छत्स्वसुतो यदा ॥ तां पूजां नाशयामास क्षिप्त्वा लिंगं च दूरतः ॥
हाहेति रुदमानं तं निर्भर्त्स्य स्वसुतं ततः ॥ प्रविवेश स्वगेहं गोपी रोषसमन्विता ॥
मात्रा विनाशितां पूजां दृष्ट्वा देवस्य भूरिशः ॥ देव देवेति चुक्रोश निपपात स बाल-
कः ॥ प्रनष्टसंज्ञः सहसा बाष्पपूरपरिप्लुतः ॥ लब्धसंज्ञो मुहूर्तेन चक्षुषी उन्मील-
यत् ॥ ततो मणिस्तंभविराजमानं हिरण्मयद्वारकपाटतोरणं ॥ महार्हनीलामल ता

वज्रवेदिकं तद्देवजातं रिविरंदिगालयं॥ संततहेमकलशैर्वैकुशिविचित्रैः शो
भासितस्फटिकसौधतलाभिरामं रम्यं चतविरंचु रंचकपीठैमध्येलिंगरत्नम ८२
हितं सदद्दरीबालः॥ सहस्रासहस्रोत्सवभानोविकिमसमानसः॥ निमग्न इवस
तोषात्सुरमानंदसागरे॥ विज्ञायवितोधप्रजायामाहात्म्यं तत्प्रभावतः॥ ननाम दंड
वद्भूमौ स्वमातुरघशांतये॥ देवसमस्यचुनतिं ममसमातुरुमापते॥ महदाया स्व
मजानं स्याः प्रसन्नो भव शंकर॥ यथास्ति मयि यत्किंचित्सुपुण्यं चद्रकिंसंभवं॥
तेनापि तिवमेमाता नवकारूण्यमाप्नुयात्॥ इति प्रसाद्यागिरिशं भयोभयः
प्रणम्य च॥ सर्वेचास्तंगते बालो निजेगाम शिवालयात्॥ अथापरस्यसुमित्रेऽरु
५८ ंदस्मपुरोपमं॥ सयोहिण्मयी भ्रांतविविचित्रविभवोज्वलं॥ सौतः प्रविश्यवैभवं तं ५८

मोदमानो निशात्मुखे॥ महामणिगणाकीर्णं हेमशाखासमुज्वलं॥ तत्रापरस्य सं
जनं नीलस्वपतीमकुलोभयं॥ महार्हरत्नपर्यंके शीलरायामधिष्ठिते॥ रत्नालंका
रदीप्तांगी दिव्यांबरविराजिता॥ दिव्येलक्षणसंपन्नां सा शालसुरवध्नुमिव॥ जवे
नोत्थापयामास संभ्रमोत्फुल्ललोचनः॥ अंबजागृहि भद्रं ते पश्येदं महदद्भुतं॥
इति प्रबोधितो गोपी स्वपुत्रेण महात्मना॥ स संभ्रमं समुत्थाय तत्सर्वं समुदैक्षत॥
अपूर्वमिव चासीन मपूर्वमिव बालकं॥ अपूर्वं च स्वसदनं दृष्ट्वासील्लुखविह्वला॥
सुतोक्तं पुत्रस्यास्य सर्वं प्रसादं गिरिजापतेः॥ राज्ञे विज्ञापयामास यो भजत्स्वनिशाधि
पं॥ स राजा सहसागत्य समानतनिमंत्रिनोत्थितः॥ ददर्श गोपिकासूनोः प्रभावं शि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतोषणं ॥ हिरण्मयं शिवस्थानं लिंगं मणिमयं तथा ॥ गोपवध्वाश्च सदनं माणिक्य
कनकोज्वलं ॥ दृष्ट्वा महीपतिः सर्वसामात्यः सपुरोहितः ॥ मुहूर्तं स विस्मितधृ
तिः परमानंदनिर्भरः ॥ प्रेम्णा बाष्पजलं मुंचन्परिरेभे तमर्भकं ॥ एवमत्यद्भुता
कारा शिवमाहात्म्यकीर्तनात्पुरा ॥ पौराणां संभ्रमाच्चैव सा रात्रिः क्षणतामगात् ॥
अथ प्रभाते सुव्यक्तं यत्पुरं संरुध्य संस्थिताः ॥ राजानश्चारचक्षुष्याः शुश्रुवुः पर
मार्द्भुतं ॥ ते त्यक्तवैराः सहसा राजानश्चकिताभृशं ॥ न्यस्तशस्त्राः प्रविविशु
श्चंद्रसेनानुमोदिताः ॥ तां प्रविश्य पुरीं रम्यां महाकालं प्रणम्य च ॥ तद्गोपवनिता
२९ गेहं आजग्मुः सर्वभूभृतः ॥ ते तत्र [illegible] चंद्रसेनेन प्रत्युत्थायाभिपूजिताः ॥ महा
हं विष्टरगताः प्रत्यनंदन्सुविस्मिताः ॥ गोपसूनोः प्रसादाय प्रादुर्भूतं शिवालयं २९

लिंगं वीक्ष्य तु महद्दिव्ये चक्रुः परां गतिं ॥ तस्मै गोपकुमाराय प्रीतास्ते सर्वभूभुजः ॥
गावासोहिरण्यरत्नानि गोमहिष्यादिकं धनं ॥ गजानश्वान्रथान्दोलान्छत्रया
नपरिच्छदान् ॥ दासान्दासीरनेकाश्च ददुः शिवकृपार्थिनः ॥ ये ये सर्वेषु देशेषु
गोपास्तिष्ठंति भूरिशः ॥ तेषां तमेव राजानं चक्रिरे सर्वपार्थिवाः ॥ अथास्मिन्नं
तरे सर्वैस्त्रिदशैरभिपूजितः ॥ प्रादुर्बभूव तेजस्वी हनुमान्वानरेश्वरः ॥ तस्या
भिगमनाद्देवराजानो जातसंभ्रमाः ॥ प्रत्युत्थाय नमश्चक्रुर्भक्तिनम्रात्समूर्तयः ॥
तेषां मध्ये समासीनः पूजितः प्लवगेश्वरः ॥ गोपात्मजं समाश्लिष्य राज्ञो वीक्ष्येदम
ब्रवीत् ॥ सर्वे शृणुत भद्रं वो राजानो ये च देहिनः ॥ शिवपूजामृते नान्या गतिर
स्ति शरीरिणां ॥ एष गोपसुतो दिष्ट्या प्रदोषे मंदवासरे ॥ अमंत्रेणापि संपूज्य शि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेशिवममवान्॥मंदवारे प्रदोषेऽदुर्लभः सर्वदेहिनां॥नत्वापि दुर्लभं तरः लब्धपु
ण्येसमागते॥एवं पुण्यतमो लोके गोपानां कीर्त्तिवर्द्धनः॥अस्य वंशे ष्टमे भावि नंदो
नाम महायशाः॥प्राप्स्यते तस्य पुत्रत्वं कृष्णो नारायणः स्वयं॥अद्यप्रभृति लोके
स्मिन्नेष गोपकनंदनः॥नाम्ना श्रीकर इत्येव लोके स्मिन्ख्यातिं गमिष्यति॥सूत
उवाच॥एवमुक्त्वांजनीसूनुस्तस्मै गोपकसूनवे॥उपदिश्य शिवाचारं तत्रैवांत
रधीयत॥ते च सर्वे महीपालाः संहृष्टाः प्रतिपूजिताः॥चंद्रसेनं समामंत्र्य प्रतिज
ग्मुर्यथागतं॥श्रीकरोपि महातेजा उपदिष्टो हनुमता॥ब्राह्मणैः सह धर्मज्ञैश्चक्रे
३० शंभोः समर्हणं॥कालेन श्रीकरः सोपि चंद्रसेनश्च भूपतिः॥समाराध्य शिवं भक्त्या ३०

आपतुः परमं पदं॥इदं पवित्रं परमं रहस्यं सर्वस्वं यशस्यं गतिदं विचित्रं॥आख्यानमा
ख्यातमघौघनाशनं गौरीशपादांबुजभक्तिवर्द्धनं॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखं
डे शिवरजावर्णनं नाम पंचमोध्यायः॥ ॥ऋषय ऊचुः॥ ॥यदुक्तं भवता सूत महदा
ख्यानमद्भुतं॥शंभोर्माहात्म्यकथनमशेषाघहरं परं॥भूयोपि श्रोतुमिच्छामो तद्वद
त्वं समाहिताः॥प्रदोषे भगवाञ्छंभुः पूजितस्तु महात्मभिः॥संप्रयच्छति कां सिद्धिमे
तन्नो ब्रूहि सुव्रत॥श्रुतमप्यसकृत्सूत न भूयस्तृप्यामहे वयं॥ ॥सूत उवाच॥साधु
पृष्टं महाप्राज्ञा भवद्भिर्लोकविश्रुतैः॥तत्र श्रेयो महादेवो नान्यो देवः कृतार्थिभिः॥
प्रदोषपूजामाहात्म्यं को नु वर्णयितुं क्षमः॥यत्र सर्वेपि विबुधास्तिष्ठंति गिरिशांतिके
प्रदोषसमये देवः कैलासे रजतालये॥करोति नृत्यं विबुधैरभिष्टुतगुणोदयः॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ स्नानजपो होमस्तत्कथानुकूणस्तवः ॥ कर्तव्यो नियतं मर्त्यैश्चतुर्वर्गफलार्थिभिः ॥
दारिद्र्यतिमिरांधानां मिदं हि परमांजनं ॥ ऋणसागरमग्नानां प्लवोयं पारदर्शनः ॥
दुःखशोकभयार्तानां क्लेशनिर्वाणकारणं ॥ प्रदोषे पार्वतीशस्य पूजनं मंगलायनं ॥
दुर्बुद्धिरपि नीचोपि मंदभाग्यः शठोपि वा ॥ प्रदोषे पूज्य देवेशं विपद्भ्यः स प्रमुच्य
ते ॥ शत्रुभिर्हन्यमानोपि दश्यमानोपि पन्नगैः ॥ शैलैराक्रम्यमाणोपि पतन्नपि महा
बुधौ ॥ आविद्धकालदंडोपि नानारोगहतोपि वा ॥ न विनश्यति मर्त्यो सौ प्रदोषे गि
रिशार्चनात् ॥ दारिद्र्यं मरणं दुःखं गणभारं नगोपमं ॥ सद्यो विधूय संपद्भिः पूज्य
ते शिवपूजनात् ॥ अत्र वक्ष्ये महापुण्यमितिहासं पुरातनं ॥ यच्छ्रुत्वा मनुजाः सर्वे
३१ प्रयांति कृतकृत्यतां ॥ आसीद्विदर्भविषये नाम्ना सत्यरथो नृपः ॥ सर्वधर्मर ३१

तो धीरः सुशीलः सत्यसंगरः ॥ तस्य पालयतो भूमिं धर्मेण मुनिपुंगवाः ॥ व्यतीयाय म
हान्कालः सुखेनैव महामते ॥ अथ तस्य महीभर्तुः शत्रवः शाल्वभूभुजः ॥ बभूवुरु
द्धतबलादुर्मर्षणपुरोगमाः ॥ कदाचिदथ ते शाल्वाः संनद्धबहुसैनिकाः ॥ विदर्भन
गरीमाप्य रुरुधुर्विजिगीषवः ॥ दृष्ट्वा विरुद्धमानां तां विदर्भाधिपतिः पुरीं ॥ यो
द्धुमभ्युद्ययौ तूर्णं बलेन महता वृतः ॥ तस्य तैरभवद्युद्धं शाल्वैरतिबलोद्धतैः ॥ पाता
लेपन्नगेंद्रस्य गंधर्वैरिव दुर्मदैः ॥ विदर्भनृपतिः सोथ कृत्वा युद्धं सुदारुणं ॥ प्रण
ष्टोरुबलः शाल्वैर्निहतो रणमूर्द्धनि ॥ तस्मिन्महारथे वीरे निहते मंत्रिभिः स
ह ॥ द्रुद्रुवुः समरे भग्ना हतशेषाश्च सैनिकाः ॥ अथ युद्धेभिविरते नदत्सु रिपुमं
डिषु ॥ नगर्यां दुह्यमानायां जाते कोलाहले परे ॥ तस्य सत्यरथस्यैका विदर्भाधिपतेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सती॥ भार्या शोकसमाविष्टा कश्चित्कालाद्दिनिर्ययौ॥ सा निःस्वा समये यत्नाद्दंलवेत्ती
न्टपांगना॥ निर्गता शोकसंतप्ता सती चिंप्रययौ दिशं॥ अथ प्रभाते मार्गेण गच्छंती वा
नकैः सती॥ अतीत्य दूरमध्वानं ददर्श विमलं सरः॥ न नागस्वचरा शेहा तप्ता तापेन
भयसा॥ विलसत्तं सरस्तीरे छायाढ्यं संसमाश्रयत्॥ तत्र देववशात्प्राप्ती विजनेतु
कुट्टिमे॥ असूत तनयं साध्वी मुहूर्ते लक्षणान्विते॥ अथ सा राजमहिषी पिपासाभि
हताध्वरं शं॥ सरोवतीर्णा चार्थं गीग्रस्ता ग्राहेण भयसा॥ जातमात्रः कुमारोपि विनष्ट
पितृमातृकः॥ रुरोदोच्चैः सरस्तीरे क्षुत्पिपासाकुलो बलः॥ तस्मिन्नेवं क्रंदमाने जा
तमात्रे कुमारके॥ काचिदभ्यायया शाग्रं दिष्ट्या विप्रवरांगना॥ साप्येकहायनं बाल
३२ मुद्वहंती निजात्मजं॥ अधना भर्तृरहिता याचमाना गृहे गृहे॥ एकात्मजा बंधुही ३२

नायाञ्चामार्गवशं गता॥ उमा नाम द्विजसती ददर्श न्टपनंदनं॥ सा दृष्ट्वा राजतन
यं स्वर्यबिंबमिव च्युतं॥ अनाथमेनं क्रंदंतं चिंतयामास भूरिशः॥ अहो सुमहदाश्च
र्यमिदं दृष्टं मयाधुना॥ अच्छिन्ननाभिसूत्रोयं शिशुर्माता कवागता॥ पिता नास्ति न
चान्योस्ति नास्ति बंधुजनोपि वा॥ अनाथः कृपणो बालः शेते केवलभूतले॥ एष चंडा
लजो वापि शूद्रजो वैश्यजोपि वा॥ विप्रात्मजो वा न्टपजो ज्ञायते कथमर्भकः॥ शिशु
मेनं समुद्धृत्य पुष्णाम्यौरसवत्स्वयं॥ किंतु विज्ञातकुलजं नोत्सहे स्प्रष्टुमुत्तमे॥ इ
ति मीमांसमानायां तस्यां विप्रवरस्त्रियां॥ कश्चित्समाययौ भिक्षुः साक्षादिव शिवः
स्वयं॥ तामाह भिक्षुवर्योथ विभ्रमाणि निमा खिदा रक्षैनं बालकं शुभ्रं विसृज्य
हृदि संशयं॥ अनेन परमं श्रेयः प्राप्स्यसे न चिरादिह॥ एतावदुक्त्वा त्वरितो भि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुः कारुणिको ययौ॥ अथ तस्मिन्गते भिक्षौ विस्मयाविष्टमानिनी॥ तमर्भकं समादा
य निजमेव गृहं ययौ॥ भिक्षुवाक्येन विस्रब्धा सा राजतनयं सती॥ आत्मपुत्रेण सहितं
पयसा पर्यपोषयत्॥ एकचक्राह्वये रम्ये ग्रामे कृतनिकेतना॥ स्वपुत्रं राजपुत्रं च भि
क्षान्नेन व्यवर्धयत्॥ ब्राह्मणीतनयश्चैव स राजतनयस्तथा॥ ब्राह्मणैः कृतसंस्कारौ
ववृधाते सुपूजितौ॥ कृतोपनयनौ काले बालकौ नियमस्थितौ॥ भिक्षार्थं चेरतुस्तत्र
मात्रा सह दिने दिने॥ ताभ्यां कदाचिद्बालाभ्यां सा विप्रवनिता सह॥ भैक्ष्यं चरन्ती दै
वेन प्रविष्टा देवतालयं॥ तत्र वृन्दैः समाकीर्णं मुनिभिर्देवतालये॥ तौ दृष्ट्वा च बालकौ
श्रीमान् शाण्डिल्यो मुनिरब्रवीत्॥ अहो दैवबलं चित्रमहो कर्म दुरत्ययं॥ एष बालोऽन्य
३३ जननीं श्रितो भैक्ष्येण जीवति॥ इमामेव द्विजवधूं प्राप्य मातरमुत्तमां॥ सहैव द्विजपु ३३

त्रेण द्विजभावं समाश्रितः॥ इति श्रुत्वा मुनेर्वाक्यं शांडिल्यस्य द्विजांगना॥ सा प्रणं
म्य सभामध्ये पर्यपृच्छत्सविस्मया॥ ब्रह्मन्नेषोऽर्भको नीतो मया भिक्षोर्गिरा गृहं॥
अविज्ञातकुलो ह्यापि सुतवत्परिपोष्यते॥ कस्मिन्कुले प्रसूतोऽयं का माता जनकोऽस्य कः॥
सर्वं विज्ञातुमिच्छामि भवतो ज्ञानचक्षुषः॥ इति पृष्टो मुनिः सोऽथ ज्ञानदृष्टिर्द्विजस्त्रि
या॥ आचख्यौ तस्य बालस्य जन्मकर्म च पौर्विकं॥ विदर्भराजपुत्रत्वं तत्पितुः समरे मृ
तिं॥ तन्मातुर्नक्रग्रहणं साकल्येनान्ववेदयत्॥ अथ सा विस्मिता नारी पुनः पप्रच्छ
तं मुनिं॥ स राजा सकलान्भोगान्हित्वा युद्धे कथं मृतः॥ दारिद्र्यमस्य बालस्य क
थं प्राप्तं महामुने॥ दारिद्र्यं पुनरुद्धृत्य कथं राज्यमवाप्स्यति॥ अस्यापि मम पुत्रस्य भि
क्षान्नेनैव जीवतः॥ दारिद्र्यशमनोपायमुपदेष्टुं त्वमर्हसि॥ शांडिल्य उवाच॥ अ

स्य बालस्य पिता स विदर्भो महीपतिः ॥ पूर्वजन्मनि पांड्यो वै बभूव नृपसत्तमः ॥ स रा
जा सर्वधर्मज्ञः पालयन् सकलां महीं ॥ प्रदोषसमये राजैकदाचित्पूजयन्प्रभुं ॥ तस्य
पूजयतो भक्त्या देवं त्रिभुवनेश्वरं ॥ आसीत्कलकलारावः सर्वत्र नगरे महान् ॥ श्रु
त्वा तमुत्कटं रावं राजा संत्यक्तशिवार्चनः ॥ निर्ययौ राजभवनान्नगरक्षोभशंकया ॥
एतस्मिन्नेव समये तस्यामात्यो महाबलः ॥ गृहीत्वा शत्रुसामंतं राजांतिकमुपागम
त् ॥ अमात्येन समानीतं शत्रुसामंतमुद्धतं ॥ दृष्ट्वा क्रोधेन नृपतिः शिरश्छेदमका
रयत् ॥ स तथैव महीपालो विसृज्य शिवपूजनं ॥ असमाप्तनियमश्चकार निशि
भोजनं ॥ तत्सुतोपि तथा चक्रे प्रदोषसमये शिवं ॥ अनर्चयित्वा सो मूढो भुक्त्वा सुष्वा
३४ प सुमंदः ॥ जन्मांतरे स नृपतिर्विदर्भोसि नृपो महान् ॥ शिवार्चनांतरायेण परैर्भो ३४

गैर्नरे हतः ॥ तत्सुतो यः पूर्वभवे सोस्मिन् जन्मनि तत्सुतः ॥ भत्वा दारिद्र्यमाप
न्नः शिवपूजाव्यतिक्रमः ॥ अस्य माता तु पूर्वभवे सपत्नीं छद्मनाहनत् ॥ तेन पापेन
महता ग्राहेणास्मिन् भवे हता ॥ एषा प्रवृत्तिरेतेषां भूवसैसमुदाहृता ॥ अनर्चित
शिवा मर्त्याः प्राप्नुवंति दरिद्रतां ॥ सत्यं ब्रवीमि परलोकहितं ब्रवीमि सारं ब्रवीम्यु
पनिषद्धृदयं ब्रवीमि ॥ संसारमुल्बणमसारमवाप्य जंतोः सारोयमीश्वरपदां
बुरुहस्य सेवा ॥ ये नार्चयंति गिरिशं समये प्रदोषे ये नार्चितं शिवमपि प्रणमंति
चान्ये ॥ एतत्कथां श्रुतिपुटैर्न पिबंति मूढास्ते जन्मजन्मसु भवंति नरा दरिद्राः ॥
ये वै प्रदोषसमये परमेश्वरस्य कुर्वंत्यनन्यमनसोंघ्रिसरोजपूजां ॥ नित्यं प्रवृ
द्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्त इहैव लोके ॥ कैलासशैलभुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ने त्रिजगज्जनित्रीं गौरीं ॥ निवेश्य कनकाचितरत्नपीठे ॥ नृत्यं विधातुमभिवां
छति शूलपाणौ देवाः प्रदोषसमयेनुभजंति सर्वे ॥ वाग्देवी धृतवल्लकी शत
मखो वेणुं दधत्पद्मजस्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ॥ विष्णुः
सांद्रमृदंगवादनपटुर्देवाः समंतात्स्थिताः ॥ सेवंते तमनु प्रदोषसमये देवं मृ
डानीपतिं ॥ गंधर्वयक्षपतगोरगसिद्धसाध्यविद्याधरामरवराप्सरसां गणा
श्च ॥ येन्ये त्रिलोकनिलयाः सहभूतवर्गाः ॥ प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥
अतः प्रदोषे शिव एक एव पूज्योथ नान्ये हरिपद्मजाद्याः ॥ तस्मिन्महेशे विधि
नेज्यमाने सर्वे प्रसीदंति सुराधिनाथाः ॥ एष ते तनयः पूर्वजन्मनि ब्राह्मणो
३५ त्तमः ॥ प्रतिग्रहैर्वयो नित्यं येन दानाद्यैः सुकर्मभिः ॥ अतो दारिद्र्यमापन्नः पुत्र ३५

स्ते द्विजभामिनी ॥ तद्दोषपरिहारार्थं शरणं यातु शंकरं ॥ ॥ इति श्रीस्कंदपु
राणे ब्रह्मोत्तरखंडे प्रदोषमहिमानुवर्णनं नाम षष्ठोध्यायः ॥ ॥ सूत उवाच ॥
इत्युक्ता मुनिना साध्वी सा विप्रवनिता पुनः ॥ तं प्रणम्याथ पप्रच्छ शिवपूजाविधेः
क्रमं ॥ शांडिल्य उवाच ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ॥ घटित्रयादस्त
मयात्पूर्वं स्नानं समाचरेत् ॥ शुक्लांबरधरो भूत्वा वाग्यतो नियमान्वितः ॥ कृतसं
ध्याजपविधिः शिवपूजां समारभेत् ॥ देवस्य पुरतः सम्यगुपलिप्य नवांभसा ॥
विधाय मंडपं रम्यं धौतवस्त्रादिभिः शुभैः ॥ वितानाद्यैरलंकृत्य फलपुष्पनवांकु
रैः ॥ विचित्रपद्ममुद्धृत्य वर्णपंचकसंयुतं ॥ तत्रोपविश्य सुशुभे सूपविष्टः स्थि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रासने॥ संभ्यस्य प्रदिना शोषरजोपकरणः शुचिः॥ आगमोक्तेन मंत्रेण पीठमा
मंत्रयेत्सुधीः॥ ततः कृत्वा त्वशुद्धिं च भूतशुद्ध्यादिकं क्रमात्॥ प्राणायामत्रयं
कृत्वा कुर्याद्बीजवर्णैः सबिंदुकैः॥ मातृकान्यस्य विधिवद्ध्यात्वा तां देवतां परां॥
समाप्य मातृकां भूयो ध्यात्वा चैव परं शिवं॥ वामभागे गुरुं नत्वा दक्षिणे गणपं ज
येत्॥ अंसोरुयुग्मे धर्मादीन् न्यसेन्नाभौ च पार्श्वयोः॥ अधर्मादीननंतादीन्
हृदि पीठमनुं न्यसेत्॥ आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात्॥ उक्तक्र
मेण विन्यस्य हृत्पद्मे साधुभाविते॥ नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिं॥
२६ चंद्रकोटिप्रतीकाशं त्रिनेत्रं चंद्रभूषणं॥ आपिंगलजटाजूटं रत्नमौलिविरा २६

तं॥ नीलग्रीवमुदारांगं नागाहारोपशोभितं॥ वरदाभयहस्तं च हरिणं च पर
श्वधं॥ दधानं नागवलयकेयूरांगमुद्रिकं॥ व्याघ्रचर्मपरीधानं रत्नसिंहासने
स्थितं॥ ध्यात्वा तद्वामभागे च चिंतयेद्गिरिकन्यकां॥ भास्वज्जपाप्रसूनाभामु
दयार्कसमप्रभां॥ विद्युत्पुंजनिभां तन्वीं मनोनयननंदिनीं॥ बालेंदुशेखरां स्निग्धां
नीलकुंचितकुंतलां॥ भृंगसंघातरुचिरनीलालकविराजितां॥ मणिकुंडलवि
द्योतन्मुखमंडलविभ्रमां॥ नवकुंकुमपंकांककपोलमलदर्पणां॥ मंदस्मित
विभ्राजदरुणाधरपल्लवां॥ कंबुकंठीं शिवां तुंगकुचकुंभलां॥ पाशांकुशाभ
याभीष्टविलसंती चतुर्भुजां॥ अनेकरत्नविलसत्कंकणांगदमुद्रिकां॥ वलि
त्रयेण विलसद्धेमकांचीगुणान्वितां॥ रक्तमाल्यांबरधरां दिव्यचंदनचर्चितां॥ दिक्पाल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वानिता मौलि सन्नताङ्घ्रिसरोरुहां ॥ रत्नसिंहासनारूढां सर्वराजपरिष्कृतां ॥ एवं
ध्यात्वा महादेवं देवीं चगिरिकन्यकां ॥ न्यासक्रमेण देवं गन्धादिभिः क्रमात् ॥ पं
चभिर्ब्रह्मभिः कुर्यात् श्रीकण्ठस्थानेषु वा हृदि ॥ एवमस्तुष्यांजलिं देहे मूलेन च हृदि
स्पं त्रिशः ॥ पुनः शिवो भूत्वा मूलमन्त्रेण साधकः ॥ ततः संपूजयेद्देवं बाह्यपीठे पुनः क्र
मात् ॥ संकल्पं प्रवदेत्तत्र पूजारंभसमाहितः ॥ कृतांजलिपुटो भूत्वा चिंतयेद्धृदि
शंकरं ॥ ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ॥ अशेषाघविनाशाय प्र
सीद मम शंकर ॥ दुःखशोकाग्निसंतप्तं संसारभयपीडितं ॥ बहुरोगाकुलं दीनं
त्राहि मां वृषवाहन ॥ आगच्छ देवदेवेश महादेवाभयंकर ॥ गृहाण सहपार्षसा
२८ नवपूजां मया कृतां ॥ इति संकल्प्य विधिवत् बाह्यपूजां समारभेत् ॥ गुरुं गण २८

पतिं चैव यजेत्सव्यापसव्ययोः ॥ नैर्ऋते रामीशाकोणे तु यजेत्क्षेत्रपतिं क्रमात् ॥
वागदेवीं च यजेत्तत्र ततः कात्यायनीं यजेत् ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमो
नकैः ॥ स्वरैरीशादिकोणेषु पीठपादान् तु क्रमात् ॥ आभ्यां बिंदुविसर्गाभ्याम
धर्मादीन्पूजयेत् ॥ गात्ररूपांश्चतुर्दिक्षु मध्ये सतारकं ॥ सत्त्वादित्रिगुणां
स्तांतु रूपान्पीठे तु विन्यसेत् ॥ अथ ऊर्ध्वच्छदे पद्मे मायात्त्वस्योर्ध्वे शिवेन च ॥ तदंते
चात्तु जंभयः सकलं मंडलत्रयं ॥ पत्रकेसरकिंजल्क्यान्तं तत्त्वासनैः क्रमात् ॥
पद्मत्रयमथामैश्वर्यमध्ये मंडलमादरात् ॥ वामां ज्येष्ठां च रौद्रीं च भर्गोर्ध्वे हृदि सं
पूजयेत् ॥ वामाद्या नव शक्तीश्च नवपुष्करकुलमा यजेत् ॥ हृदि बीजत्रयाद्येन पीठ
मंत्रेणार्चयेत् ॥ आवृत्तिः प्रथमांगैस्तु पंचभिर्मैत्र्यादिभिः ॥ त्रिशक्तिभिर्मूर्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिश्चान्यैर्निधिदयसमन्वितैः॥ अनंताद्यैः पराद्यास्यामूर्त्तिभिश्चवृषादिभिः॥
सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च नदायुधैः॥ वृषभः सेनचंडेरादुगौश्च स्कंद
नंदिनौ॥ गणेशः सेन्यैपश्चैव स्वस्वस्थलसंज्ञलक्षिताः॥ अणिमा महिमाचैव ग
रिमा लघिमा तथा॥ ईशित्वंच वशित्वंच प्राप्तिः प्राकाम्यमेवच॥ अष्टैश्वर्याणि
वौक्तानि तेजोरूपाणि केवलं॥ पंचभिर्भूतिभिः पूर्वैः हस्तैस्त्वाद्यादिभिः क्रमात्॥
अंगेरमाद्यैरिंद्राद्यैः पूर्वोक्तानुनिभिस्ततैः॥ उमाचंडेश्वरादीश्च पूजयेदुत्तरा
दितः॥ एवमावरणेर्युक्तं तेजोरूपं सदाशिवं॥ उमया सहितं देवमुपचारैः प्र
३८ पूजयेत्॥ सुप्रतिष्ठितशंखस्य तीर्थैः पंचामृतेरपि॥ अभिषिंच्य महादेवं रुद्रसू
क्तैः समाहितः॥ कल्पयेद्देहिके मंत्रैरासनाद्युपचारकान्॥ आसने कल्पयेद्देमे ३८

दिव्यवस्त्रसमन्वितं॥ अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेनच॥ तेनैवाचमनं द
द्यान्मधुपर्कमथत्तरं॥ पुनराचमनं दत्वा स्नानं मंत्रैः प्रकल्पयेत्॥ उपवीतं त
था वासो भूषणानि निवेदयेत्॥ गंधमष्टांगसंयुक्तं सुपूतं विनिवेदयेत्॥ तत
श्चाबिल्वमंदारकह्लारसरसीरुहः॥ धत्तूरकं कर्णिकारं द्रोणपुष्पंच मल्लिका॥
कुशापामार्गतुलसीमाधवीचंपकादिकाः॥ बृहतीकरवीराणि यथालब्धा
नि साधयेत्॥ निवेदयेत्सुगंधीनि माल्यानि विविधानिच॥ धूपं कालागरू
त्थं दीपंच विमलं शुभं॥ अथ पायसनैवेद्यं सघृतं सोपदंशकं॥ मोदकापूपसं
युक्तं शर्करागुडसंयुतं॥ मधुनाक्तं दधियुतं जलपानसमन्वितं॥ तेनैव हविषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वन्हौ जुहुयान्मंत्रभाविते॥ आगमोक्तेन विधिना गुरुणा संनियंत्रितः॥ नैवे
द्यं संभवे भक्ष्यं दद्यात् तांबूलमुत्तमं॥ धूपं निराजनं रम्यं छत्रं दर्पणमुत्तमं॥ स
मर्पयित्वा विधिवन्मंत्रैर्वैदिकतांत्रिकैः॥ यथाशक्ति स्वयं नित्यं यथाविभवम
र्चयेत्॥ भक्त्या दत्तेन गौरीशः पुष्पमात्रेण तुष्यति॥ अथांगभूतान् सकलान्
गणेशादीन् प्रपूजयेत्॥ स्तवैर्नानाविधैः स्तुत्वा साष्टांगं प्रणमेद् बुधः॥ ततः प्र
दक्षिणीकृत्य सव्यं च चंडेश्वरादिकान्॥ पूजां समर्प्य विधिवत् प्रार्थयेत् गिरिजा
पतिं॥ जय देव जगन्नाथ जय शंकर शाश्वत॥ जय सर्वसुराध्यक्ष जय सर्व
३९ सुरार्चित॥ जय सर्वगुणातीत जय सर्ववरप्रद॥ जय नित्य निराधार जय विश्वंभराव्यय ३९

जय विश्वैकवंद्येश जय नागेंद्रभूषण॥ जय गौरीपते शंभो जय चंद्रार्धशेखर॥
जय कोट्यर्कसंकाश जयानंदगुणालय॥ जय रुद्र विरूपाक्ष जय नित्य निरंज
न॥ जय नाथ कृपासिंधो जय भक्तार्तिभंजन॥ जय दुस्तार संसार सागरोत्ता
रण प्रभो॥ प्रसीद मे महादेव संसारार्तस्य खिद्यतः॥ सर्वपापक्षयं कृत्वा रक्ष मां
परमेश्वर॥ महादारिद्र्यमग्नस्य महापापहतस्य च॥ महाशोकनिविष्टस्य
महारोगातुरस्य च॥ ऋणभारपरीतस्य दह्यमानस्य कर्मभिः॥ ग्रहैः प्रपीड्य
मानस्य प्रसीद मम शंकर॥ दरिद्रः प्रार्थयेद् देवं पूजांते गिरिजापतिं॥ अर्था
ढ्यो वापि राजा वा प्रार्थयेद् देवमीश्वरं॥ दीर्घमायुः सदारोग्यं कोशवृद्धिर्बलोन्न
तिः॥ ममास्तु नित्यमानंदः प्रसादात्तव शंकर॥ शत्रवः संक्षयं यांतु प्रसीदंतु मम प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाः॥ नश्येत्तु दस्युचौराद्यैः जनाः संतु निरापदः॥ दुर्भिक्षमारीसंताधाः शामं यांतु म
हीतले॥ सर्वसस्यसमृद्धिश्च भूयात्सुखमयादिशः॥ एवमाराधयेद्देवं प्रदोषे गि
रिजापतिं॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिः प्रपूजयेत्॥ सर्वपापहरयकरी
सर्वदारिद्र्यनाशिनी॥ शिवपूजेयमाख्याता सर्वाभीष्टफलप्रदा॥ महापातक
संघानमधिकं चोपपातकं॥ शिवद्रव्यापहरणात्सर्वमप्याशु नाशयेत्॥ ब्रह्म
हत्यादिपापानां पुराणेषु स्मृतिष्वपि॥ प्रायश्चित्तानि दृष्टानि न शिवद्रव्यहारि
णां॥ बहुनात्र किमुक्तेन श्लोकार्द्धेन ब्रवीम्यहं॥ ब्रह्महत्याशतं चापि शिवपूजा
४० विनाशयेत्॥ मया कथितमेतत्ते प्रदोषे शिवपूजनं॥ रहस्यं सर्वजंतूनामचनास्ये ४०

वसंशयः॥ एनाभ्यामपि पुत्राभ्यामेवं पूजा विधीयतां॥ अतः संवत्सरादेव परं
सिद्धिमवाप्स्यथ॥ इति शांडिल्यवचनमाकर्ण्य द्विजभामिनी॥ ताभ्यां तु सह बाला
भ्यां प्रणनाम मुनेः पदं॥ विप्रस्त्री उवाच॥ अहमद्य कृतार्थास्मि तव दर्शनमात्र
तः॥ एतौ कुमारौ भगवंस्त्वामेव शरणं गतौ॥ एष मे तनयो ब्रह्मन् शुचिव्रत इती
रितः॥ एष राजसुतो नाम्ना धर्मगुप्तः कृतो मया॥ एतावहं च भगवन्भवच्चर
णकिंकराः॥ समुद्धरास्मिन्पतितान्घोरे दारिद्र्यसागरे॥ इति प्रपन्नां शरणं द्वि
जांगनां मारक्षास्पवाभ्येरम्यतोपमानैः॥ उपादिदेशाथ पलयोः कुमारयोर्मुनिः शि
वाधनमंत्रविद्यां॥ अथोपदिष्टौ मुनिना कुमारौ ब्राह्मणी च सा॥ तं प्रणम्य समाम
न्य जग्मतुस्ते शिवमंदिरात्॥ ततः प्रभृति तौ बालौ मुनिवर्योपदेशतः॥ प्रदोषप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्नीत्रास्य पूजां चक्रतुरंजसा ॥ एवं प्रजयतोर्देवं द्विजराजकुमारयोः ॥ सुखेनैव व्यती
तौ यत्नयोर्मासचतुष्टयं ॥ कदाचिद्राजपुत्रेण विनासौ द्विजनंदनः ॥ स्नातुं गतो नदी
नीरे च गालनकुलोलया ॥ तत्र निःसरनिधीनतिर्जिन्ने प्रकुद्दिमे ॥ निधानकुरं
स्फुरले प्रस्फुरं तं ददर्शोह ॥ तद्दृष्ट्वा सहसा गत्सहर्षकौतुकविह्वलः ॥ देवीपपूज्यं म
न्यानो गृहीत्वा शिरसादधौ ॥ ससंभ्रमं समानीय निधानकलशं बलात् ॥ निधाय
भवनस्यांतर्मौलरं समभाषत ॥ मानर्मौ तरिदं परस्य प्रसादं गिरिजापतेः ॥ निधा
नकुंभरूपेण दर्शितं करुणात्मना ॥ अथ सा विस्मिता साध्वी समाह यत्नपात्मजं ॥
स्वपुत्रं प्रति [illegible] यत्नीं शिश्रीचेन ॥ श्रृणु तां मे वचः पुत्रो निधानकलमिद्रोमं ॥
४१ समं विभज्य गृह्णीतां मम राजसूनगौरवात् ॥ इति मातुर्वचः श्रुत्वा तु नोपद्विजनंदनः ॥ ४२

प्रत्याह राजपुत्रस्यां विस्रब्धः शंकराचैन ॥ मातस्तस्य वस्तुनस्येव वस्तु रूतेन समागते ॥ ना
हं ग्रहीतुमिच्छामि विभज्य धनसंचयं ॥ आत्मनः सुकृतालब्धं स्वयमेव भुनक्त्वसौ ॥
सर्वभगवानीशः करिष्यति रूपां मयि ॥ एवमन्योन्यतोः संभुंभयोपि परयामुदा ॥
संवत्सरो व्यतीतायतस्मिन् नेवग्रहे तयोः ॥ अथैकदा राजसूनुः सहतेन द्विजन्मना ॥ व
सतसमये प्राप्ते विजहार वनांतरे ॥ अथ दूरं गतौ कापि वनेद्विजनृपात्मजौ ॥ गंध
र्वकन्याः क्रीडंतीः शतंशः समपश्यतां ॥ ताः सर्वा दृष्ट्वा दूरस्थो विप्रो विहरंत्यो मनोहरं
दक्षा द्विजात्मजो दूरादुवाच नृपनंदनं ॥ इतः परं न गंतव्यं विहरंत्यत्र योषितः ॥ स्त्री
सन्निधानं हि बुधास्त्यजंति विमलाशयाः ॥ एताः कैतवकारिण्यो घनमयो वनं तु मे ह्रा ॥
मोहयंती मनं दक्षा वीघातुनयकोविदाः ॥ अतः परिसज्जे [illegible] सान्निध्यं सह भाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णं॥ निजधर्मरतो दिवा ब्रह्मचारी विशेषतः॥ अतोहं नोत्सहे गंतुं क्रीडास्थानं
मृगीदृशां॥ इत्युक्त्वा द्विजपुत्रस्तु निरस्तो दूरतः स्थितः॥ अथासौ राजपुत्रस्तु
कौतुकाविष्टमानसः॥ नासांविलासपदवीमेकस्थामभ्ययोययौ॥ तत्र गंधर्वकंन्या
ग नांमध्ये लेकावरां नैना॥ दृष्ट्वाथानेन राजपुत्रोश्चिंभयामास चेतसा॥ अहो कोयमनु
त्तरो गोपुवासर्वांगसुंदरः॥ मनमानंगगमनोलावण्यामृतवारिधिः॥ लीलालो
लविशालाक्षो मधुरस्मितपेशलः॥ मदनोपमरूपश्रीः सुकुमारांगलक्षणः॥ इ
त्याश्चर्यं तु तासां ता दूराद्दृष्ट्वा नृपात्मजं॥ सवीस्वसखीः समालोक्य वचनं चेदमब्रवी
४२ त्॥ इतो विदूरे हे सख्यो वनमस्ति वसंतमं॥ विचित्रचंपकाशोककपुन्नागबकुलैर्युतं॥ ४२

लवंगलादुंतसर्वैसंचीयकुसुमोत्करं॥ भवंत्यस्तु नरायांतु तावत्तिष्ठाम्यहं स्विहा॥ इत्या
दिष्टः सखीवर्गो जगाम विपिनांतरं॥ सापि गंधर्वजा तस्यौन्यस्तदृष्टिर्धारल
जे॥ तां समालोक्य लज्जंगीर्वनैयौवनशालिनीं॥ बालां स्वरूपसंपत्या परिभूतत्रि
लो लोत्तमां॥ राजपुत्रः समागम्य कौतुकोत्फुल्ललोचनः॥ अवाप देवयोगेन मदनस्यच्छा
रुपथां॥ गंधर्वतनया सापि श्रीमायस्थपेसनवे॥ उत्थाय नरसा नस्मेभदहीपल्लुवा
सनं॥ कृतोपचारमासीनं नमासा सुमध्यमा॥ पप्रच्छ लज्जुपगुणेर्ध्वेस्तधैर्योकुलेंद्रि
या॥ कस्त्वं कमलपत्राक्ष कस्माद्देशादिहागतः॥ कस्य पुत्रः इति प्रेम्णापृष्टः सर्वमन्व
वेदयेदं तु॥ विदर्भराजतनयं विध्यस्तपितृमातृकं॥ राजपुत्रमहं तस्यान माता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेपरराष्ट्रगं॥सर्वेमावेघभयस्तांपश्यन्त्यपनंदनः॥कालेनमोरूढिंयात्रकार्ये
तेकस्यचात्मजा॥किमिवध्यायसिहहार्किंयात्कुमिहेतुसि॥इत्युक्तासापुनःप्राह
शृणुराजेंद्रसत्तम॥आस्तेकोऽद्रविकोनामगंधर्वाणांकुलाग्रणीः॥तस्याहमस्मि
तनयानाम्नाचांशुमतीस्मृता॥तामायांतेविलोक्याहंवत्सभाषणलालसा॥
सत्कोसखीजनंसर्वमेकैवास्मिमहामते॥सर्वसंगीतविद्यासुनमत्तोन्यास्ति
कांचन॥ममगेयेनतुष्यंतिसर्वाअपिसुरस्त्रियः॥साहंसर्वकलाभिज्ञाशांतुसर्वे
जनैर्गिता॥तथाहमीस्सितंवेद्मिमयितेसंगतंमनः॥तथाममापिनौसख्यंदैवेन
४२ प्रतिपादितं॥आवयोःस्नेहभेदोत्रनाभिभयादितःपरं॥इतिसंभाष्यतेनांशुप्रे ४३

म्यागंधर्वनंदिनी॥मुक्ताहारंददौतुस्मैस्वकुचांतरभूषणं॥तमादायकुतेहारं
सतस्याःप्रणयाकुलः॥गाढहर्षपरास्कामिदमाहत्यपात्मजः॥सत्यमुक्तंत्वयाभी
रुतथाप्येकंवदाम्यहं॥त्वत्करान्यस्यानिस्वस्यकथंमेभवतिप्रियो॥सालंपित्व
मनीवालाविलंघ्यपितृशासनं॥स्वधंताकर्तुमरुद्वेवंकथमर्हसि॥इतितस्यवचः
श्रुत्वातंप्रयाहस्मुचिस्मिता॥अस्तुनामतथेवाहंकरिष्येपरस्यकौतुकं॥गच्छस्व
भवनंकोतपरस्वःप्रातरेवतु॥आगच्छपुनरत्रैवकार्यमस्तिचनोम्यथा॥इत्यु
क्तोलंध्यपत्तुमंसासंगतसखीजना॥अपाक्रमतचार्वंगीसचापित्यपनंदनः॥म
नमभ्येत्यहर्षेणद्विजपुत्रस्यसंनिधिं॥सर्वमाख्यायतेनैवसार्द्धंस्वभवनंययौ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सां च विप्रसन्नीभूयो हर्षयित्वा त्वपात्मजः॥ परश्चो द्विजपुत्रेण सार्द्धं नन्दनवने ययौ॥
तनया पूर्वनिर्दिष्टसख्यानं प्राप्य स्वपात्मजः॥ गंधर्वराजदासीत्स्वदुहित्रा सम
न्वितं॥ स गंधर्वपतिः श्रीमान्वभिनेष्टकुमारको॥ उपवेश्यासने रम्ये राजपुत्र
मभाषत॥ ॥गंधर्व उवाच॥ ॥राजेंद्रपुत्र पूर्वं घुःकेऽसं गतवानहं॥ तत्राप
श्यं महादेवं पार्वत्यासहितं विभुं॥ आरुह्य मां सदरेराः सर्वेषां त्रिदिवौकसां॥
संनिधौ वाहमभवात्करुणाम्बुनवारिधिः॥ धर्मगुप्ताह्वयः कश्चिद्राजपुत्रोऽस्ति
भूतले॥ अकिंचनो भ्रष्टराज्यो हतबंधुश्च शत्रुभिः॥ स बालो गुरुवाक्येन मद
४४ चीयां रतः सदा॥ अघनस्तितरुः सर्वैर्मां श्रीभावतः॥ नम्वयस्य मपि साहा ४४

य्यं कुरु गंधर्वसत्तम॥ यथासौ निजराज्यस्थो हतशत्रुर्भविष्यति॥ इत्याज्ञप्तो हमी
शेन संप्राप्य निजमंदिरं॥ अनया मद्दुहित्रा च बहुशोऽभ्यर्थितस्तथा॥ ज्ञात्वेदं सक
लं शंभोर्नियोगकरणात्मनः॥ आदायेमां दुहितरं प्राप्तोस्मादंचनांतरं॥ अत्रएवां
न पश्चाभिकन्यामंशुमतीनव॥ हतो राज्ञ नु स्वराज्ञे स्थापया॥ मिशिवात्सया॥
नस्मिं तु रेत्वमनया भुक्ष्व भोगान्यथोचितान्॥ दशवर्षसहस्रांते गंतासि गिरिशालयं॥
तत्रापि मम कन्येयं त्वामेव प्रतिपत्स्यते॥ अनेनैव स्वदेहेन दिव्येन शिवसंनिधौ॥ इति
गंधर्वराजस्तु मां भाष्य स्वपनंदने॥ तस्मिन्वने स्वदुहितुः पाणिग्राहमकारयत्॥ पारि
बर्हं मददात्तस्मै रत्नभारान्महोज्वलान्॥ रूअमणिं चंद्रनिभं मुक्ताहारांश्च भास्वरान्॥
दिव्यालंकारणसोसिकान्यंस्वरपरिच्छदान्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गजानामयुतं भूयो नियुतं नीलवाजिनां॥ स्यंदनानां सहस्राणि रेणीवासेव्यकी
यकौ॥ अभेद्यं सौवर्णानि महांति च॥ पुनरेकं रथं दिव्यं धनुश्च कार्मुकोपमं॥ अ
न्नास्त्राणां सहस्राणि तूणी चाक्षय्यसायकौ॥ अभेद्यं वर्म सौवर्णं शक्तिं च रिपुमर्द्दि
नी॥ दुहितुः परिचर्य्यार्थं दासीनां च सहस्रकं॥ ददौ प्रीतमना सम्यग्धनानि विवि
धानि च॥ गंधर्वसैन्यमखिलं चतुरंगसमन्वितं॥ पुनश्च तत्सहायार्थं गंधर्वाधि
पतिर्ददौ॥ इत्थं राजेंद्रतनयः संप्राप्य श्रियमुत्तमां॥ अभीष्टजायासहितो मुमुदे
निजसंपदा॥ कारयित्वा स्वदुहितुर्विवाहं समयोचितं॥ ययौ विमानमारुह्य गंधर्वा
धिपतिर्दिवं॥ धर्मगुप्तः कृतोद्वाहः सह गंधर्वसेनया॥ पुनः स्वनगरीं प्राप्य जघान
४५ रिपुवाहिनीं॥ दुर्मर्षणं रणे हत्वा राज्यं गंधर्वसेनया॥ निःशेषितारातिबलः प्रवि ४५

वेशा निजं पुरं॥ ततोभिषिक्तः सचिवैर्ब्राह्मणैश्च महोत्तमैः॥ रत्नसिंहासनारूढश्च
क्रे राज्यमकंटकं॥ या विप्रवनिता पूर्वं तमपुष्णात्स्वपुत्रवत्॥ सैव माता भवत्तस्य
सम्याता द्विजनंदनः॥ गंधर्वतनया जाया विदर्भविषयेश्वरः॥ आराध्य देवं गि
रीशं धर्मगुप्तोऽन्वपोभवत्॥ एवमन्यसमाध्य प्रदोषे गिरिजापतिं॥ लभंते भीप्सिता
न्कामान्देहांते तु परां गतिं॥ ॥सूत उवाच॥ ॥एतन्महाव्रतं पुण्यं प्रदोषे शंक
रार्च्चनं॥ धर्मार्थकाममोक्षाणां येदेतत्साधनं परं॥ यएतच्छृणुयात्पुण्यमाख्यानं
परमाद्भुतं॥ प्रदोषे शिवपूजांते कथयेद्वा समाहितः॥ भवेन्न तस्य दारिद्र्यं जन्मांत
रशतैरपि॥ सौभैश्वर्यसमायुक्तः सोंते शिवपुरं व्रजेत्॥ ये प्राप्य दुर्लभमिदं मनुजा
शरीरं कुर्वंति हंत परमेश्वरपादपूजां॥ धन्यास्त एव निजपुण्यजितत्रिलोकास्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वांपपंकजरसौजोशकुवनं पुनाति ॥ ॥इतिश्रीस्कंदपुराणे ब्रह्मोत्तरखंडे प्रदो
षपूजामहिमानुवर्णनं नाम सप्तमोऽध्यायः ॥ ॥सूत उवाच ॥ ॥नित्यानंदमयं
शांतं निर्विकल्पं निरामयं ॥ शिवतत्वमनाद्यंतं ये विदुस्ते परं गताः ॥ विरक्ताः का
मभोगेभ्यो ये च कुर्वंत्यहेतुकीं ॥ भक्तिं परां शिवे धीरास्तेषां मुक्तिर्न संशयः ॥ विषया
नभिसंधाय ये कुर्वंति शिवे रतिं ॥ विषयैर्नाभिभूयंते भुंजानास्तत्फलान्यपि ॥
येन केनापि भावेन शिवभक्तियुतो नरः ॥ न विनश्यति यात्येव कालेनापि परां गतिं ॥
आरुरुक्षुः परं स्थानं विषयांस्त्यक्तुमक्षमः ॥ पूजयेत्कर्मणा शंभुं भोगांते शिव
४६ माप्नुयात् ॥ अशक्यः कश्चिदुत्स्रष्टुं प्रायो विषयवासनां ॥ अतः कर्ममयी पूजा ४६

कामधेनुः शरीरिणां ॥ मायामयेपि संसारे येपि हत्याचिरं सुखं ॥ मुक्तिमिच्छंति
देहांते तेषां धर्मोयमीरितः ॥ शिवपूजा सदा लोके हेतुः स्वर्गापवर्गयोः ॥ सोमवारे
विशेषेण प्रदोषादिगुणान्विते ॥ केवलेनापि ये कुर्युः सोमवारे शिवार्चनं ॥ न ते
षां विद्यते किंचिदिहामुत्र च दुर्लभं ॥ उपोषितः शुचिर्भूत्वा सोमवारे जितेंद्रि
यः ॥ वैदिकैर्लौकिकैर्वापि विधिवत्पूजयेच्छिवं ॥ ब्रह्मचारी गृहस्थो वा कन्या वा
पि सभर्तृका ॥ विभर्तृका वा संपूज्य लभते वरमीप्सितं ॥ अत्रापि कथयिष्यामि क
थां श्रोतुर्मनोहरां ॥ श्रुत्वा मुक्तिं प्रयांत्येव भक्तिर्भवति शांभवी ॥ आर्यावर्ते नृपः
कश्चिदासीद्धर्मभृतां वरः ॥ चित्रवर्मेति विख्यातो धर्मराजोद्धतात्मनां ॥ स गोप्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मसेतूनां शास्त्रानुपथगामिनी॥ यथा समस्तयज्ञानां ज्ञाता शरणमिच्छतां॥
कर्तासकलपुण्यानां दातासकलसंपदां॥ जेतासपत्नवृंदानां भर्तुः शिवमुकुं
द्योः॥ सोनुकूलासुपत्नी पुलब्ध्यानुज्ञा महोजसः॥ चिरेण प्रार्थितां लेभे कन्या
मेकां वराननां॥ स लब्ध्वा नयनाह्लादिन्या हिमवानिव पार्वतीं॥ आत्मानं देवसदृशं
मेने परिपूर्णमनोरथं॥ स एकदा जातकलक्षणज्ञानारूपसवीन् द्विजपुंगवानुपस्था
प्य॥ कृतहस्ते नाभिनिविष्टचेताः प्रपच्छ कन्या जननेफलानि॥ अथ तत्र प्रवी
देकोबहुश्रो द्विजसत्तमः॥ एषा सीमंतिनी नाम्ना कन्या तव महीपते॥ उमेव मांग
ल्यवती दमयंतीव रूपिणी॥ भारतीव कलाभिज्ञा लक्ष्मीरिव महागुणा॥ सुप्र
४८ जा देवमातेव जानकीव धृतव्रता॥ रविप्रभेव सत्कांतिश्चंद्रिकेव मनोरमा॥ दश ४८

वर्षसहस्राणि सह भर्त्रा प्रमोदते॥ प्रसूय तनयानष्टौ परं सुखमवाप्स्यति॥ इत्युक्ते
वैते नृपतिर्धनैः संप्रपूज्य तं द्विजं॥ अवाप परमां प्रीतिं तद्वागमृतसेवया॥ अथान्यो
पि द्विजः प्राह धैर्यवान् विशंकितः॥ एषा चतुर्दशे वर्षे वैधव्यं प्रतिपत्स्यते॥ इत्या
कर्ण्य वचस्तस्य वज्रनिर्घोतनिष्ठुरं॥ मुहूर्तमभवद्राजा चिंताव्याकुलमानसः॥
अथ सर्वान् संतुष्ट्य ब्राह्मणान् भक्तवत्सलः॥ सर्वं दैवकृतं मत्वा निश्चिंतः
पार्थिवोभवत्॥ सापि सीमंतिनी बाला क्रमेण गतशैशवा॥ वैधव्यमात्मनो भा
विश्रुत्वात्मसखीमुखात्॥ परं निर्वेदमापन्ना चिंतयामास बालिका॥ याज्ञ
वल्क्यमुनेः पत्नीं मैत्रेयीं पर्यपृच्छत॥ मातस्त्वच्चरणांभोजं प्रपन्नास्मि भयाकुला॥
सौभाग्यवर्द्धनं कर्म मम शंसितुमर्हसि॥ इति प्रपन्नां नृपतेः कन्यां प्राह मुनेः सती॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री॰ स्कं॰ ७

रारणे ध्वजनन्वं गीपार्थैली शिवसंस्तुतां ॥ सोमवारे शिवं गौरीं पूजयन्त्यः समाहिता ॥
उपोषिता या सुस्नाता विरजांबरधारिणी ॥ यतवाङ्निश्चलमतिः पूजां कृत्वा यथो
चितां ॥ ब्राह्मणान्भोजयित्वाथ शिवं सम्यक्प्रसादय ॥ पापक्षयोभिषेकेण सा
म्राज्यं पीठपूजनात् ॥ सौभाग्यमखिलं सौख्यं गंधमाल्याक्षतार्पणात् ॥ धूपद
नेन सौगंध्यं कांतिर्दीपप्रदानतः ॥ नैवेद्येन महाभोगो लक्ष्मीस्तांबूलदानतः ॥
धर्मोर्थकामभूकाममोक्षाश्च नमस्कारप्रसादतः ॥ अष्टैश्वर्यादिसिद्धीनां जप एव
हि कारणं ॥ होमेन सर्वकामानां समृद्धिरुपजायते ॥ सर्वेषामेव देवानां तुष्टिः
४८ संयमिभोजनात् ॥ इत्थमाराधयन्शिवं सोमवारे स्त्रीणामपि ॥ असावदमपिप्रा ४८

रा॰ प्ता विस्तीर्णैर्विभवाभवा ॥ यौद्धीरमपत्यापि महाकेंभयानकं ॥ शिवपूजाप्रभावे
ण लब्धिश्चास्मिन्महद्भयं ॥ इत्थं सीमंतिनी सम्यगनुशास्य तु नःसती ॥ ययौ सापि वरारो
हा राजपुत्री तथाकरोत् ॥ दमयंत्यां नलस्यासीदिंद्रसेनाह्वयः सुतः ॥ तस्य चंद्रांग
दो नाम पुत्रोभूच्चंद्रसंनिभः ॥ चित्रवर्मा न्रपश्रेष्ठस्तस्माहयन्रपात्मजं ॥ कन्यां
सीमंतिनीं तस्मै प्रायच्छत्तु गुरुवेनुसंया ॥ सोभून्महोत्सवस्तत्र तस्याउद्वाहकर्मणि
यत्र सर्वे महीशानां समवायो महानभूत् ॥ तस्याः पाणिग्रहं कालेकृत्या चंद्रांग
दःकृती ॥ उवास कतिचिन्मासांस्तत्रैव श्वशुरालये ॥ एकदा यमुनां तर्तुं स राज
ननयो बली ॥ आरुरोह तरिं कैश्चिद्वयस्यैः सहलीलया ॥ तस्मिंस्तरति कालिंदी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजपुत्रो विधेर्बलात्॥ ममज्ज सहकेनैव नैरावर्त्तोऽभिहता तरी॥ हा हेति शब्दः सुम
हानासीत्तस्यास्तटद्वये॥ पश्यतां सर्वसैन्यानां प्रलापो दिवमस्पृशत्॥ मज्जंतो
नमिरे केचित्केचिद्ग्राहोदरं गताः॥ राजपुत्रादयः केचिआहस्यंत महाजले॥
तदुपश्रुत्य राजापि चित्रवर्मातिविह्वलः॥ यमुनायास्तटं प्राप्य विचेष्ठः सम
पद्यत॥ श्रुत्वाथ राजपत्न्यश्च बभूवुर्गतचेतनाः॥ सा च सीमंतिनी श्रुत्वा पपात
भुवि मूर्छिता॥ तथान्ये मंत्रिमुख्याश्च तावकाः सपुरोहिताः॥ विह्वलाः शोकसं
४९ तप्ता विलेपुर्मुक्तमूर्धजाः॥ इंद्रसेनोपि राजेंद्रः पुत्रवार्तां सुदुःसहां॥ आकर्ण्य स
हपत्नीभिर्नैष्ठसंतः पपात ह॥ तन्मंत्रिणश्च तत्पौरास्तथा तद्देशवासिनः॥ आ ४९

बालवृद्धवनितास्तु क्रुक्रुशुः शोकविह्वलाः॥ शोकार्त्ताः केचिदुरो जघ्नुः शिरो जघ्नुश्च के
चन॥ हा राजपुत्र हा तात क्वासि क्वासीति बभ्रमुः॥ एवं शोकाकुलं दीनमिंद्रसेन
महीपतेः॥ नगरं सहसा सर्वं चित्रवर्मपुरं तथा॥ अथ वृद्धैः समाश्वस्तश्चित्र
वर्मा महीपतिः॥ रानुने नगरमागत्य सांत्वयामास चात्मजां॥ स राजाभसिमग्नस्य
जामातुस्तस्य बांधवैः॥ आगतैः कारयामास साकल्यौर्ध्वदैहिकं॥ सा च सी
मंतिनी साध्वी भर्तृलोकमियासती॥ पित्रा निषिद्धा स्नेहेन वैधव्यं समपद्यत॥
मुनिपत्न्योपादिष्टं यत्सोमवारव्रतं शुभं॥ न तत्याज शुभा नारी वैधव्ये प्राप्तवत्य
पि॥ एवं चतुर्दशो वर्षे दुःखं प्राप्य सुदारुणं॥ ध्यायंती गिरिशपादाब्जं वत्सरत्रयम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य गालयं॥ पुत्रशोकादिशोकार्त्तमिंद्रसेनं महीपतिं॥ प्रसन्नस्य प्रकाशात्मा सर्वांगं जकुद्व
रोजसा॥ हृतसिंहासनः शूरैर्दायादैः सोऽप्रजोऽनृप॥ निगृह्य कारा भुवने सपत्नी
को विधिर्यांत्रितः॥ चंद्रांगदोपि तस्तत्रो निमग्नो यमुनाजले॥ अधो धो मज्जमानो
सौ ददर्शोरगकामिनीः॥ जलक्रीडानुषक्तास्ता दृष्ट्वा राजकुमारकं॥ विस्मित
स्तमथो निन्युः पातालं पन्नगालयं॥ सनीयमानः सहसा पन्नगीभिर्नृपात्मजः॥
तक्षकस्य पुरं रम्यं विवेश परमाद्भुतं॥ सोऽपश्यद्राजतनयो महेंद्रभवनोपमं॥
महारत्नपरिभ्राजन्मयूखपरिदीपितं॥ वज्रविद्रुमवैडूर्यप्रासादशतसंकु
५० लं॥ माणिक्यगोपुराट्टालकुटकादामभिरुज्ज्वलं॥ चंद्रकांतस्थलीरम्यं हेमप्राकार ५०

वाटकं॥ अनेकशतसाहस्रमणिदीपविराजितं॥ नानारत्नपरिक्षिप्तमुकुटद्यु
तिरंजितं॥ फणामणिसहस्राद्यैरसंख्येयैः पन्नगोत्तमैः॥ उपासितं प्रांजलिभिर्वि
चित्रकरभूषणैः॥ रूपयौवनमाधुर्यविलासगतिशोभिनाः॥ नागकन्यासहस्रा
णां समंतात्परिवारितं॥ दिव्याभरणदीप्तांगं दिव्यचंदनचर्चितं॥ कालाग्निमिव
दुर्द्धर्षं तेजसादित्यसन्निभं॥ दृष्ट्वा राजसुतो धीरः फणिपस्य सभास्थलं॥ उत्थि
तः प्रांजलिस्तस्य तेजसा स्तिमितलोचनः॥ नागराजोपि तं दृष्ट्वा राजपुत्रं मनोरमं॥
को यं कस्मादिहायात इति पप्रच्छ पन्नगीः॥ तदुक्तं यमुनातोये दृष्टोस्माभिर्यदृच्छ
या॥ अज्ञातकुलनामायमानीतस्तव सन्निधिं॥ अथ पृष्टो राजपुत्रस्तक्षकेण म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हात्मना॥कस्यासि तनयः कस्त्वं को देशः कथमागतः॥ ॥राजपुत्र उवाच॥ ॥
अस्ति भूमंडले कश्चिद्देशो निषधसंज्ञितः॥तस्याधिपो भवद्राजा नलो नाम महा
यशाः॥स पुण्यकीर्तिः क्षितिपो दमयंतीपतिः प्रभुः॥तस्यासीदिंद्रसेनाख्यः पु
त्रस्तस्य महात्मनः॥चंद्रांगदोस्मि नाम्नाहं नवोढः श्वशुरालये॥विहरन्यमुना
तोये निमग्नो दैवचोदितः॥एताभिः पन्नगस्त्रीभिरानीतोस्मि तवांतिकं॥इत्यो
हं तव पादाब्जं पुण्यैर्जन्मांतरार्जितैः॥अद्य धन्योस्मि धन्योस्मि कृतार्थौ पितरौ
मम॥यदीक्षितोहं कारुण्यात्त्वया संभाषितोपि च॥ ॥नृप उवाच॥ ॥इत्युद
५२ रमसंभ्रांतं वचः श्रुत्वातिपेशलं॥तमसकः पुनरेतस्य प्राहभाषे राजनंदनं॥ ॥ ५२

तक्षक उवाच॥भो भो नरेंद्रदायाद मा भैषीर्धीरतां भज॥सर्वदेवेषु को देवो यु
ष्माभिः पूज्यते सदा॥राजपुत्र उवाच॥यो देवः सर्वदेवेषु महादेव इति स्मृतः॥
पूज्यते स हि विश्वात्मा शिवोस्माभिरुमापतिः॥यस्य तेजोंशलेशेन रजसा च प्र
जापतिः॥कृतरूपः सृजद्विश्वं स नः पूज्यो महेश्वरः॥यस्यांशांशांशिकं दिव्यं
बिभ्रद्विष्णुः सनातनः॥विश्वं बिभर्ति भक्तात्मा स शिवोस्माभिरीज्यते॥य
स्यांशात्तमसो जातो रुद्रः कालाग्निसन्निभः॥विश्वमेतं दहत्यंते स पूज्योस्मा
भिरीश्वरः॥यो विधाता विधातुश्च कारणस्यापि कारणं॥तेजसां परमं ते
जः स शिवो नः परा गतिः॥योंतिकस्थोपि दूरस्थो मायोपहतचेतसां॥अपरि
च्छेद्यधामासौ शिवो नः परमा गतिः॥योग्नौ तिष्ठति यो भूमौ यो वायौ सलिले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च यः॥ य आकाशे च विश्वात्मा सर्वज्योनः सनातनः॥ यः साक्षी सर्वभूतानां यः
आत्मस्थो निरंजनः॥ यस्य धाव राग्गो लोकः सोस्माभिः पूज्यते शिवः॥ पूर्वे क
र्माद्येपुरुषं पुराणं वदंति भिन्नं गुणे कमेन॥ स्वेच्छत्मेके थतुरीयमन्ये पूर्व
स्वमन्ये स शिवोगतिर्नः॥ यं न स्पृशंति सेन मर्चिसत्तत्वं दुरंतधामानमसत्स्व
रूपं॥ मनोवचोरत्नयआत्मभाजां सदैव पूज्यः परमः शिवो नः॥ यस्य प्रसादं प्र
तिलभ्य सन्तो बाधंति नेद्धं पदमाजंजं वा॥ विस्तीर्णकर्मोर्गलकालचक्राश्यचं र
स्य भीताः स शिवो गतिर्नः॥ यस्य स्तुतिः सकलपापरुजां विघातं संघः करोसपि
वपुल्केसजन्मभाजां॥ यस्य स्वरूपमखिलं श्रुतिभिर्विमृग्यं तस्मै शिवाय सत
५२ तं करवाम पूजां॥ यन्नाधिलब्धनिलया सुरलोकसिंधुर्यस्यांगनाभगवतीज ५२

गदंविकाच॥ यत्कुंडलेल्लहहतसकवासुकीशेयत्कंठभूषणमिदं कगरलं कपालं॥
यज्ञालने चं ज्वलनः प्रचंडः सोस्माकमेव गतिरर्धशशांकमौलिः॥ जयतिनिग
मच्छउ आगेषु यस्यांघ्रिपद्मं जयतिसदसि नित्यं योगिनां यस्य कीर्तिः॥ जयतिस
कलनत्वोर्ध्वगा यस्य मूर्तिः स विजितगुणसर्गः पूज्यते स्माभिरीशः॥ स्तउवा
च॥ इत्याकर्ण्य वचस्तस्य तक्षकः प्रीतमानसः॥ जातभक्तिर्महादेवेराजपुत्रम
भाषत॥ तक्षक उवाच॥ परितुष्टोस्मि भद्रं ते तव राजेंद्रनंदन॥ बालोपि यत्स
रं तत्त्वं वेत्सि रौद्रं परात्परं॥ एष रत्नमयो नेकरतात्थ्याद्दरोवलाः॥ रतेकल्य
कुमाः सर्वे यथ्योम्हत्तरसंभसा॥ नोत्र मृत्युभयं घोरं न जरा रोगपीडनं॥ यथे
ष्टं विहरात्रैव पुंस्त्व भोगान्यथेप्सितान्॥ इत्युक्तो नागराजेन स राजेंद्रकुमारकः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्फुवाचपरश्रीसारुतांजलिरुत्तारधी॥ कृतवारोष्यहंकालेसुमूलाग्रहिणी
ममा॥ शिवस्मापसेनिसंपितराचेकपुत्रको॥ तेलघमाम्लतेमत्तारोकेनमहता
रताः॥ श्रापः प्राणैर्विमुज्यंते देवा प्राणान्वहंति च॥ अतोमयावकृतिथिनात्रस्य
यंकथंचन॥ तमेवलोकेरूपयामासापयितुमर्हसि॥ इत्युक्तवंतंनरदेवपुत्रंदि
व्यैर्वरान्नैः सुरपादपोत्थैः॥ आप्यायितावरगंधवासः सरत्नदिव्याभरणैर्वि
चित्रैः॥ सतोषयित्वा विविधैश्च भोगैः पुनर्बभाषेभुजगाधिराजः॥ यत्तायत्तामां
स्मरसित्वदग्रेतदानतायिक्रिपतेमयेति॥ पुनश्चराजपुत्रोयतनक्षकोश्वंचका
५२ मगं॥ नानाद्वीपसमुद्रेषुलोकेषुचनिरर्गलं॥ दत्तवान्रत्नभारांणांदिव्याभरण ५२

वाससां॥ वाहनाय ददतवेकं राक्षसंपन्नगेश्वरः॥ नत्सहायार्थमेकंचपन्नगेंद्रकुमारकं॥
विसृज्यतनसकः श्रीसागरछेतिविससर्जतं॥ इतिवेक्षांगदः सर्वंसंगृह्यविविधंधनं॥
अश्वकामगमारुह्यतांश्चांसहविनिर्ययौ॥ सकुहत्तोदिवोन्यत्तसादेवनदी
जलान्॥ विजहाररतटेरम्येदिव्यमारुह्यवाजिनं॥ अथाम्भिन्समयेतन्वीसाच
सीमंतिनीसती॥ स्नातुंसमाययौतत्रसखीभिः परिवारिता॥ साददर्शनदीतीरे
विहरंतंन्टपात्मजं॥ रक्तसानररूपेणनागपुत्रेणचान्वितं॥ दिव्यकल्पासमाकीर्ण
दिव्यमाल्यानुलेपनं॥ देहेनदिव्यगंधेनव्याप्तितदशयोजनं॥ तमप्सरांरूलिवोद्य
दिव्याश्वमधिसंश्रितं॥ जडोन्मत्तेवभीतेवतस्थौतन्न्यस्तलोचना॥ तांचराजेंद्रपु
त्रोसौदृष्ट्वापूर्णेभिवस्मरन्॥ निमुक्तकंगभरणांकंठसूत्रविवर्जितां॥ असंयोजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथास्मिन्नामंगराजविवर्जिता॥ सक्तनीलांजनाभांगी रुदांगी शोकदुःखिता॥ दृक्षा
वरुद्यतुरगाद्उपविष्टः सरित्तटे॥ लोमान्हर्षयनारोहामुपवेश्येदमब्रवीत्॥ कात्वं
कस्यकलत्रंवाकस्मात्सितनयासुता॥ किमीदृशं गतावाल्ये दुःसहं शोकलक्षणं॥
इतिस्नेहेनसंपृष्टासावधूरश्रुलोचना॥ लज्जितास्वयमास्थातुं तत्सखी सर्वम
ब्रवीत्॥ इयंसीमंतिनीनाम्नास्नुषा निषधभूपतेः॥ चंद्रांगस्य महिषीतनया चि
त्रवर्मणः॥ अस्याः पतिर्दैवयोगान्निमग्नोस्मिन्महाजले॥ तेनेयंप्राप्तवैधव्या बा
लाउरुखेनशोषिता॥ एवंवर्षत्रयंनीतं शोकेनातिवलीयसा॥ अद्येंदुवारे संप्राप्ते स्ना
तुमत्रसमागता॥ श्वशुरोस्याः सराजेंद्रो हतराज्यस्तथारिभिः॥ बलात्कृहीनो
५४ वद्धश्वसभार्यस्तद्दरोस्थितः॥ तथाप्येषा शुभाचारा सोमवारे महेश्वरं॥ सांविकं ५४

परयाभक्त्यापूजयत्यमलाशया॥ सूत उवाच॥ इत्थंसखीमुखेनैव सर्वमावेद्य सु
व्रता॥ ततः सीमंतिनीप्राह स्वयमेव नृपात्मजं॥ कस्त्वंकंदर्पसंकाशः काविमौ तव पार्श्व
गौ॥ देवो नरो वा सिद्धो वा गंधर्वो वाथ किन्नरः॥ किमर्थमत्र मत्प्रांते स्नेहवानिह व
पृच्छसि॥ किं मां वेत्सि महाबाले दृष्टवान् किमु कुत्रचित्॥ दृष्टपूर्वं इवाभासि म
या च स्वजनो यथा॥ सर्वं कथय तत्त्वेन सत्यसाराहि साधवः॥ सूत उवाच॥ एताव
दुक्तौ नरदेवपुत्री सबाष्पकंठं सुचिरं तुतोद॥ मुमोह भूमौ पतिता सखीभिर्धृता
न किंचित्कथितुं शशाक॥ श्रुत्वा चंद्रांगः सर्वं प्रियायाः शोककारणं॥ मुहूर्तमभव
त्तूष्णीं स्वयं शोकसमाकुलः॥ अथाश्वास्य प्रियां तन्वीं विविधैर्वाक्यनैपुणैः॥ सिद्धा
नामवधं देवाः कामंगा इति सोब्रवीत्॥ ततोयत्तादिवाकृष्यपाणिग्रहणशंकिता॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लो॰

पुलकांकितसर्वांगीनां कर्णे किंचिदब्रवीत्॥ कापि लोके मया दृष्टा स्वयं भर्त्तावरान
ने॥ त्वत्कृताचरणाल्लीनः स घः एष्यागमिष्यति॥ अयनेष्वपि मे शोकं हित्वैरेवदिने
ध्रुवं॥ एनचं सितु मायातरु त्व भर्त्तुः सखास्मि हं॥ अत्र कार्यो न संदेहः राधामिहि
वपादयोः॥ तावत्स्वहृदयेस्थेयं नप्रकारं यचरक्रुत्रचित्॥ सितिन हृचनेश्रुत्वा
सुधाधारा रनाधिके॥ संभ्रमो भ्रांतनयना लमेवमुकुरे सत॥ प्रेमबंधा
नुगुणितं रागस्य चातुरसायनं॥ विभ्रमोत्तरहसितं मधुरापांगवीक्षणं॥ स्व
पाणिस्पर्शनोद्भिन्नपुलकांचितविग्रहं॥ रवैदद्यानि चांगेषु लक्षणानि स्व
५५ रादिषु॥ वयः प्रमाणं वर्णे च परीक्ष्येऽस्म मन्तर्कयत्॥ एषएव पतिर्मे स्यात्कुवंनान्यो ५५

भविष्यति॥ अस्मिन्नेव प्रसक्ते मे हृदयं प्रेमकातरं॥ वरालोकादिहायातः कथमे
कः स्वरूपधृक्॥ दुर्भगायाः कथं मे स्यात्कुर्मेष्टस्य दर्शनं॥ स्वप्ना यं किंतु न स्व
प्नो किंतु नेत्रभ्रमोऽयं किंतु न भ्रमः॥ रूपधृ नौ थवा कश्चिद्यक्षो गंधर्व एव वा॥ कु
निपल्या मदुक्तं मे परमाप्रतापित॥ अतमेतत्कुरूपेति तस्य नापकलमर्म॥ ये
वर्णां सुतनसौभाग्यं मम मे सा हृदि जो च मः॥ नमेत स्य वयः सत्यं कोविदादीश्वरे
विना॥ निमित्तानि च दृश्यंते मंगलानि दिने दिने॥ प्रसन्ने पार्वतीनाथे किमसा
ध्यं शरीरिणां॥ इत्थं विमृश्य वकुधा तां पुनस्तु क्रमसंभाष्य॥ लक्ष्मीनमस्तु संनीकर्णे
रोरं सान्त्वय प्रयोजनं॥ इमं अत्रातमाख्यातुं तासितेः तोकतन्तयो॥ गधाम स्थागस्ति
नेभद्रे स घः पतिनरास्यासि॥ इत्युक्त्वान्यं समारुह्य जवेन न्यपनंदनः॥ ताभ्यांस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हनिजे राक्षः अस्य पद्मनलक्षणात् ॥ सप्तुरोपवनाभ्यासे स्थित्वा तं फणिकुञ्जकं ॥ वि
मसर्जातिलगपाद्मानृसिंहासनगतान्प्रति ॥ समगतो भवत्तान् संप्रमिद्रसेनो वि
मुच्यतां ॥ चंद्रांगदस्त्वस्य सुतः प्रामो येपन्नगालयात् ॥ स्वपासनेविन्मुचेत्तुभवे
तो माविचायतां ॥ नोचेस्यंद्रांगदस्याशुबाणाः प्राणान्हरंति वः ॥ समग्नो यमु
नातो येगत्वा नसक्रमंदिरं ॥ लब्ध्वा च तस्य साहाय्यं पुनर्लोकमिमंगलः ॥ इस
स्यातमरौवेणलद्धतोतंनिशाम्यते ॥ साधु साध्विति संभ्रांताः शरांसुः परिपंथि
नः ॥ अथेंद्रसेनायानिवेघसत्वरं नष्टस्य पुत्रस्य पुनःसमागमं ॥ प्रसाघलेप्रा
रा मनरेंस्वैसनंदायदस्तु स्यास्तुभयं प्रपेदिरे ॥ अथपौरजनाः सर्वे पुरोधानेन
५९ पालजे ॥ दृष्ट्वा रासेंडुतं प्रोत्तुर्लेभिरे च महाधनं ॥ आकर्ण्य पुत्रमायांतं राजानं ५९

दजला सुतः ॥ नव्यजानादिमलोकेराज्ञी च परया मुदा ॥ अथ नागरिकाः सर्वे मंत्रि
श्च धातुरोधसः ॥ प्रत्युद्गम्य परिष्वज्य नमाविस्तु नृपांतिकं ॥ अथोत्सवेन महता प्र
विश्य निजमंदिरं ॥ राजपुत्रः स्वपितरौ ववंदे वाष्पमुत्सृजन् ॥ तेपादकमलेपतितं स
पुत्रं विवेदनासौ पृथिवीपतिः क्षणं ॥ प्रबोधितो मासजनैः कथंचिदुत्थाय सांक्लिम
हतालिलिंगे ॥ क्रमेण मातृरभिवंद्यताभिः प्रवर्द्धिताशीः प्रणयाकुलाभिः ॥ आ
लिंगितः पौरजनानरोषान्संभावयामास स राजसूनुः ॥ तेषां मध्ये समासीनः स्व
र्तानमरोषतः ॥ पित्रो निवेदयामास तक्षकस्य च मित्रतां ॥ दत्तं भुजगराजेन र
त्नादिधनसंचयं ॥ दिव्यं मद्रसभानीतं पित्रे सर्वं न्यवेदयत् ॥ राजा स्वपुत्रचरि
तं दृष्ट्वा श्रुत्वा च विस्मितः ॥ मेने स्नुषायाः सौभाग्यं महेशाराधनार्जितं ॥ सोमंगत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्र सो०

नर्यो वा गौभिर्मानैषध्भूपतिः॥ चारेर्निर्वेदयामास चित्रवर्म महीभुजे॥ अ
लेभां नृपतिर्वीर्गौ ससहस्राय संभ्रमात्॥ लेभ्यो दक्षाधनेभ्य रिननर्सीनद
यिहलः॥ अथाह यस्य तनयां परिष्वज्याश्रुलोचनः॥ भूपतो भूषयामासस्व
कवैधव्यलक्षणं॥ अथोत्सवो महानासीत् द्राक्ष्यामधुरादिषु॥ सीमंतिन्याः भु
भाचारं रंरांरांसुः सर्वेलोजनाः॥ चित्रवर्मोथ नृपतिः समाहूय द्रुसेनजं॥ पुन
रुद्वाहविधिनासुतामस्मै न्यवेदयत्॥ चंद्रांगदोपि रत्नौघैरानीतैस्वसकाल
यान्॥ स्वां पत्नीं भूषयां चक्रे मसीनामणिकुंडलैः॥ अंगरागेण दिव्येन तनकांच
नरोभिनां॥ सुशुभे मालुगंधेन दशायोजनगामिनां॥ अम्लानमालयाराश्व
५८ हैमकिंजल्कवर्णया॥ कल्पद्रुमोद्भया बाला भूषिता शुशुभे सती॥ रत्नं चंद्रांगदः ५८

पत्नीं नयाप्यसमये शुभे॥ पयौ स्वनरीं भूयः श्वशुरेणानुमोदितः॥ इंद्रसेनो रा
पिराजैश्चौराज्ये स्थाप्य निजात्मजं॥ तपसाराधयामास लेभे संयमिनां गतिं॥
दशावर्षसहस्राणि सीमंतिन्यास्यभार्यया॥ सोर्द्ध चंद्रांगदो राजा बुभुजे विषया
न् बहून्॥ समस्त तनयानष्टौ कन्यामेकां वराननां॥ रेमे सीमंतिनी भर्त्री प्रजैव
तीमहेश्वरं॥ विचित्रमिदमाख्यानं मया समनुवर्णितं॥ भूयोपि वक्ष्ये माहात्म्यं
सोमवारव्रतोदितं॥ ॥इति श्री स्कंदपुराणे ब्रह्मोत्तरखंडे सोमवारमाहात्म्ये
कथनं नाम अष्टमोध्यायः॥ ॥ऋषय ऊचुः॥ ॥साधु सूत महाप्राज्ञ त्वया कथि
तमुत्तमं॥ आख्यानं पुनरन्यच्च विचित्रं वक्तुमर्हसि॥ सूत उवाच॥ विदर्भवि
षये पूर्वमासीदेको द्विजोत्तमः॥ वेदमित्र इति ख्यातो वेदशास्त्रार्थसुधीः॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यासीदपरो विप्रः सखा सारस्वताह्वयः ॥ तावुभौ परमस्निग्धावेकदेशनिवासि
नौ ॥ वेदमित्रस्य पुत्रोभूत् सुमेधानामसुव्रतः ॥ सारस्वतस्य तनयः सोमनामाभिनि
विश्रुतः ॥ उभौ समवयसौ बालौ समवर्षौ सहस्थिती ॥ समं च कृतसंस्कारौ समवि
घौ बभूवतुः ॥ सांगानधीत्य तौ वेदांस्तर्के व्याकरणानि च ॥ इतिहासपुराणानि
धर्मशास्त्राणि कृत्स्नशः ॥ सर्वविद्याकुशलिनौ बाल्य एव मनीषिणौ ॥ प्रहर्षमतु
लं पित्रोर्ददतुः सकलैर्गुणैः ॥ तावेकदा स्वतनयौ तावुभौ ब्राह्मणोत्तमौ ॥ आहूया
वोचतां प्रीत्या शोडशाब्दौ शुभाकृती ॥ हे पुत्रकौ युवां बाल्ये कृतविद्यौ सुवर्चसौ ॥
वैवाहिकोयं समयो वर्ततेद्य युवयोः समं ॥ इमं प्रसाद्य राजानं विदर्भेशं स्वविद्य
५८ या ॥ ततः प्राप्य धनं भूरि स्वनौ दाहौ भविष्यतः ॥ एवमुक्तौ सुतौ ताभ्यां तावुभौ द्वि ५८

जनंदनौ ॥ विदर्भराजमासाद्य पर्यतोषयतां गुणैः ॥ विद्यया परितुष्टाय तस्मै द्वि
जकुमारकौ ॥ विवाहार्थं कृतोद्योगौ धनहीनावशंसतां ॥ तयोरभिमतं सोपास
विदर्भमहीपतिः ॥ प्रहस्य किंचित्सोवाचल्लीकृतसविविलसया ॥ इतो निषधराज
स्य राज्ञी सीमंतिनी सती ॥ सोमवारे महादेवं पूजयत्यतिकौतुकं ॥ तस्मिन्दिने स
पत्नीकान् द्विजाग्र्यान्वेदवित्तमान् ॥ संपूज्य परया भक्त्या धनं भूरि ददाति च ॥
अतो युवां तयोरेको नारीविभ्रमवेषधृक् ॥ एकस्तस्याः पतिर्भूत्वा जायेतां चित्र
दंपती ॥ युवां वधूवरौ भूत्वा प्राप्य सीमंतिनीगृहं ॥ भुक्त्वा भूरि धनं लब्ध्वा पु
नर्यातं ममांतिकं ॥ इति राज्ञा समादिष्टौ भीतौ द्विजकुमारकौ ॥ प्रत्यूचतुरिदं क
र्म कर्तुं नौ जायते भयं ॥ देवतासु गुरौ पित्रोस्तथा राजकुलेषु च ॥ कौटिल्यमाचरन्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तालसघोनरयान्विसान्वयः॥ कथमेतन्महाराज्ञी छद्मना प्रविवेशुमान्॥ गोप्यमानो
पियः कश्चित्कृतश्चित्तु आति मे व्यतिः॥ येगुणाः साधिताः पूर्वं शीलाचारश्रुतादि
भिः॥ सघस्तेनाशनायांति कौटिल्यपथगामिनां॥ पापानि शुभयं वै रंचलायेना
नि देहिनां॥ ष्वप्नमार्गे प्रपन्नानां तिष्ठत्येव हि सर्वदा॥ अनआ वां श्रुभाचारोज्ज
नीचश्रुचिनां कुले॥ स्तेनं धर्तेजन श्लाघ्यंनोश्रयाघः कृताचन॥ राजा उवाच॥ दे
वतानां गुरूणां च पित्रोश्च पृथिवीपतेः॥ शासनस्याविलंघ्यत्वात्प्रसादेशो न कार्ह
ति नु॥ एतैर्यं घसमादिष्टं शुभं वा यदि वाशुभं॥ कर्त्तव्यं नियतं भीतैरप्रमत्तैर्शुभ
विभिः॥ अतो न पयं हि राजानः प्रजा प्रयं हि स्वमनाः॥ राजाज्ञया प्रवृत्तानां श्रेयः स्या
॥५९॥ दन्यथा भयं॥ अतो मघामनं कार्यं भवध्यामविलंबितं॥ इत्युक्तौ नरवेदेन तौ त ॥५९॥

थेत्युक्त चतुर्भयात्॥ सारस्वतस्य तनयं सामवंतं नराधिपः॥ स्त्रीरूपधारिणं चक्रे
वस्त्राकल्पांजनादिभिः॥ सकृत्रिमोघस्तनके रावेधः प्रसूनकर्णाभरणाग रागः॥
स्निग्धांजनासः स्वहणीयरूपो बभूव सद्यः प्रमदोत्तमाभः॥ तातुभौ दंपती भूत्वा
द्विजपुत्रौ न्टपास्पजौ सया॥ जग्मतुर्निषधं देशं युक्तान क्षाभवालिनि॥ उपेत्य राज
सदनं सोमवारे सहद्विजैः॥ सपत्नीकैः कृतातिथ्यौ धौतपादौ बभूवतुः॥ सा राज्ञी
श्रीलणा सर्वान्नूपदिष्टानु वरासने॥ प्रत्येकमर्चयां चक्रे सपत्नीकान्द्विजो
त्तमान्॥ तौ चाद्भिप्रसुतौ द्वा प्राप्तौ कृतकदंपती॥ शाताक्षि चिन्हि हस्याथमे
ने गौरीमहेश्वरौ॥ आवाहयद्विजमुख्येषु देवदेवं सदाशिवं॥ पत्नीष्वावाहया
मास देवीं जगदंबिकां॥ गंधैर्माल्यैः सुरभिभिर्धूपैर्नीराजनैरपि॥ अर्चयि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वौ हि जश्रेष्ठान्नमश्वके समाहिता ॥ हिरण्मयेषु पात्रेषु पायसं घृतसंयुतं ॥ शा
र्करा मधुसंयुक्तं शाकेषु च मनोरमैः ॥ गंधशाल्योदनैर्हृद्यैर्मोदकापूपराशिभिः ॥
शष्कुलीभिश्च संयावैः कृसरैर्माषपर्पटैः ॥ अथान्यैरप्यसंख्यातैर्भक्ष्यैर्भोज्यै
र्महारसैः ॥ सुगंधैः स्वादुभिः सूपैः पानीयैरपि शीतलैः ॥ क्रममन्नं द्विजाग्र्यः
सा भक्त्या पर्यवेषयत् ॥ दध्योदनं निरूपमं निवेद्य समतोषयत् ॥ भुक्तवत्सु द्वि
जाग्र्येषु स्वाचांतेषु पुनस्तांगना ॥ प्रणम्य दत्वा तांबूलं दक्षिणां च यथार्हतः ॥ धेनु
हिरण्यवासांसि रत्नस्रग्भूषणानि च ॥ दत्वाभयो नमस्कृत्य विससर्ज द्विजो
त्तमान् ॥ नयोर्द्वयोर्भर्तुरवर्यपुत्रयोरेकत्र याहे मवत्ताधियाचितः ॥ एकोन
६० हादेवधियाभिरूजितः कुलप्रणामो यवत्तुस्ततालयान् ॥ आवाह्य गिरिजां भ ६०

क्त्यायत्स्त्रयापूजितः परं ॥ स सामवानु द्विजसुतो बभूव प्रमदोत्तमा ॥ सानु
विस्मृतपुंभावा तस्मिन्नेव द्विजोत्तमे ॥ जातस्पृहा मदोत्सिक्ता कंदर्पविवशाब्र
वीत् ॥ अयि नाथ विशालाक्ष सा सखी वयवसुंदर ॥ तिष्ठ तिष्ठ क्व यासि मां नप
स्यासि ते प्रियां ॥ इदमग्रे वनेरम्यं सुपुष्पितलतादुमं ॥ अस्मिन्विहृत्य मे प्रियामित्य
या सह यथासुखं ॥ इत्युक्तो योऽकमा कण्वपुरोगधद्विजात्मजः ॥ विचिंत्य परिहासोक्तिं
गच्छति स्म यथापुरा ॥ पुनरप्याह सा बाला तिष्ठ तिष्ठ क्व यास्यसि ॥ इरूसंगस्मरा
वेशां परिभूतां पुपेस्य मां ॥ परित्यजस्य मां कांतोपाथ यस्य तपोधरं ॥ नाहं गंतुं स
मर्थास्मि स्मरबाणनिपीडिता ॥ इत्थमस्तु नरर्थं तत्त्विरामपरिशंकितः ॥ आयां
ती दृष्ट्वा तीस्य सहसाविस्मयं गतः ॥ केषा पद्मपलाशाक्षी पीनोन्नतपयोधरा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मो॰
खं॰२

कृशोदरी स्थूलश्रोणी नवकोमला॥ सा एवमेसखा किंतु जाता एवं वरांगना॥ एवमा
श्यैन मनः सर्वं भितिसंचिंत्य सा अब्रवीत्॥ किंतु पूर्वं वरं वा भासि सखे रूपगुणादिभिः॥
अपूर्वं भाषसे वाक्यं कामिनीव मदाकुला॥ यत्त्वमेव पुराणो ब्रह्मचारी जितें
द्रियः॥ सा रवलास्तजः शांतः कथमेवं प्रभाषसे॥ इत्युक्ते सा पुनः प्राह नाहमस्मि
पुमान् विभो॥ नाम्ना सामवती बाला नगरस्मिन् रतिरागिनी॥ यदि ते दैसंशयः कां
तमंगानि विलोकय॥ इत्युक्तः सहसा मार्गे रहस्यंगान्यलोकयत्॥ तामकृत्रि
मधम्मिल्लां जघनस्तनशोभिनीं॥ सुरूपां वीक्ष्य कामेन किंचिद्व्याकुलतामगात्॥
पुनः संस्तभ्य यत्नेन चेतसा विस्मितं बुधः॥ सुरूपं तं विस्मयाविष्टो न किंचित्स्म
६२ भाषत॥ गते तस्मिन् संशयः कश्चिद्गत्वा गव्हरमस्थिमां॥ पश्येदं विपिनं कांतपरस्त्री ६२

सुरतोचितं॥ स्तुमे धाउ वाच॥ मैवं कथय मयि त्वं नाहिंसी मंदमत्तवत्॥ आवां
विप्रौ नराखाथौ त्वमेवं भाषसे कथं॥ अधीतस्य च रात्रस्य विवेकस्य कुलस्य
च॥ किमेवसदृशो धर्मो राजमार्गे निषेवणं॥ न त्वं स्त्री पुरुषो विद्वान् जानीयाश्च
नमालना॥ अधर्म्यं स्यधृता धर्मं आवाभ्यां यदि चेष्टितं॥ वंचयित्वा स्वपितरौ
घरं तेराजातुरासनात्॥ कृत्वा चानुचितं कर्म तस्यैव भुज्यते फलं॥ सर्वथानु
चितं कर्म नष्टणां श्रेयो विनाशनं॥ यत्वं विप्रा सजौ॥ विद्वान् गतः स्त्रीत्वं विगर्हि
तं॥ मार्गे स्त्रीगतो रण्यं न शोचिष्यति कंटके॥ वलादिं स्येन वाहिंस्थे सहासकृत्स
दागमः॥ एवं विवेकमाश्रित्य त्वपी मे हि स्वकं गृहं॥ देवद्विजप्रसादेन स्त्रीत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा विलीयते॥ अथवा दैवयोगेन स्यात्त्वमेव भयेन च॥ पित्रा दत्ता मया साकं
रंस्यसे वरवर्णिनी॥ अचिरेण महोद्धः स्वैर्महोमा ध्याय तं महत्॥ अहोरात्राः प्र
भावो यं शिवाराधनसंभृतः॥ इत्युक्ताथ सकृत्तेन सा यथा स्मरविह्वला॥
बलेन तं समालिंग्य चुचुंबाधरपल्लवं॥ धर्षितो पितया धीरः सुमेधा स्तनम
स्त्रियं॥ यत्नोपनीय सदनं रुत्यं तत नन्यये दयतु॥ ततः कन्याथ तौ विप्रौ
कुपितौ शोकविह्वलौ॥ भर्तृभ्यां सह कुमाराभ्यां वेदभौ तिक्रमाय तु॥ ततः
सारस्वतमाह राजा नेधर्मे चेष्टितं॥ राजन्ममात्मजं पश्यत तच्छासमये त्रितं
६२ रतौ तदाना यराशौ च कृतुः कर्मगर्हितं॥ मत्सुतः फलं भुक्ते स्त्रीत्वं प्राप्य तु ६२

गुप्सितं॥ अयं मे सूनतिर्नेष्टा निराशाः पितरो हमे॥ पुत्रो नस्य हि लोकोक्ति
लमपिंडादिसंस्कृतेः॥ शिखोपवीतमजिनं मौंजि दंडकमंडलुं॥ अलं चैवं
चिंतं चिह्नं विहाय मां दशांगतः॥ ब्रह्मसूत्रं च सावित्रीं स्नानं संध्याजपार्चनं॥
विसृज्य स्त्रीत्वमापन्नस्य का गतिर्नृपार्थिव॥ तथा मे संततिर्नेष्टा नष्टो वेदप
थाश्रयतेः॥ एकात्मजस्य मे राजन् का गतिर्वद शाश्वती॥ इति सारस्वतेनोक्तं
वाक्यमाकर्ण्य भूपतिः॥ सीमंतिन्याः प्रभावेन विस्मयं परमं गतः॥ अथ स
र्वान्समाहूय महर्षीन्नतिपुंगवान्॥ प्रसाद्य प्रार्थयामास तस्य पुंस्त्वं मही
पतिः॥ ते तु वव्रथ पार्वत्याः शिवस्य च समीहितं॥ तदुक्तानां च संकल्पं
कोऽन्यथा कर्तुमीश्वरः॥ अथ राजा भवैरत्राजमाप यतुनि पुंगवं॥ तां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभ्यां स ह द्विजाग्र्याभ्यां नत्वा ताभ्यां समन्वितः ॥ अंबिकाभवनं प्राप्य भर
द्वाजोपदेशतः ॥ तां देवीं नियमैस्तीव्रैरुपास्त महानिशि ॥ एवं त्रिरात्रं वि
स्पष्टभोजनो जपार्चनध्यानरतो महीपतिः ॥ सम्यक्स्मरणमेवाथ विधेयस्य संस्त
वैर्गौरी प्रपन्नार्तिहरा मनोरथप्रदा ॥ ततः प्रसन्ना सा देवी भक्तस्य पृथिवीप
तेः ॥ स्वरूपं दर्शयामास चंद्रकोटिसमप्रभं ॥ अथाह गौरी राजानं किं तेऽभि
समीहितं ॥ सोप्याह पुत्रमेतस्याः रूपधारीयतामिति ॥ अथोप्याह महादे
६३ वी मद्भक्तैः क्रमेयत्कृतं ॥ शक्यते नान्यथाकर्तुं वर्षायुतशतैरपि ॥ राजाउवा ६३
च ॥ एकात्मजो द्विजेंद्रायेक्रमेणानष्टसंततिः ॥ कथं सुखं प्रपद्येत विनापु

त्रेण लाद्दराः ॥ श्रीदेवीउवाच ॥ तस्यान्योन्यसप्रसादेन भविष्यति सुतो नमः ॥ वि
द्याविनयसंपन्नो दीर्घायुर्विमलाशयः ॥ एषा सामवती नाम सुता तु त्वद्द्विज
न्मनः ॥ अस्यास्तु मेधसः पत्नी कामभोगेन रज्यतां ॥ इत्युक्त्वांतर्हिता देवी ते
पराजपुरीं गमाः ॥ गत्वा स्वस्वगृहं सर्वे चक्रुरुत्सवमनेकशः ॥ सोपि सारस्वतो
विप्रः पुत्रं प्राप्य सुतोत्तमं ॥ लेभे देव्याः प्रसादेन ह्यचिरादेव कालतः ॥ तां च साम
वतीं कन्यां दत्तवान्स्मै सुमेधसे ॥ तौ दंपती चिरंकालं बुभुजाते परं सुखं ॥ इ
त्येतद्विचित्रमाख्यातं सीमंतिन्याश्चरित्रयः ॥ प्रभावः कथितः शंभोर्माहा
त्म्यमपि वर्णितं ॥ अयोपि द्विजभक्तानां प्रभावं विस्मयावहं ॥ समासाद्वर्णयि
ष्यामि श्रोतॄणां मंगलायनं ॥ इति श्री ब्रह्मोत्तरखंडे सीमंतिन्याः प्रभावकथनं नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लो०

सूत उवाच ॥ विचित्रं शिवमाहात्म्यं विचित्रं शिवचेष्टितं ॥ विचित्रं शिवभक्ता
नां चरित्रं पापनाशनं ॥ स्वर्गापवर्गयोः सद्यः साधनं तद्ब्रवीम्यहं ॥ अवंती विष
ये कश्चित् ब्राह्मणो मंदराह्वयः ॥ बभूव विषयारामः स्त्रीजितो धनसंग्रही ॥
संध्यास्नानपरित्यक्तो गंधमाल्यांबरप्रियः ॥ कुस्त्रीसक्तो कुमार्गस्थो यथा
र्थमजामिलः ॥ स वेश्यां पिंगलां नाम रममाणो दिवानिशं ॥ तस्याः एव गृहे
नित्यं तिष्ठत्यविजितेंद्रियः ॥ कदाचित्सदने तस्यास्तस्मिन्निवसति द्विजे ॥
ऋषभो नाम धर्मात्मा शिवयोगी समाययौ ॥ तमागतमभिप्रेक्ष्य स्वपुण्याभि
६४ नमृद्धिमत् ॥ सा वेश्या स च विप्रश्च प्रत्युज्जग्मतुरुभौ ॥ तमारोप्य महापीठे कं ६४

बलांबरसंछन्ने प्रक्षाल्य चरणौ भक्त्या तज्जलं तधतुः शिरः ॥ स्वागतार्घ्यनमस्का
रैर्गंधपुष्पासनादिभिः ॥ उपचारैः समभ्यर्च्य भोजयामासतुर्मुदा ॥ तं भुक्तवंत
माशांतं पर्यंके सुखसंस्तरे ॥ उपवेश्य मुदा युक्तौ तौ रत्नं प्रतियच्छतां ॥ पादसंवा
हने भक्त्या कुर्वंतौ देवचोदितौ ॥ कल्पयित्वानुशुश्रूषां प्रीणयामासतुश्चिरं ॥
एवं समर्चितस्ताभ्यां शिवयोगी महामतिः ॥ इतिवाद्य निशामेकां ययौ प्रातस्तपो
हृतः ॥ एवं काले गते प्राये स विप्रो निधनं गतः ॥ सा च वेश्या मृता काले ययोः कर्म
र्जितां गतिं ॥ स विप्रः कर्मणा नीतो दशार्णधरणीपतेः ॥ वज्रबाहोः कुवैदुर्बिन्याः
सुमंसा गर्भमास्थितः ॥ तां ज्येष्ठपत्नीं नृपते गर्भं संपद्मा स्वश्रितां ॥ अवेक्ष्य
तस्यै गरलं सपत्न्यः प्रददुर्मुदा ॥ सा भुक्त्वा च गरलं घोरं न मृता दैवयोगतः ॥ के

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामेवपरंप्रापमरणादतिदुःसहं ॥ अथकालेसमायातेपुत्रमेकमजीजनत् ॥ क्षे
रोनमहतासाध्वीपीडितावरवर्णिनी ॥ सनिर्द्दरोराजपुत्रस्यछष्टवींगरेणवल्ल
लेनाथापमहाक्रूरं । कंदमानोदिवानिशं ॥ सबालस्तस्यमाताचस्तवींगघ्रणसंयु
तौ ॥ बभ्रमतुरतिक्लिष्टौगरयोगप्रभावतः ॥ तौराशाचसमानीतौवैश्यरूलभे
बजौ ॥ नस्वास्थ्यमापतुर्यत्नैरनेकैर्योजितावपि ॥ नराजौलभतेनिद्रांसाराज्ञीचिदु
लव्यथां ॥ स्वपुत्रस्यचदुःखेनदुःखितानितरांरुषा ॥ नीतेवंकतिचिन्मासान्
सराज्ञासत्पुत्रकौ ॥ जीवंतौचस्तश्राथौविलोक्यात्मन्यचिंतयत् ॥ एतौमेगेहि
णीपुत्रौनिरयाद्गमनाविह ॥ अभ्यांनरोगौकंदंतौनिद्राभंगविधायिनौ ॥ मत्कुवा
६५ जीविदुंवापिनक्षमौपापभोगिनौ ॥ अत्रोपायंकरिष्यामिपापयोःशुभमेतयोः ॥ ६५

नि १ इत्थंविचिंत्यसमभ्यमिपालःसत्कःसपत्नीपुत्रंदात्मजेषु ॥ आहूयसत्त्वंतनिजदार
पुत्रौ ॥ निर्यापयामासरथेनदूरं ॥ तौसुतनपरिम्लकौकुत्रचिद्विजनेवने ॥ अ
वापतुःपरांपीडांस्तुत्स्थांभ्रराविह्वलौ ॥ सोढहेती । निजंबालंनिपतंतीपदेप
दे ॥ निम्नेसंतीनिजंकमेनिंदंतीचाकिनाभ्रंरं ॥ काचित्कंटकभिन्नांगीमुक्तके
शीभयातुरा ॥ कचिद्व्याघ्रस्वनेभ्रांताकचिद्व्यालैरनुद्रुता ॥ भर्त्स्यमानापिशा
चैश्चवेतालैश्चराक्षसैः ॥ महागुल्मेषुधावंतीभिन्नपादास्थुरांकुरैः ॥ सैवंघो
रेमहारण्येभ्रमंतीन्टपगेहिनी ॥ ददर्शसापवणिङ्मार्गेगोब्राजिनरसेवितं ॥ गच्छ
तीतेनमार्गेणसुदूरमपियत्नतः ॥ ददर्शवैरयपनगरंबहुस्त्रीनरशोभितं ॥ तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोनाम महावैश्यो नगरस्य महाधनः॥ आस्ते पद्माकरो नाम राजराज इवापरः
तस्य वैश्यपतेः काचिद्गृहदासीच्च पामना॥ आयांती दूरतो दृष्ट्वा नंदति कृत्तु
पाययो॥ सा दासी च पतेः कांतां सपुत्रां भ्रष्टरापीडितां॥ स्वयं विदितवृत्तांता
स्वामिने प्रत्यदर्शयत्॥ स तां दृष्ट्वा विशीर्णांगीं रुजा तां क्लिष्टपुत्रकां॥ नीलाहरं
सि सुव्यक्तेन हृत्तांतमपृच्छत॥ तयानिवेदिताशेषवृत्तांतः सवणिक्पतिः॥ अहो
कष्टमिति ध्यात्वा तानिशम्यास सुदुर्मुदुः॥ तामंतिके स्वगेहस्य सन्निवेश्य रहो गृहे॥
वासोन्नपानशयनैर्मोच्च सम्यमपूजयत्॥ तस्मिन्गृहे च पवधर्निवसंती सु
६६ रं रक्षिता॥ व्रणयक्ष्मादिरोगाणां न शांतिं प्रत्यपद्यत॥ ततो दिनैः कतिपयैः सबा ६६

लो व्रणपीडितः॥ विलंघितभिषक्त्सतो ममार च विधेर्वशात्॥ च्च तेस्य तनये रा
ज्ञी शोकेन महता च ता॥ मूर्छिता न्यपतद्भूमौ गजभग्नेव वल्लरी॥ दैवात्संज्ञाम
वाप्याथ वाष्पक्लिन्नपयोधरा॥ सा लिलापविचरणिक्स्त्रीभिर्विलंतापमुदुःखिता॥
हा लालनतानहाद्युचमम प्राणरक्षक॥ हा राजकुलपूर्णेंदो हा ममानंदवर्द्धन॥ इमा
मनाथां कृपणांत्यक्त्वाणां स्वकं क्वाधवां॥ मानरंनेपि नैरिस्यान्य कथाताासिच्च पा
मजा॥ इत्यादिभिर्दीनतरैर्वाक्यैः शोकविवर्द्धनैः॥ विलपंती च तापस्योकोटुसां
चयितुं क्षमः॥ एतस्मिन्समये तस्याः दुःखशोकचिकित्सकः॥ ऋषभः स्वयमा
ख्यातः शिवयोगी समाययौ॥ स योगी वैद्यप्रार्थेन साध्वी हस्तेन पूजितः॥ तस्याः
नकोशमागत्य शोचंत्या इदमब्रवीत्॥ ऋषभ उवाच॥ अकस्मात्किमहो यसे रो

रविंबिविनिरुद्धधीः॥ को जातः प्रथमं लोके कोंत्यो वद समासतः॥ अमी देहादयो भा
वास्तोयफेनसधर्मिणः॥ क्वचिद्भांति क्वचिद्यांति क्वचित्तिष्ठंति चापुनः॥ अतोस्मि
न्क्षणे न संदेहो देहे पंचत्वमागते॥ शोकस्यानवकाशास्तान्न रोचंति विपश्चितः॥ गुणे
भ्रंशेन नित्यत्वं ते भ्रमंते निजकर्मभिः॥ कालेनाथ विरूप्यंते वासनायां च सं
रते॥ मायया तस्मिन्मायां त्रिगुणाः सत्वादयोऽव्ययः॥ नैरेव देहा जायंते नानानक्ष
सणाभ्याः॥ देवत्वं यांति सत्वेन रजसा च मनुष्यतां॥ तिर्यक्त्वं तमसा जंतुर्गास
नानुगतो बराः॥ संसारेऽत्र नमो नोस्ति नूनं जंतुः कर्मानुबंधनात्॥ दुर्विभाव्यां गतिं
यातिसुखदुःखमयीं तु कुः॥ अपि कल्पायुषां तेषां देवानां तु विपर्ययः॥ अनेकान
६८ यवज्ञानां का कथा नरदेहिनां॥ केचिद्वदंति देहस्य कालमेव हि कारणं॥ कर्म के ६८

२१ चित्तु गुणान्केचित् देहसाधारणोऽव्ययं॥ कालकर्मगुणाधीनं पंचात्मकमिदं वपुः॥ जी
र्णे दृष्ट्वा न हृष्यंति न शोचंति मृते बुधाः॥ अन्यका जायते जंतुरेकएव प्रलीयते॥
मध्ये व्यक्तमव्यक्तं भाति जले बुद्बुदसंनिभः॥ यदा गर्भगतो देही विभाराः कल्पितस्त
दा॥ देवा जीवंति वा जाता मोक्षियंते सहसेवया॥ गर्भस्यापि च नस्यंति जातमात्रास्त
थापरे॥ केचित्सुवानो नस्यंति म्रियंते केपि वार्द्धके॥ यादृशं प्राकृतं कर्म तादृशं
विंदते वपुः॥ पुत्रं केन दत्तं तु रूपाणि सुखदुःखानि देहसो॥ मायानुभावेपितयोः पि
त्रोः सुरतसंगमात्॥ देहउत्पद्यते कोपि पुत्रो पितृस्त्री बलक्षणः॥ आयुःसुखं च
दुःखं च पुण्यं पापं शुभं धनं॥ ललाटे लिखितं धात्रा वहं जंतुः प्रजायते॥ कर्मणा
न विलंघ्यस्तत्कालस्याप्यनतिक्रमात्॥ अनित्यत्वाच्च भावानां न शोकं कर्तुमर्ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री लो॰

५८ सि॥ कस्त्वं को नियतस्थैर्यं मिंद्रजाले कसंसृतौ॥ कानित्यता शरीरस्येव कराभ्यसं
कलेवरे॥ तव जन्मान्यतीतानि शतकोटिशतानि च॥ अजानं स्याः परतत्वं संसारेऽस्मि
यं महानुभ्रमः॥ कस्य कस्यासि तनया जननी कस्य कस्य वा॥ कस्य कस्यासि गृहिणी
भवकोटिषु वर्त्मनी॥ पंचभूतात्मको देहस्त्वगसृङ्मांससंबंधनः॥ मेदोमज्जास्थि
निचितो विण्मूत्रश्लेष्मभाजनं॥ शरीरं नरमध्येन निजदेहोद्भवं मलं॥ मत्वा स्व
तनयं मूढे माशोकं कर्तुमर्हसि॥ यदि नाम जनः कश्चिन्नित्यं तु नरतिर्यतनतः॥
कथं नाहं विपद्येरन् सर्वे सर्वे विपश्चितः॥ नप्रसादविपदा बुध्या मंत्रौषधिरसा
यनैः॥ अनित्यातिपरं तुं नकश्चिदपि पंडितः॥ एकस्यापत्यता लोकेऽन्यः पर
स्यवरानने॥ तस्मादनित्ये वपवेनत्वे शोचितुमर्हसि॥ नित्यं सन्निहितो मृत्यो ५८

किंसुखं वददेहिनां॥ व्याधेरुरस्थितेन्यासः प्रमत्तो किंतु रोचते॥ अतो जन्मनः मुनी
जे तुं यदि वसित वरानने॥ शरणं व्रज सर्वेशं शंकं जगन्मुमापतिं॥ तावन्मृत्यु
भयं घोरं तावज्जन्मजराभयं॥ यावन्नोपैति शरणं देहि शिवपदांबुजं॥ अने
कयेहदुःखानि संसारे स्मृशादारुणे॥ मनोपदाविरज्येत तत्ताध्ये यो महेश्वरः॥
मनसापि यतः पुंसः शिवध्यानरसात्मनं॥ भयस्त्वमानजायेत संसारविष
यासवे॥ विस्तृतक्षसर्वसंगस्य मनोवैराग्ययंत्रितं॥ यदाशिवपदे मग्नं तदा न
स्ति पुनर्भवः॥ तस्मादिदं मनोभद्रे शिवध्यानैकसाधनं॥ शोकमोहसमाधि
ष्टं माकुरुष्वाशिवं भज॥ ॥सूत उवाच॥ इत्थं सा नु नयं राज्ञी बोधिता शिवयो
गिना॥ असावप्यगुरोस्तस्य प्रणम्य चरणांबुजं॥ ॥राज्ञी उवाच॥ भगवन्सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

तदुच्चायास्तत्कायाः श्रियवंधुभिः ॥ महारोगातुरा यामि काऽगतिर्मरणं विना ॥
अतोहं मर्तुमिच्छामि सह वशिशुनामुना ॥ कृतार्थास्मि यद्दृष्टा मनपरयन्म
रणोन्मुखी ॥ सूत उवाच ॥ इत्युक्तस्याः वचः श्रुत्वा शिवयोगी दयानिधिः ॥ प्रवोप
कारं संस्मृत्य मृत्तस्यास्तित्कुमारयोः ॥ स ततो भस्म संगृह्य शिवमंत्राभिमंत्रितं ॥
विदीर्णे तन्मुखे क्षिप्त्वा मृतस्य प्राणे रूप योजयत् ॥ स बालकः संगतः प्राणैः शनैरु
न्मील्य लोचने ॥ आमसवेरिव बलोरुरोदस्तनकांक्षया ॥ तस्य पुनरुथ्थानं
वीक्ष्य बालस्य विस्मिता ॥ जगाम सुमुदिरे सर्वे नगरे च पुरोगमाः ॥ अथानंदभरा
क्रान्ता विह्वलोत्सन्नविभ्रमा ॥ अग्राहत न नयं शीघ्रं बाष्पव्याकुललोचना ॥ उपगर्
६९ ह्य हस्तन्वी परमानंदनिर्वृता ॥ न वेदात्मानमन्यं वा सुखमेव परिश्रमान् ॥ ६९

पुनश्च ऋषभो योगी तयोर्मोत्कुमारयोः ॥ विषव्रणाक्तं तं देहं भस्मनैव पराम
शत् ॥ तौ तदा भस्मनास्पृष्टौ श्रामदिव्यकलेवरौ ॥ देवीनां सदृशौ रूपं दधतुः कां
तिभाविते ॥ संप्राप्ते त्रिदिवैश्वर्ये यत्सुरव पुण्यकर्मणां ॥ तस्माद्धतगुणं प्राप मा
राज्ञी सुस्वस्तुतमं ॥ तौ पादयोर्निपातितां मृषभः प्रेमविह्वलां ॥ उत्थाप्याश्वास
यामास दुःखैर्मुक्तामुवाच ह ॥ अयि वत्से महाराज्ञी जीवते शाश्वतीः समाः ॥
यावज्जीवसि लोकेस्मिन्ननाविश्वाप्यसेजरां ॥ एवं तेतनयः साध्वि भद्रायुरि
ति नामतः ॥ ख्यातिं यास्यति लोके सुनिजराज्यमवाप्स्यति ॥ अस्य धैर्य स्वभ
वने ताव निवध्नुष्व स्मिते ॥ यावदेष कुमारस्ते प्राप्तविद्यो भविष्यति ॥ सूत उ
वाच ॥ इति तां ऋषभो योगी तं च राजकुमारकं ॥ संजीव्य भस्मवीर्येण ययौ दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीः

दे शान्यथेप्सितान्॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे भद्रायोस्त्यानेनाम
दशमोध्यायः॥ ॥सूत उवाच॥ ॥पिंगला नाम या वेश्या मया पूर्वमुदाहृता॥
शिवभक्ताचे नाहुण्यास्तत्रापद्वेकलेवरं॥ चंद्रांगस्य साभवत् सीमंतिन्याम जा
यत॥ रूपौदार्यगुणोपेता नाम्ना या कीर्तिमालिनी॥ भद्रायुरपि तत्रैव राजपुत्रो
वणिक्सुते॥ वैश्यधेसदने भानोः श्रुचाविविमहातपाः॥ तस्यापि वैश्यनाथस्य
कुमारोस्यैकउत्तमः॥ स नाम्ना सुतनयः प्रोक्तो राजसूनोः सखाभवत्॥ ताउभौ
परमस्निग्धौ राजवैश्यकुमारकौ॥ चिक्रीडतुः रूपाशंगौ रत्नभूषणमंडितौ॥
तस्य राजकुमारस्य ब्राह्मणैः सवणिक्सुतेः॥ संस्कारान्कारयामास स्वपुत्रस्या
७० पि विस्तरात्॥ कालेकृतोपनयनो गुरुशुश्रूषणे रतौ॥ चक्रतुः सर्वविद्यानां सग्र ७०

हं विनयान्वितौ॥ अथ राजकुमारस्य प्राप्ते षोडशहायने॥ सएव ऋषभो योगी तु
स्यवेश्मसमायया॥ सा राज्ञी स कुमारश्च शिवयोगिनमागतं॥ मुहुर्मुहुः प्रणम्याभी
ष्टजयामासतुर्मुदा॥ ताभ्यां संपूजितः सोथ योगी त्रोहृष्टमानसः॥ तं राजपुत्रमुद्दि
श्य वभाषे कृपणार्द्रधीः॥ ॥ऋषभ उवाच॥ ॥कच्चित्ते कुशलं तात तन्मातुश्चाप्य
नामयं॥ कच्चित्ते सर्वविद्यानामर्थाः प्रतिसंग्रहं॥ कच्चित्कुरूणामसतां तं शुश्रूषात
स्परोभवान्॥ कच्चित्स्मरसि मां नाना तव प्राणसखं गुरुं॥ एवं वदति योगींद्रे सा रा
ज्ञी विनयान्विता॥ स्वपुत्रेण स्वपदयो निपात्यैनमभाषत॥ एष पुत्रस्तव गुरो त्वमस्य
प्राणदः पिता॥ एष शिष्यस्तवापाद्योभवता करुणात्मना॥ अनेनबंधुभिस्तस्यमना
थं परिपालय॥ अस्मैसम्यक्सन्मार्गमुपदेष्टुंत्वमर्हसि॥ इति प्रसादितो राज्ञा शिवयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीमहामतिः॥ नस्नेहराजकुमारायस्मार्गमुपदिष्टवान्॥ कश्यपउवाच॥ अ
तिस्नेहलिप्तराणेषु क्रोधमंः सनातनः॥ वर्णाश्रमानुरूपेण निर्मुक्तः सर्वदा जनैः
भजवत्सलसंतापगंसहदेवचरितं चर॥ न देवानां विलंघ्येथा माकार्षीर्द्वेषहेलनं॥ गो
देवगुरुविप्रेषु भक्तिमानुभव सर्वदा॥ चंडालमपि संप्राप्तं सदा संभावयातिथिं
सत्यं न त्यज सर्वत्र प्राणैरपि प्राणसंकटे॥ गोब्राह्मणानां रक्षार्थं मत्यं वा यदि कश्चि
त्॥ परस्वेषु परस्त्रीषु देवब्राह्मणवस्तुषु॥ तृष्णां त्यज महाबाहो तुलेभे यदि वस्तु
षु॥ सत्कथायां सदाचारे सद्ग्रन्थेषु सदागमे॥ धर्मादिसंग्रहे नित्यं तृष्णां कुरु मह
मते॥ स्नाने जपे च होमे च स्वाध्याये पितृतर्पणे॥ गोदेवातिथिपूजासु निरालस्यो
७१ भवानघ॥ क्रोधं द्वेषं भयं शाठ्यं पैशुन्यमसदाग्रहं॥ कौटिल्यं दंभमुद्वेगं यत्ने ७१

परिवर्जय॥ सात्त्वधर्मेरतोपि त्वं यथाहिंसां परित्यज॥ शुष्कवैरं स्वपालापपर
निंदां च वर्जय॥ मृगयां द्यूतपानेषु स्त्रीषु स्त्रीविजितेषु च॥ असत्संसक्तिं च माका
र्षीस्तथा दुर्विषयेषु च॥ मैत्रीं कुरु सुसाध्येषु दुःखितेषु दयां कुरु॥ पुण्यकर्मसु च सं
तोषं मोदासीन्यं कुरु द्विषु॥ अत्याहारमतिक्रोधमतिनिद्रामतिश्रमं॥ अत्याला
पमतिक्रीडां सर्वदा परिवर्जय॥ अतिविद्यामतिश्रद्धामतिपुण्यमतिस्मृतिं
अत्युत्साहमतिख्यातिमतिधैर्यं च साधय॥ सकामो निजदारेषु सक्रोधो निजशत्रु
षु॥ सलोभः पुण्यनिचये साभ्यसूयो ह्यधर्मिषु॥ सद्वेषो भव पाषंडे सरागः सज्जनेषु
च॥ दुर्बोधो भव दुर्मंत्रे बधिरः पिशुनोक्तिषु॥ धूर्तैश्चंडैः शठैः क्रूरैः कितवैश्चपलैः खलैः॥
पतितैर्नास्तिकैर्जिह्मैर्दूरतः परिवर्जय॥ आत्मप्रशंसां माकार्षीः परनिंदां गतो भव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्तुर्वपुत्र॥ त्रिनेत्रुनास्यासक्तः सक्तो भव॥ पत्न्याः पतिव्रताया श्च जनन्याः श्वशुरस्य च॥ स
र्वेषां गुरोश्च वचने विश्वासं कुरु सर्वदा॥ आत्मरक्षापरो नित्यमप्रमत्तो दृढव्रतः॥ विश्वासं
नैव कुर्वीथाः स्वभ्रष्टेष्वपि कुत्रचित्॥ विश्वस्तं मा वधीः कंचिदपि घोरं महामते॥ अ
मायेषु न शंकेथाः संसारे न चलितो भव॥ अनाथं कृपणं वृद्धं स्त्रियं बालं निरागसं॥ परि
व रक्षेर्धनैः प्राणैर्बुध्या शक्तिबलेन च॥ अपि शत्रुं वधस्यार्हं मा वधीः शरणागतं॥ अप्यर्थी
पात्रं सुपात्रं वा नीचो नापि महत्तमः॥ यो वा को वापि याचेत तस्मै देहि शिरोपि च॥ अपि
यत्नेन महता कीर्त्तिमेव समार्जय॥ राज्ञां च विदुषां चैव कीर्त्तिरेव हि भूषणं॥ सत्कीर्त्तिप्र
भवा लक्ष्मीः पुण्यं सत्कीर्त्तिसंभवं॥ सत्कीर्त्त्या राजते लोकः श्रियं रुश्रेन्द्र कपायथा॥ गजाश्च
हेमनिचयं रत्नराशिं नगोपमं॥ अकीर्त्योपहतं सर्वं तृणवन्मुंच सत्वरं॥ मातुः कोपं पितुः
७२ कोपं गुरोः कोपं धनव्ययं॥ पुत्राणामपराधं च ब्राह्मणानां क्षमस्व भो॥ यथा द्विजाः प्रसीद ७२

युस्तथा ते कार्यं हितं चर॥ राजानं संकटे मग्नं मुद्धरेयुर्द्विजोत्तमाः॥ आयुर्यशो बलं सौख्यं
धनं पुण्यं प्रजोन्नतिः॥ कर्मणा येन जायेत तत्सेव्यं भवतानघ॥ देशं कालं च शक्तिं च का
र्यं चाकार्यमेव च॥ सम्यग्विचार्य यत्नेन कुरु कार्याणि सर्वदा॥ न कुर्याल्लक्ष्यविद्याधीं पर
बाधां निवारय॥ चोरांस्तु दस्यूञ्च्छत्रूंश्च बाधेथाः शक्तिमत्तया॥ स्नाने जपे च होमे च देवेपि
त्र्ये च कर्मणि॥ अत्वरो भव निद्रायां भोजने भव सत्वरः॥ दाक्षिण्ययुक्तमशठं सर्वजन
मनोहरं॥ अल्पाक्षरमनंतार्थं वाक्यं ब्रूहि महामते॥ अभीतो भव सर्वत्र विपत्स्वपि विप
त्सु च॥ भीतो भव ब्रह्मकुले पापे च गुरुशासने॥ ज्ञातिबंधुसुमित्रेषु भार्यासु तनयेषु च॥
समभावेन वर्त्तेथास्तथा भोजनपंक्तिषु॥ सतां हितोपदेशेषु तथा पुण्यकथासु च॥ विद्या
गोष्ठीषु धर्म्यासु कदाचिन्माभः पराङ्मुखः॥ श्रुतो पुण्यजलस्फीते प्रख्याते ब्रह्मसंकुले॥ म
हादेशे शिवमये त्वं भव तास सदा॥ कुलटा गणिका यत्र यत्र तिष्ठंति कामुकाः॥ दुर्देशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीचसंगाधेकदाचिदपिभावसा॥एकमेवाश्रितोपित्वं शिवंत्रिभुवनेश्वरं॥सर्वान्देवा
नुपासीथास्तद्दिनानिचमानय॥सदाशुचिःसदादक्षःसदाशांतःसदास्थिरः॥सदा
विजितषड्वर्गःसदाकांलोभवानघ॥विप्रान्वेदविदःश्रांतान्यतीश्चानियमोज्वलान्॥
पुण्यवृक्षान्पुण्यनदीःपुण्यतीर्थंमहत्सरः॥धेनुंचवृषभंरत्नंयुवतिंचपतिव्रतां॥
आत्मनोगृहदेवानिसहसेवनमस्कुरु॥उत्थायसमयेश्रालिस्याचम्यविमलाशयः॥
नमस्कृत्यात्मगुरवेध्यायेद्देवमुमापतिं॥नारायणंचलक्ष्मीशंब्रह्माणंचविनायकं॥
स्कंदंकात्यायनीदेवींमहालक्ष्मीसरस्वतीं॥इंद्रादीनथलोकेशान्पुण्यश्लोकान्नृपान
पि॥चिंतयित्वाथमार्तंडमुद्यंतंश्ररुणमेसदा॥गंधंपुष्पंचतांबूलंशाकंपक्कफलादिकं॥
शिवायदत्वोपभुंक्ष्वभक्ष्यंभोज्यंप्रियंनवं॥यद्दत्तंयत्कृतंजप्तंयत्स्नातंयद्धुतंस्तुतं॥य
७३ च्चैतन्मनपःसर्वंतच्छिवायनिवेदय॥भुंजानःपर्यटंस्तिष्ठंच्छयानोविरहन्नपि॥परंयच्छ ७३

ण्वंन्वरन्स्कंछिवमेवानुचिंतय॥रुद्राक्षकंकणलसत्करदंडयुग्मोभालांतरालधृत
भस्मसितत्रिपुंड्रः॥पंचाक्षरंपरिपठन्परमंत्रराजंध्यायेत्सदापशुपतेश्वरणंरनेथाः॥
इतिसंक्षेपतोवत्सकथितोधर्मसंग्रहः॥अन्येषुचपुराणेषुविस्तरेणप्रकीर्तितः॥अथा
परंसर्वपुराणगुह्यंनिःशेषपापौघहरंपवित्रं॥जयप्रदंसर्वविपत्प्रमोचनंवक्ष्यामिशै
वंकवचंहितायते॥ ॥इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेऋषभोपदेशोनामैकादशोध्या
यः॥ ॥ऋषभउवाच॥नमस्कृत्यमहादेवंविश्वव्यापिनमीश्वरं॥वक्ष्येशिवमयंवर्म
सर्वरक्षाकरंनृणां॥शुचौदेशेसमासीनोयथावत्कल्पितासनः॥जितेंद्रियोजितप्रा
णश्चिंतयेच्छिवमव्ययं॥हृत्पुंडरीकांतरसंनिविष्टंस्वतेजसाव्याप्तनभोवकाशं॥अतीं
द्रियंसूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहेशं॥ध्यानावधूताखिलकर्मबंधश्चिरंचि
स१ तानंदनिमग्नचेताः॥षडक्षरंन्यासंसमाहितात्माशैवेनकुर्यात्कवचेनरक्षां॥मांपातुदेवो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खिलदेवतात्मा संसारकूपे पतितं गभीरे ॥ नन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं
हृद्दिस्थं ॥ सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोरणी
यानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ यो भूः स्वरूपेण बिभर्ति विश्वं पायात्
स भूमेर्गिरिशोष्टमूर्तिः ॥ यो पां स्वरूपेण नृणां करोति संजीवनं सोवतु मां जलेभ्यः ॥ क
ल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ॥ स कालरुद्रोवतु मां
दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीति
कुठारपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां दिशि रक्षतु मामजस्रं ॥ कुठारवेदां
कुशपाशपाशशूलकपालढक्काक्षगुणान्दधानः ॥ चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायाद
घोरो दिशि दक्षिणस्यां ॥ कुंदेंदुशंखस्फटिकावभासो वेदाक्षमालावरदाभयांक
७४ कः ॥ त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोवतु मां प्रतीच्यां ॥ वराक्षमालाभयटंक ७४

हस्तः सरोजकिंजल्कसमानवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि
वामदेवः ॥ वेदाभयेष्टांकुशपाशटंककपालढक्काक्षकशूलपाणिः ॥ सितद्युतिः पं
त्री चमुखोवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥ मूर्धानमव्यान्मम चंद्रमौलिर्भालं म
माव्यादथ भालनेत्रः ॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ पा
याच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ॥ वक्त्रं सदा रक्षतु पंचवक्त्रो
जिह्वां हरो रक्षतु वेदजिह्वः ॥ कंठं गिरीशोवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः ॥
दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखांतकोव्यात् ॥ ममोदरं पातु गिरीं
द्रधन्वा मध्यं ममाव्यान्मदनांतकारी ॥ हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटि
रीश्वरो मे ॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोव्यात् ॥ जंघायुगं
पुंगवकेतुरव्यात्पादौ ममाव्यात्सुरवंद्यपादः ॥ महेश्वरः पातु दिनादियामे मां २

मध्यं यामे वतु वामदेवः॥ त्र्यंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे॥
यात्रिशशांकशेखरो मां गंगाधरो रक्षतु मां निशीथे॥ गौरीपतिः पातु निशा-
वसाने मृत्युंजयो रक्षतु सर्वकालं॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु
बहिःस्थितं मां॥ तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात्॥ तिष्ठंत-
मव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः॥ वेदांतवेद्योवतु मां निषण्णमा-
मव्ययः पातु शिवः शयानं॥ मार्गेषु मां रक्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः॥
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः॥ कल्पांतकाटोपप-
टुप्रकोपः स्फुटाट्टहासोच्चलितांडकोशः॥ घोरारिसेनार्णवदुर्निवारमहाभयाद्र-
७५ क्षतु वीरभद्रः॥ पत्त्यश्वमातंगघटावरूथसहस्रलक्षायुतकोटिभीषणं॥ अक्षौ- ७५

हिणीनां शतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया॥ निहंतु दस्यून्प्रलयान-
लार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशध-
नुः पिनाकः॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥
उत्पाततापविषभीतिमसद्ग्रहार्तिं व्याधींश्च नाशयतु मे जगतामधीशः॥२७॥ ॐ न-
मो भगवते सदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविहाराय सकललोकैककर्त्रे सकल-
लोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनि-
गमगुह्याय सकलवरप्रदाय सकलदुरितार्तिभंजनाय सकलजगदभयंकराय सक-
ललोकैकशंकराय शशांकशेखराय शाश्वतनिजाभासाय निर्गुणाय निरुपमाय नि-
राभासाय निरामयाय निष्प्रपंचाय निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय नि-
र्गमाय नित्यरूपविभवाय॥ निराधाराय नित्यशुद्धपरिपूर्णसच्चिदानंदाद्वयाय पर-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७८ मुखांत प्रकाशतेजोरूपाय॥ जय जय महारुद्र महारौद्र भद्रावतार महाभैरव काल
भैरव कल्पांतभैरव कपालमालाधर खट्वांग खड्ग चर्मपाशांकुश डमरु शूल चा
प बाण गदा शक्ति भिंडिमाल तोमर मुसल मुद्गर पट्टिश परशु परिघ भुशुंडी
शतघ्नी चक्राद्यायुध भीषणकर सहस्रमुख दंष्ट्राकराल विकटाट्टहास विस्फारित
ब्रह्मांड मंडल नागेंद्रकुंडल नागेंद्रहार वलय नागेंद्र चर्मधर मृत्युंजय त्र्यंबक त्रि
पुरांतक विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख
सर्वतो रक्ष रक्ष मां ज्वल ज्वल महामृत्युभयं नाशय नाशय सर्वरोगभयमुत्सादयो
त्सादय विषसर्पभयं शमय शमय चोरान् मारय मारय मम शत्रूनुच्चाटयोच्चा
टय शूलेन विदारय विदारय कुठारेण भिंधि भिंधि खड्गेन छिंधि छिंधि ख
ट्वांगेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय बाणैः संताडय संताडय ७८

रक्षांसि भीषय भीषय अशेषभूतानि विद्रावय विद्रावय कूष्मांड वेताल मारीगण ब्रह्मराक्ष
सान् संत्रासय संत्रासय ममाभयं कुरु कुरु वित्रस्तं मामाश्वासयाश्वासय नरकमहा
भयान्मामुद्धरोद्धर संजीवय संजीवय क्षुत्तृड्भ्यां मामाप्यायाप्यायय दुःखातुरं मा
मानंदयानंदय शिवकवचेन मामाच्छादयाच्छादय त्र्यंबक नमस्ते नमस्ते॥
॥ऋषभ उवाच॥ इत्येतत्कवचं शैवं वरदं व्याहृतं मया॥ सर्वबाधाप्रशमनं रहस्यं
सर्वदेहिनां॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमं॥ न तस्य जायते क्वापि भयं
शंभोरनुग्रहात्॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोपि वा॥ सद्यः सुखमवाप्नो वा
ति दीर्घमायुश्च विंदति॥ सर्वदारिद्र्यशमनं सौमंगल्यविवर्द्धनं॥ यो धत्ते कवचं
शैवं स देवैरपि पूज्यते॥ महापातकसंघातैर्मुच्यते चोपपातकैः॥ देहांते मुक्तिमा
प्नोति शिववर्मानुभावतः॥ त्वमपि श्रद्धया वत्स कवचं शैवमुत्तमं॥ धारयस्व म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दत्तं समर्घः श्रेयो ह्यवाप्स्यसि॥ सूत उवाच॥ इत्युक्तो ऋषभो योगी तस्मै पार्थिवसू-
नवे॥ ददौ शंखं महानादं खड्गं चारिनिषूदनं॥ पुनश्च भस्म संमंत्र्य तदंगं परिलि-
प्य राजसूनवे॥ गजानां षट्सहस्रस्य द्विगुणं च बलं ददौ॥ भस्मप्रभावात्संप्राप्तबलैश्व-
र्यधृतिस्मृतिः॥ स राजपुत्रः शुशुभे शारदेंदुरिव श्रिया॥ तमाह प्रांजलिं भूयः
स योगीन्द्रः पुनर्वचः॥ एष खड्गो महादिव्यस्तपोमंत्रानुभावितः॥ शितधारमिमं
खड्गं यस्मै दर्शयसे स्फुटं॥ स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयं॥ अस्य शं-
खस्य निर्ह्रादं ये शृण्वंति नवाहिताः॥ ते मूर्छिताः पतिष्यंति न्यस्तशस्त्रा विचेतनाः॥
खड्गशंखाविमौ दिव्यौ परसैन्यविनाशिनौ॥ आत्मसैन्यस्य पक्षाणां शौर्यतेजोवि-
वर्द्धनौ॥ एतयोश्च प्रभावेण शैवेन कवचेन च॥ द्विषट्सहस्रनागानां बलेन मह-
तापि च॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि॥ प्राप्स्यसि त्वं सनं पैत्र्यं गोप्ता-
७७ सि पृथिवीमिमां॥ इति भद्रायुषं सम्यगनुशास्य समातृकं॥ ताभ्यां संपूजितः ७७

सोथ योगी स्वैरगतिर्ययौ॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिववर्मकथ-
नं नाम द्वादशोध्यायः॥ ॥सूत उवाच॥ दशार्णाधिपतेस्तस्य वज्रबाहोर्महाभुजः॥
बभूव शत्रुर्बलवान्राजा मागधराट्ततः॥ स वै हेमरथो नाम बाहुशाली रणो-
त्कटः॥ बलेन महतावृत्य दशार्णान्न्यरुमद्दली॥ चमूपास्तस्य दुर्धर्षाः प्राप्य देशं
दशार्णकं॥ व्यलुंठन्त सुरत्नानि गृहाणि दुद्रुवुः परे॥ केचिद्दनानि जगृहुः केचि-
द्दारान्स्त्रियोपरे॥ गोधनान्यपरे जह्रुः केचिद्धान्यपरिच्छदान्॥ केचित्तु मंदि-
रस्थानि गृहोपानान्यनाशयन्॥ एवं विनाशितं राज्यं स्वं गोपजनजिघ्रवः॥ आ-
क्रम्य तस्य नगरीं वज्रबाहोस्तु मागधाः॥ एवं पर्याकुलं वीक्ष्य राजा नगरमेव च॥
पुरीय निर्जगाम स वज्रबाहुः ससैनिकः॥ वज्रबाहोश्च मत्पालास्तथा मात्रिपुरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सराः॥युयुधुर्मागधैः सार्द्धं निजघ्नुः शत्रुवाहिनीं॥वज्रबाहुर्महेष्वासो हस्तिनो
रथमास्थितः॥विकरन्बाणवर्षाणि चकार कदनं महत्॥दशार्णराजपुत्रं तं दृ
ष्ट्वा युद्धे सुदुःसहं॥तमेव तूर्णमावव्रुः सर्वे मागधसैनिकाः॥शस्त्रास्त्रैः सुचिरं युद्धं
मागधा दृढविक्रमाः॥तत्सैन्यं नाशयामासुर्लेभिरे च जयश्रियं॥केचित्तस्य रथं
जघ्नुः केचित्तद्धनुराच्छिनन्॥सूतं तस्यै जघानैकस्त्वपरः खड्गमाच्छिनत्॥सच्छि
न्नखड्गधन्वानं विरथं हतसारथिं॥बलाद्गृहीत्वा बलिनो बबंधुर्नृपतिं रुषा॥
तस्य मंत्रिगणं सर्वं तत्सैन्यं विजित्य ते॥मागधास्तस्य नगरीं विविशुर्जितकाशि
नः॥अश्वान्गजान्रथानुष्ट्रान्पशून्धान्यधनानि च॥जगृहुश्च युवतीः सर्वाश्चा
र्वंगीश्चैव कन्यकाः॥राज्ञो वरोधमहिषीर्दासीश्चैव सहस्रशः॥कोशांश्च रत्नसंपूर्णां

जह्रुस्ते ह्याततायिनः॥एवं विनाश्य नगरीं हृत्वा स्त्रीगोधनादिकं॥वज्रबाहुं बलाद्बध्वा
रथे स्थाप्य विनिर्ययुः॥एवं कोलाहले जाते राष्ट्रनाशे च दारुणे॥राजपुत्रोथ भद्रायुस्त
न्मातामशृणोद्बली॥पितरं शत्रुभिर्बद्धं पितृपत्नीस्तथा हृताः॥नष्टं दशार्णराष्ट्रं च श्रुत्वा
चुक्रोश सिंहवत्॥स खड्गं शंखमादाय वैश्यपुत्रसहायवान्॥हंसिनो हयमारुह्य कु
मारो विजिगीषया॥जवेनागत्य तं देशं मागधैरभिरक्षितं॥दह्यमाणं क्रंदमानं
हृतस्त्रीसुतगोधनं॥दृष्ट्वा राज्यं जनं सर्वं राजभ्रष्टं भयाकुलं॥क्रोधाध्मातमनास्तू
र्णं प्रविश्य रिपुवाहिनीं॥आकर्णाकृष्टकोदंडो ववर्ष शरसंततिं॥तेहन्यमाना रिप
वो राजपुत्रेण सायकैः॥तमभिद्रुत्य वेगेन शरैर्विव्युधुरुल्वणैः॥हन्यमानोस्त्रपूगेण
रिपुभिर्युद्धदुर्मदैः॥न चचाल रणे धीरः शिववर्मभिरक्षितः॥सोस्त्रवर्षं प्रसह्याशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रविश्यगजलीलया॥ जघानाश्वान्रथान्नागान्पदातीनपिभूरिशः॥ ततस्तैकेर
थिनंहत्वासस्त्रंतंनृपनंदनः॥ तमेवरथमास्थायवैश्यनंदनसारथिः॥ विचचाररणे
धीरःसिंहोमृगकुलेयथा॥ अथसर्वेषुसंरब्धाःशूराःप्रोद्यतकार्मुकाः॥ अभिसस्रु
स्तमेवैकंचमूपाःबलशालिनः॥ तेषामापततामग्रेखड्गमुद्यम्यदारुणं॥ अभियद्यो
महावीरोदर्शयन्निवपौरुषं॥ करालोलकजिह्वाभंतस्यखड्गंमहोज्वलं॥ दृष्ट्वैवसह
सामन्युश्चनृपास्त्रस्तभावनः॥ येयेपश्यंतितंखड्गंप्रस्फुरंतंरणांगणे॥ तेसर्वेनिधनं
जग्मुर्वह्निंप्राप्येवकीटकाः॥ अथासौसर्वसैन्यानांविनाशायमहाभुजः॥ शंखंदध्मौम
हारावंपूरयन्निवरोदसी॥ तेनशंखनिनादेनविषाक्तेनेवभयसा॥ श्रुतमात्रेणरिप
वोमूर्छितान्यपतन्भुवि॥ येश्वपृष्ठेरथेयेचयेचदंतिषुसंस्थिताः॥ तेविसंज्ञाःक्षणात्ते ७९

त्तुःशंखनादहतौजसः॥ तान्भूमौपतितान्सर्वान्नष्टसंज्ञान्निरायुधान्॥ विगणय्य
मृतप्रायान्नावधीद्धास्त्रधर्मवित्॥ आत्मनःपितरंबद्धंमोचयित्वारणाजिरे॥ तस्त्रीः
शत्रुवशगाःसर्वाःसद्योव्यमोचयत्॥ पत्नीश्चमंत्रिमुख्यानांतथान्येषांपुरौकसां॥ स्त्रि
योबालाश्चकन्याश्चगोधनादीन्यनेकशः॥ मोचयित्वारिपुभयात्समाश्वास्यतदाकु
लान्॥ तथारिसैन्येषुचरन्तेषांजग्राहयोषितः॥ मरुन्मनोजवानश्वान्मातंगान्गिरि
संनिभान्॥ स्यंदनानिचरौक्माणिदासीश्चरुचिराननाः॥ सर्वमाहृत्यवेगेनगृहीत्वा
तद्धनंबहु॥ मगधेशंहेमरथंनिबद्ध्यपराजितं॥ तन्मंत्रिणश्चभूपांश्चतन्मुख्यांश्च
नायकान्॥ गृहीत्वातरसाबध्वापुरींप्राविशद्द्रुतं॥ दृष्ट्वायेसमरेभग्नाविद्रुताःसर्वतोदिशं॥
तेमंत्रिमुख्याविश्वस्तानायकाश्चसमाययुः॥ कुमारविक्रमंदृष्ट्वासर्वेविस्मितमानसाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेमेनिरे सुरश्रेष्ठ कारणागेदोनस्तु वै ॥ अहोनः सुमहद्भाग्यमहोनस्तपसः फलं ॥ केनाप्य
नेन वीरेण मुक्ता तासां जीविताः खलु ॥ एषकिं योगसिद्धो बालपःसिद्धोथवामरः ॥ अमा
नुषमिदं कर्म यदनेन कृतं महत् ॥ नूनमस्य भवेन्माता सा गौरी स शिवः पिता ॥ असौ
हि भीनोनवकं जिगाया नैनराक्षिद्रक्षू ॥ इत्याश्चर्ययुता देहेः प्रसंसद्भिःपरस्परं ॥ ए
ष्टोमास्तजनेनासावात्मानं प्राहनत्वरः ॥ स्वभ्यागत्य स्वपितरं विस्मयाह्लादविकृवं ॥
मुंचंतमानंदजलं ववंदे प्रेमविह्वलः ॥ स राजा निजपुत्रेण प्रणयादभिवादितः ॥ आ
श्लिष्य गाढं तरसा बभाषे प्रेमकातरः ॥ राजा उवाच ॥ कस्त्वं देवो मनुष्यो वा गंधर्वो वाम
लमते ॥ कामातोजनकः कोधा को देशस्तव नाम किं ॥ कस्मान्नः शत्रुभिर्बद्धान्मोचयामि व
८० हनौजसः ॥ कारुण्यादिहसंप्राप्य सपत्नीकान मोचयः ॥ कुलोद्भवं त्वमिदं सौर्यं धैर्यं ८०

लेजोलोंवेन्नातिः ॥ जिगीषसीव लोकांस्त्रीन् सदेवासुरमानुषान् ॥ अपि जन्मस
हस्रेण तवारण्यं महौजसः ॥ कर्तुं नाहं समर्थोस्मि सहेभिर्दारबांधवैः ॥ इमास्तु त्रा
स्मिमाः पत्नीरिदं राज्यमिदं पुरं ॥ सर्वं विहाय मद्चित्तं त्वय्येव प्रेमबंधनं ॥ सर्वं कथय
मे तात महाप्राणपरिरक्षक ॥ एतासां मम पत्नीनां त्वदधीनं हि जीवितं ॥ स उवाच ॥ इ
ति पृष्टः स भद्रायुः स्वपित्रा तमभाषत ॥ एष वैश्यसुतो राजन् सुनयो नाम मत्स
खा ॥ अहमस्य गृहे रम्ये वसामि सह मातृकः ॥ भद्रायुर्नाम मद्वृत्तं पश्चाद्विज्ञाप
यामि ते ॥ पुरं प्रविश भद्रं ते सत्वरः ससुहृज्जनैः ॥ सत्कोभयमरातिभ्यो विरस्य य
थासुखं ॥ नैतान्सुचरितं स्नाय घावन्तामनंमम ॥ अहमद्य गमिष्यामि शीघ्रं मातुरन्ति
के शनैः ॥ इत्युक्त्वोपगम्य भद्रायुर्नृपनंदनः ॥ आजगाम स्वभवनं मात्रे सर्वं न्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदयत् ॥ सापि हृष्टा स्खलनं यं परिरेभे शुभलोचना ॥ स च वैश्यपतिः प्रेम्णा परिष-
ज्याभ्यनन्दयत् ॥ अत्र याकुश्च राजेंद्रः प्रविष्टो निजमंदिरं ॥ स्त्रीपुत्राभ्यां समं हितः
स्नेहेन समतुलं ययौ ॥ तस्यां निशायां स तुष्टायां वैश्यो ऋषभो योगिनां वरः ॥ चंद्रांग-
दं समागत्य सीमंतिन्याः पतिं स्वयं ॥ भद्रायुषः समुत्पत्तिं तस्य कर्मोपमानुषं ॥
आवेदयद्रहसि प्रेम्णा तत्सुतां कीर्तिमालिनीं ॥ भद्रायुषे प्रयच्छेति बोधयित्वा च मे-
षधं ॥ ऋषभो निर्जगामाथ देशकालार्थतत्त्ववित् ॥ अथ चंद्रांगदो राजा शुभेऽह्नि मंग-
लोचिते ॥ भद्रायुषं समाहूय प्रायच्छत्कीर्तिमालिनीं ॥ कृतोद्वाहः स राजेंद्रः कुमारः स-
८१ हभार्यया ॥ हेमासनस्थः शुशुभे रोहिण्येव निशाकरः ॥ वज्रबाहुं तत्पितरं समाहूय ८१

पुरः प्रवेश्य सामात्यं प्रत्युद्गम्याभ्यनन्दयत् ॥ तत्रापश्यत्स तोद्वाहं भद्रायुषमरिंदमं ॥
पादयोः पतितं प्रेम्णा हृष्टां तं परिषस्वजे ॥ एष मे प्राणदो वीर एष शत्रुनिबर्हणः ॥ अघाप्य-
शान्तवंशोऽयं मयानंतपराक्रमः ॥ एष ते न्वपजामाता चंद्रांगद महाबलः ॥ अस्य वंशाभ-
थोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ इत्थं दशार्णराजेन प्रार्थितो निषधाधिपः ॥ विविक्त उप-
संगम्य प्रहसन्निदमब्रवीत् ॥ एष ते तनयो राजन्वैश्येन रोगपीडितः ॥ त्वया वने परित्यक्तः
सह मात्रा रुजार्तया ॥ परिभ्रमंती विपिने सा नारी शिशुना सह ॥ दैवाद्वैश्यगृहं प्राप्ता ते-
न वैश्येन रक्षिता ॥ अथासौ व्रणरोगार्तो मृतस्तद्वत्कुमारकः ॥ केनापि योगिराजेन
मृतः संजीवितः पुनः ॥ ऋषभाख्यस्य तस्यैव प्रभावाच्छिवयोगिनः ॥ रूपं च देवसदृशं प्रा-
प्तो मातृकुमारकौ ॥ तेन दत्तेन खड्गेन शंखेनारिघातिना ॥ जिगाय समरे शत्रूंश्छिद्य व-
र्माभिरक्षितः ॥ द्विषट्सहस्रनागानां बलमेको बिभर्त्यसौ ॥ सर्वविद्यासु निष्णातो मम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जामात्रु तां गतः ॥ अनंतरं नंस मादाय मातरं वास्य सुश्च तां ॥ गच्छ स्व नगरीं राजन्ना
स्य से श्रेयमुत्तमं ॥ इति चंद्रांगदः सर्वमाख्यायानंगहे स्थितं ॥ तस्यागः पत्नीमाहूय
दरीधामास भूषितां ॥ इत्यादि सर्वमाकर्ण्य हृष्टाच स महीपतिः ॥ व्रीडितो निमग्नोभो
दयोत्स्वकृतं कर्म गर्हयन् ॥ आनम्य परमानंदं नयोदर्शनकौतुकात् ॥ पुलकांचितस
र्वांगः तावुभौ परिषस्वजे ॥ एवं निषधराजेन रत्निनश्याभिनंदितः ॥ स भोजयित्वा तं
सम्यक् कृत्य पंच सह मंत्रिभिः ॥ तमालतनो ग्रमहिषीं तं पुत्रं तामपि स्नुषां ॥ आदाय स
परिवारो नत्वा बाहुः पुरीययो ॥ स संभ्रमेण महता भद्रायुः पितृमंदिरं ॥ संप्राप्य
परमानंदं चक्रे सर्वपुरौकसां ॥ कालेन दिवमारूढे पितरि श्रामथो वनः ॥ भद्रायुः पृ
८१ थिवीं सर्वां शशास धुन नशासनः ॥ मागधेशं हेमरथं मोचयामास बंधनात् ॥ सं ८२
धाय मैत्रीं परमां ब्रह्मपरायण स्वसन्निधौ ॥ इत्थं त्रिलोकमहितां शिवयोगी प्रजां कृतौ

पुरातन भवे पि स राजसूनुः ॥ निस्तीर्य दुःसहविपत्कणमात्मराज्यं चैश्वर्यं द्रांगदस्य
सुतया सह साधु रेमे ॥ ७ ॥ इति श्रीब्रह्मोत्तरखंडे भद्रायुविवाहकथनं नाम त्रयोद
शोध्यायः ॥ ॥ सूत उवाच ॥ आनसिंहासनो वीरो भद्रायुः स महीपतिः ॥ अविवेशावनं
रम्यं कदाचित्स्त्रियया तत्स्त्रिन्विकसिताशोक प्रसून नवपल्लवे ॥ प्रोत्फुल्लमल्लिकाखंड
उत्फुल्लद्रुम संकुले ॥ नवकेसरसौरभ्य बद्धरागि जनोत्सवे ॥ स घुःकोरकिताशोक
तमालगहनांतरे ॥ प्रसूनप्रकरानम्र माधवीवनमंडपे ॥ प्रवालकुसुमापोलतू
चरन्तारकाभिरंजिते ॥ पुन्नागवनविश्रांतपुंस्कोकिलविराविणि ॥ वसंतसमये
रम्ये विजहार स्त्रिया सह ॥ अथाविदूरे क्रंदंतौ धावंतौ द्विजदंपती ॥ अत्यंतीयमा
णौ व्याघ्रेण ददर्शोत्रुप सत्तमः ॥ पाहि पाहि महाराज हा नाथ करुणानिधे ॥ एष आ
याति शार्दूलो जग्धुमावां महारवः ॥ एष पर्वत संकाशः सर्व प्राणिभयंकरः ॥ यावन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कैरवादलिप्राप्यतावन्नोरसभूपते॥इत्युमाक्रंदितं श्रुत्वा राजा धनुःशरादृते॥तावत्प्रा
गत्य राजासाइ लोमध्ये जग्राह तां वधूं॥हा नाथ नाथ हा कांत हा रां भो हा जगत्पते॥
इति रोरूयमाणां तां यावज्जहे ग्रो भीषणः॥तावत्स राजा निशितैर्भल्लैर्व्याघ्रमताड
त्॥न चैनेविव्यथे किंचित्किरीडइव वृष्टिभिः॥सा दैत्योमहासत्वो राक्षसेंद्र रुतव्य
यः॥बलादादाय तां नारीं प्रपाक्रमनसत्वरः॥व्याघ्रेणापहृतां पत्नीं वीक्ष्य वीरोतिदुः
खितः॥रुरोद हा प्रिये प्रिये बालेहा कांते हा पतिव्रते॥एवमाभिहसंत्यज्य कथं लोकां
ल्लंगता॥प्राणेभ्योपिप्रियां सक्ता कथं जीवितुमुत्सहे॥राजन्नकृतेन महाप्राणिक
ले श्लोध्यं महद्धनुः॥धनेकादशसाहस्रमहानागातिगंबलं॥किं नेशास्वेन खड्गेन
८३ किं नेमंत्रास्त्रविद्यया॥किं सत्येन प्रतापेन किं प्रभावेण भूयसा॥न सर्वं विफलं जा ८३

यत्राद्य न्यस्यतिष्ठति॥यस्त्वं वनौकसं जंतुं निवारयितुमक्षमः॥क्षात्रस्यायं परो
धर्मः सतां यत्परिरक्षणं॥तस्मात्कुलोचितेधर्मे नष्टे लज्जीविनेन किं॥आर्तानां शर
णार्तानां त्राणं कुर्वंति पार्थिवाः॥प्राणेरथैश्चधर्मे सास्तद्विहिनाम्नपोपमाः॥धनीनां लो र
दानहीनानां जीवितं मरणोपमं॥आर्तत्राणविहीनानां माहस्युद्य॥द्विस्तुतावरं॥
वरं विषाशनं राज्ञो वरमग्नौ प्रवेशनं॥अनाथानां प्रपन्नानां तु पणानामरक्षणा
त्॥इत्थं विलपितं तस्य स्वचीर्यस्य च गर्हणं॥निशम्य नृपतिः शोकाद्रसन्त्येव विचिं
नयत्॥अहो मे पौरुषं नष्टं मघदैवविपर्ययात्॥अद्य कीर्तिश्च मे नष्टा पालकं शान्तु
कटं॥धर्मः कालोचितो नष्टो मंदभाग्यस्य दुर्मतेः॥नूनं मे संपदो राज्यमायुश्च क्षयमे
ष्यति॥आरंषिसंपदो भोगाः पुत्रदारधनानि च॥दैवेन क्षणमुद्यंति क्षणादस्तंप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लो॰

जंति च॥ अनघं तं द्विजन्मानं हतवानस्मि चार्पितं॥ गतशोकं करिष्यामि दत्वा प्राणान
पि प्रियान्॥ इति निश्चित्य मनसा भक्तानुकंपनंदनः॥ पतित्वा पादयोस्तस्य वभाषे परि
तोलयन्॥ कृपां कुरु मयि ब्रह्मन् ब्रह्मवंधो हतो ऽसि॥ शोकं त्यज महाबुद्धे दास्याम्य
र्थं तवेप्सितं॥ इदं राज्यमिदं राज्ञी ममेदं च कलेवरं॥ त्वदधीनमिदं सर्वं किं ते ऽभिल
षितं वद॥ ब्राह्मण उवाच॥ किमादर्शेन चांधस्य किं गृहे भैक्षजीविनः॥ किं पुस्तकेन
मूढस्य निस्त्रीकस्य धनेन किं॥ अनीहं गतपत्नीको भुंक्ष्ये भोगान कहिं चित्॥ इमां तवा
ग्रमहिषीं कामये दीयतामियं॥ राजोवाच॥ ब्रह्मन्नूं किमेष धर्मस्ते किमेनं कुरु शास
नं॥ अस्वर्ग्यमयशस्यं च परदाराभिमर्शनं॥ दातारः संति वित्तस्य राज्यस्य गजवाजि
८४ नां॥ आत्मदेहस्य दाता पि कलत्रस्य न कर्हिचित्॥ परदारोपभोगेन यत्पापं समुपा ८४

अरक्षणाद्यार्त्तानां गंतास्मि निरयं ध्रुवं॥ इति विप्रगिरा भिन्नश्चिंतयामास पार्थिवः॥ अरणान्महत्पापं
पत्नीदानं ततो वरं॥ २

र्जितं॥ न तत्क्षालयितुं शक्यं प्रायश्चित्तशतैरपि॥ ब्राह्मण उवाच॥ अपि ब्रह्मवधं घोर
मपि मद्यनिषेवणं॥ तपसा नाशयिष्यामि किं पुनः पारदारिकं॥ तस्मात्स्वपत्नीं भार्यां मे मां त्वं
ध्रुवमन्यथा॥ अतः पत्नीं द्विजाग्र्याय दत्वा निष्कृतकिल्विषः॥ स घोरवह्निं प्रवेक्ष्यामि कीर्ति
श्चाम्निहता भवेत्॥ इति निश्चित्य मनसा समुज्वाल्य हुताशनं॥ तं ब्राह्मणं समाहूय ददौ प
त्नीं सहोदकां॥ स्वयं स्नातः शुचिर्भूत्वा प्रणम्य विबुधेश्वरान्॥ तमग्निं त्रिः परिक्रम्य शि
वं दध्यौ समाहितः॥ तमथाग्नौ पतिष्यंतं स्वपदासक्तचेतसं॥ प्रत्यषेधत विश्वेशः प्रादुर्भू
तो जगत्पतिः॥ तमीश्वरं पंचमुखं त्रिनेत्रं पिनाकिनं चंद्रकलावतंसं॥ आलंबिताविंगज
टाकलापं मध्यं गभाभास्करकोटितेजसं॥ स्फुरणालगौरं गजचर्मवाससं गंगातरंगोक्षित
मौलिदेशं॥ नागेंद्रहारावलिकंकणोर्मिकाकिरीटकांच्यंगदकुंडलोज्वलं॥ भस्मासितं वृ

गकुठारचर्ममृगाभयेष्टा अपिनाकहस्तं॥ रक्षोपरिस्थं शशिनीलकंठमीशं प्रोद्युन्नमग्रे न्यप
तिद्ददर्श॥ अथांबरस्तु तं पेतुर्दिव्याः कुसुमवृष्टयः॥ प्रणेदुर्देवतूर्याणि देवाश्च ननृतुर्जगुः॥
तमाजग्मुर्नारदाद्याः सनकाद्याः सुरर्षयः॥ इंद्रादयश्च लोकेशास्तथा ब्रह्मर्षयोमलाः॥ ते
षां मध्ये समासीनो महादेवः सहोमया॥ ववर्ष करुणासारं भक्तिनम्रे महीपतौ॥ तद्दर्शना
नंदविज्जृंभितांतराशयः॥ प्रहृष्टवाष्पांबुपरिप्लुतांगः॥ सहर्षरोमा गलगद्गदाक्षरं तुष्टा
व गीर्भिर्मुकुलीकृतांजलिः॥ राजोवाच॥ नतोस्म्यहं देवमनादिमव्ययं प्रधानमव्यक्तमगु
णं महांतं॥ अकारणं कारणकारणं परं शिवं चिदानंदघनं प्रकाशं॥ त्वं विश्वसाक्षी जग
तोस्य कर्ता निगूढधामा हृदि सन्निविष्टः॥ अतो विचिचेतिधियाधिपश्चितो योगैर
नेकैः कृतचित्तरोधैः॥ एकास्तनाभावयतां त्वमेको नानाधियां यस्त्वमनेकरूपः॥ अतींद्रि
८५ यं शाश्वदपास्तविभ्रमं मनःपथासंहितयातेपदं ते॥ नतोंऽधुरा पंच चसोधिधियश्च व्यपेतमो ८५

हं परमात्मरूपं॥ गुणैकनिष्ठाः प्रकृतौ विलीनाः॥ कथं नु नः स्तोतुमरं गिरो मे॥ तथापि भ
क्त्याश्रेयतोंघ्रिपेयुषस्तवांघ्रिपद्मं प्रणतार्तिभंजनं॥ सुघोरसंसारदवाग्निपीडितो भजा
मि नित्यं भवभीतिशांतये॥ नमस्ते देवदेवाय महादेवाय शंभवे॥ नमस्त्रिपुरनिर्भेदाय
सर्गस्थितिसंतकारिणे॥ नमो विश्वादिरूपाय विश्वप्रत्ययसाक्षिणे॥ नमः सन्मात्रतत्वाय
बोधानंदघनायते॥ सर्वक्षेत्रनिवासाय क्षेत्रभिन्नात्तराक्तये॥ असंकाय नमस्तुभ्यं स्व
काभासाय भूयसे॥ निराभासाय नित्याय सत्यज्ञानांतरात्मने॥ विशुद्धाय विरूपाय विमु
क्ताशेषकर्मणे॥ नमो वेदांतवेद्याय वेदमूलनिवासिने॥ नमो विविक्तचेष्टाय निर्जितगु
णारतये॥ नमः कल्याणवीर्याय कल्याणफलदायिने॥ नमोनंताय महते शांताय शिव
रूपिणे॥ अघोराय सुघोराय घोराघोघविदारिणे॥ भर्गाय भवबीजानां भंजनाय गरी
यसे॥ नमो विध्वस्तमायाय विज्ञानास्तगुणायते॥ पाहि मां जगतां नाथ पाहि शंकर शाश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ला॥ पाहि रुद्र विरूपाक्ष पाहि मृत्युंजयाव्यय॥ शंभो शशांककृतशेखर शैलमत्ते गौरीशाये
पतिनिवेशकृतात्मने च॥ गंगाधरांगजविदारणपुण्यकीर्ते भक्तेशभक्तवरदेव नमस्समस्त
नमस्ते॥ सूत उवाच॥ एवं स्तुतः स भगवान्नृपराज्ञा देवो महेश्वरः॥ प्रसन्नः सह पार्वत्या प्र
रूपा च दयानिधिः॥ ईश्वर उवाच॥ राजंस्ते परितुष्टोस्मि भक्त्या पुण्यस्तवेन च॥ अनन्य
चेता यो नित्यं समाराधयसे प्रज॥ तव भावपरिस्पार्थं द्विजो भव्याहमागतः॥ व्याघ्रेण
या परित्रस्ता सैषा देवी गिरींद्रजा॥ व्याघ्रो मायामयो यस्ते तारे रक्तविग्रहः॥ धीरतां
८५ कर्तुकामस्ते पत्नीं याचितवानहं॥ अस्याश्च कीर्तिमालिन्यास्तव भक्त्या च मानद॥ तुष्टो
हं संप्रयच्छामि वरं वरय दुर्लभं॥ राजोवाच॥ एष एव वरो देव यत्त्वान्परमेश्वरः॥
भवतापपरीतस्य मम प्रत्यक्षतां गतः॥ नान्यं वरं वृणे देव भवतो वरदर्षभात्॥ ८५

म अहं च सेयं सा राज्ञी मम माता च मत्पिता॥ वैश्य पद्माकरो नाम तत्सुतः सुनयाभिधः॥
सर्वाने तान्महादेव सदा त्वत्सान्निध्ये गानुकुरु॥ सूत उवाच॥ अथ राज्ञी महाभागा प्रणता
कीर्तिमालिनी॥ भक्त्या प्रसाद्य गिरिशं याचे वरमुत्तमं॥ राज्ञी उवाच॥ चंद्रांगद
मम पिता माता सीमंतिनी च मे॥ तयोर्याचे महादेव त्वत्सान्निध्ये संनिधिं सदा॥ एवमस्त्वि
ति गौरीशः प्रसन्नो भक्तवत्सलः॥ तयोः कामवरं दत्वा क्षणादंतर्हितोभवत्॥ सोपि रा
जा सुरैः श्लाघ्यं प्रसादं प्राप्य मालिनः॥ सहितः कीर्तिमालिन्या बुभुजे विषयान्प्रियान्॥
रूत्सौ वर्षायुतं राज्यमव्याहतबलोन्नतिः॥ राज्यं पुत्रे प्रविन्यस्य भेजे शंभोः परं पदं॥
चंद्रांगदोपि राजेंद्रो राज्ञी सीमंतिनी च सा॥ भक्त्या संपूज्य गिरिशं जग्मतुः शांभवं पदं॥
एतत्सविचित्रमघनाशकरं विचित्रं शंभोर्गुणानुकथनं परमं रहस्यं॥ यः श्रावयेद्बुधजना
न्श्रयतः पठेद्वा संप्राप्त भोगविभवः शिवमेति सोंते॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भद्रायोर्मा माहात्म्यकथनेनाम चतुर्दशोध्यायः॥ सूत उवाच॥ ऋषभस्यानुभावोयं
वर्णितः शिवयोगिनः॥ अथान्यस्यापि वक्ष्यामि प्रभावं शिवयोगिनः॥ भस्मनश्चापि
माहात्म्यं वर्णयामि समासतः॥ इन्द्रकृत्याभविष्यं लियश्रुत्वापापिनोपिहि॥ अस्ति कोपि
महादेवी स्वयं शिवयोगी महातपाः॥ निर्द्वंद्वो निर्ममः शान्तो निःसंगः समदर्शनः॥ आत्मा
रामो जितक्रोधो गृहदारविवर्जितः॥ अनिकेतगतिर्मौनी संतुष्टो निष्परिग्रहः॥
भस्मोद्धूलितसर्वांगो जटामंडलमंडितः॥ वल्कलाजिनसंवीतो भिक्षान्नात्रपरि
ग्रहः॥ स एकदा चरन् लोके सर्वानुग्रहतत्परः॥ क्रौंचारण्यं महाघोरं प्रविवेशापदृच्छ
या॥ तस्मिन्निर्मनुजेरण्ये तिष्ठत्येको विभीषणः॥ सुदुष्टात्मा कुलिलोनिर्दयः कश्चिद्ब्रह्म
राक्षसः॥ तं प्रविष्टं शिवात्मानं सदृष्ट्वा ब्रह्मराक्षसः॥ अभिदुद्राव वेगेन जरठं क्षुत्समि
८७ पीडितः॥ व्यात्ताननं महाकायं भीमदंष्ट्रं भयानकं॥ तमायांतमभिप्रेक्ष्य योगीशोनच ८७

चालसः॥ अथाभिद्रुत्य तरसा स घोरो वनगोचरः॥ दोर्भ्यां निष्पीड्य जग्राह निःशंकं शि
वयोगिनं॥ तदंगस्पर्शनादेव स घोरो विध्वस्तकिल्बिषः॥ स ब्रह्मराक्षसो घोरो विशदांत
रिमापयो॥ यथा चिंतामणिं स्पृष्ट्वा लोहः कांचनतां व्रजेत्॥ यथा मानससंभेदे स वाय
सो याति हंसतां॥ यथामृतं समास्वाद्य नरो देवत्वमाप्नुयात्॥ तथैव हि महात्मनो दर्श
नस्पर्शनादिभिः॥ सद्यः पुनंति संघोपेतान्सत्संगो दुर्लभो ह्यलं॥ यः पूर्वं क्षुत्पिपासार्तो घो
रात्मा घोरमाविवनेचरः॥ स सद्यस्तृप्तिमापन्नः पूर्णानंदो बभूव ह॥ तदा ज्वलनसंनिभ
स्मकणानुविद्धः स घोविधूतघनपातकः स्वभावतः॥ संप्राप्य परं वैभवं संस्मृत्य तु गतं कौ
यस्तस्यादपृथगद्गले पतितो बभाषे॥ प्रसीद मे महायोगिन् प्रसीद करुणानिधे॥ प्रसी
द भवलतानां मानं दाम्नं तवारिधे॥ क्वाहं पापमतिर्घोरः सर्वप्राणिभयंकरः॥ क्व ते महानु
भावस्य दर्शनं करुणात्मनः॥ उद्धरोद्धर मां घोरे पतितं दुःखसागरे॥ तवांगसन्निधिमात्रेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ॰ स्तो॰

महानंदोस्मि वर्द्धने॥ वामदेव उवाच॥ कस्त्वं वनेचरो घोरो राक्षसो त्र किमास्थितः॥ क
थमेतां महाघोरां कष्टां गतिमवाप्तवान्॥ राक्षस उवाच॥ पार्थिवोहमितः पूर्वं पंचविंश
तिके भवे॥ गोमायवन राष्ट्रस्य उज्जैयो नाम वीर्यवान्॥ सोहं दुरात्मा पापीयानु स्वे[illegible] री
मनोत्कटः॥ दंडधारी दुराचारः प्रजानां घोर निर्घृणः खलः॥ पुत्रारूढ कलत्रोपि कामा
सक्तो जितेंद्रियः॥ इमां पापीयसीं चेष्टां पुनरेकां गतोस्म्यहं॥ प्रसह्य ललनामन्यां नारी
भो कुमनाः सदा॥ आहृताः सर्वदेशेभ्यो नार्यो भ्रष्टा मे पापया॥ भुक्ता भुक्ता परित्यक्ता
मेकामेकां दिने दिने॥ अंतर्गेहे पुंसः स्वापपुनरन्याः स्त्रियो हताः॥ एवं स्वशक्त्या सरेरा
ष्ट्र लक्ष्य देशाकरग्रामपुरप्रजेषु॥ आहृत्य नार्यो रमिता दिने दिने भुक्ता पुनः क्वापि
न भुज्यते मया॥ तथान्येश्च नर्भुज्यंते मया भुक्तास्तु याः स्त्रियः॥ अंतर्गेहे च निहिताः
८८ शोचंते च दिवानिशं॥ ब्रह्मविट्क्षत्रशूद्राणां यदा नार्यो हता मया॥ मम राज्ये स्थिता ८८

विशः सह दारैः प्रदुद्रुवुः॥ समस्तकाश्च कन्याश्च विधवाश्च रजस्वलाः॥ आहृत्य
यो रमिता मया का [illegible] हता स्त्रना॥ त्रिशतं द्विजनारीणां राजस्त्रीणां चतुःशतं [illegible] ह्रा
तं वैश्यनारीणां सहस्रं शूद्रयोषितां॥ शतं च अंत्यनारीणां पुलिंदानां सहस्रकं॥ रोल्ल
बाणां पंचशतं रजकीनां चतुःशतं॥ असंख्या वारमुख्याश्च मया भुक्ता दुरात्मना॥
तथापि मायिकामस्य न तृप्तिः समजायत॥ एवं दुर्विषयासक्तमत्तपानरतं सदा॥ यौ
वनेपि महारोगाथि विविशु य स्मकादयः॥ रोगार्दितोन पत्यश्च रात्रुभिश्चापि पीडितः॥
त्यक्तो भासैश्च भृत्यैश्च मृतोहं स्वेन कर्मणा॥ आपुर्विन रस्यस्य यशो विवर्द्धनो भाग्यं
स्सयं यास्त भियालिदुर्गतिः॥ स्वर्गोश्चवं ते पितरः पुरातनाः धर्मव्यपेतस्य नरस्य नि
श्चयं॥ अथाहं किं करेयोम्ये नरलोये वस्त्रकालयं॥ ततोहं नरके घोरे रेतःकुंडे निपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिनः॥तत्राहं नरके घोरे वर्षाणामयुतत्रयं॥ रेतःपिबन्पीड्यमानो न्यवसं यमकिंक
रैः॥ ततः पापावशेषेण पिशाचो निर्जने वने॥ सहस्रत्रिंशः संजातो नित्यं क्षुत्तृट्समा
कुलः॥ पैशाचीं गतिमाश्रित्य नीतो दिव्यं शरच्छतं॥ द्वितीये हं भवे जातो व्याघ्रः प्राणिभ
यंकरः॥ तृतीये जगरो घोरश्चतुर्थे हं भवे वृकः॥ पंचमे विड्वराहश्च षष्ठे हं कृकलास
कः॥ सप्तमे सारमेयो हं सृगालश्चाष्टमे भवे॥ नवमे गवयो भीमो मृगो हं दशमे भवे॥
एकादशे मर्कटश्च गृध्रो हं द्वादशे भवे॥ त्रयोदशे हं नकुलो वायसश्च चतुर्दशे॥ अच्छ
भल्लः पंचदशे षोडशे वनकुक्कुटः॥ गर्दभो हं सप्तदशे मार्जारोष्टादशे भवे॥ एकोनविं
शे मंडूकः कूर्मो विंशतिमे भवे॥ एकविंशे भवे मत्स्यो द्वाविंशे मूषको भवे॥ उलूको हं
त्रयोविंशे चतुर्विंशे वनद्विपः॥ पंचविंशे भवे चास्मिन् जातो हं ब्रह्मराक्षसः॥ क्षुत्परी
८९ तो निराहारो वसाम्यत्र महावने॥ इदानीमागतं दृष्ट्वा भवंतं जग्धुमुत्सुकः॥ त्वद्दे ८९

हस्पर्शमात्रेण जातः पूर्वभवस्मृतिः॥ गतजन्मसहस्राणि स्मराम्यद्य त्वदंतिके॥ निर्वे
दश्च परो जातः प्रसन्नं हृदयं च मे॥ ईदृशोयं प्रभावस्ते कथं ब्रूहि महामते॥ तपसा वा
पि तीव्रेण किमु तीर्थनिषेवणात्॥ योगेन देवशक्त्या वा मंत्रैर्वानंतशक्तिभिः॥ तत्त्वतो
ब्रूहि भगवंस्त्वामहं शरणं गतः॥ वामदेव उवाच॥ एष मत्तनुलग्नस्य प्रभावो भस्मनो
महान्॥ यत्संपर्कात्तमोवृत्तेस्तवेयं मतिरुत्तमा॥ को वेद भस्मसामर्थ्यं महादेवादृते परः॥
दुर्विभाव्यं यथा शंभोर्माहात्म्यं भस्मनस्तथा॥ पुरा भवादृशः कश्चिद्ब्राह्मणो धर्मवर्जि
तः॥ द्राविडेषु स्थितो मूढः कर्मणा शूद्रतां गतः॥ चौर्यवृत्तिर्नैकृतिको वृषलीरतिला
लसः॥ कदाचिज्जारतां प्राप्य शूद्रेण निहतो निशि॥ तच्छवस्य बहिर्ग्रामात्सृष्टिमस्या
पेतकर्मणः॥ चचार सारमेयोंगे भस्मपादोपदग्धया॥ अथ तं नरके घोरे पतितं शि
वकिंकराः॥ निन्युर्विमानमारोप्य यमसह्य यमकिंकरान्॥ शिवदूतान् समभेत्य यमो

ब्रो०

पिपरिपृष्टवान्॥ महाकालककर्त्तारं कथं तेनानिनीषथ॥ अथोक्तः शिवदूतास्ते पश्य
न्स्तावा विगहे॥ वसोललाटदोमंतान्यं किंतानि सुभस्मना॥ जनहनं समागेतुमा
गताः शिवस्यासनान्॥ नास्मान्निषेधुं शक्तोसि मास्त्वं च न यमं शरण॥ इत्याभाष्य यमं
शंभोर्दूतास्तं ब्राह्मणं ततः॥ पश्यतां सर्वलोकानां निन्युर्लोकमनामयं॥ तस्मादर्
शेषपापानां संघः संशोधनं परं॥ शंभोर्विभूषणं भस्म सततं ध्रियते मया॥ इत्थं मे
शाम्य महात्म्यं भस्मनो ब्रह्मराक्षसः॥ विस्तरेण पुनः श्रोतुं मौलं त्यादिदं नाथ तो॥
९० साधुसाधु महायोगिन् धन्योस्मि तव दर्शनात्॥ मोचितो मे च यद्धर्मात्मन् घोराद् ९०
स्मात्कुजन्मनः॥ किंचिदस्ति मे भाति मम पुण्यं पुराकृतं॥ अहो हं त्वत्प्रसादेन मोक्ष्ये
स्मान्दुर्बंधनान्॥ एकस्मै शिवभक्ताय तस्मिन्पार्थिवजन्मनि॥ भूमिर्दत्ता करीदत्ता
सस्या रामान्विता मया॥ पमेनापिन देवो कं पंचविंशति के भवे॥ कस्यचिद्योगिनः

संगमो स्यसेसं स्थले रितिः॥ तदप्यकुलितं पुण्यं यत्किंचित्प्रागभवार्जितं॥ यत्तोनि
मे कुजे रण्ये संप्राप्तस्त्वत्संगमः॥ अतो मां घोरपापान्नं संसरंतं कुजन्मनि॥ समुद्ध
रकृपासिंधो दत्वा भस्म समंत्रकं॥ कथं धार्यमिदं भस्म को मंत्रः को विधिः शुभः॥
कः कालः कश्च वा देशः सर्वं कथय मे गुरो॥ भवादृशा महात्मानः सर्वलोकहिते रताः॥
आत्मनो हितमिच्छंति कल्पवृक्षस्य धर्मिणः॥ सूत उवाच॥ इत्युक्तस्तेन योगीशो घो
रेण वनचारिणा॥ अयोपि भस्ममाहात्म्यं वर्णयामास तत्वतः॥ ॥ इति श्रीस्कंदपु
राणे ब्रह्मोत्तरखंडे भस्ममाहात्म्यकथनं नाम पंचदशोध्यायः॥ वामदेव उवाच॥
पुरा मंदरशैलेंद्रे नानाधातुविचित्रिते॥ नानारत्नसमाकीर्णे नानाद्रुमलताश्रमे॥
कोलाग्निरुद्रो भगवान्कदाचिद्विश्ववंदितः॥ समासमादसौ भूतेशः स्वेच्छया पर
मेश्वरः॥ समंतात्समुपातिष्ठन्रुद्राणां शतकोटयः॥ तेषां मध्ये समासीनो देवदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रिलोचनः॥ तत्रागच्छत्सुरश्रेष्ठो देवैः सह पुरंदरः॥ तथाग्निर्वरुणो वायुर्यमो वै
श्रवणस्तथा॥ गंधर्वाश्चित्रसेनाद्याः खेचराः पन्नगादयः॥ विद्याधराः किंपुरुषाः
सिद्धाः साध्याश्च गुह्यकाः॥ ब्रह्मर्षयो वशिष्ठाद्याः नारदाद्याः सुरर्षयः॥ पितरश्च
महात्मानो दक्षाद्याश्च प्रजेश्वराः॥ उर्वश्याद्याश्चाप्सरसश्चंडिकाद्याश्च मातरः॥
आदित्याश्च वसवो दस्रौ विश्वेदेवा महोत्सवः॥ तथान्ये भूतपतयो लोकसंहरण
क्षमाः॥ महाकालश्च नंदी च तथा शंकरपार्श्वगो॥ वीरभद्रो महातेजाः शंकुकर्णो
महाबलः॥ घंटाकर्णश्च दुर्धर्षो माणिभद्रोऽर्कोदरः॥ कुंडोदरश्चाविकटस्त
था कुंभोदरो बली॥ मंदोदरः कर्णधारः केतुर्भृंगीरिटिस्तथा॥ भूतनाथास्तथान्ये
९१ च महाकाया महौजसः॥ सद्मवर्णा बिसश्वेता केचिन्मंडूकसप्रभाः॥ हरिता धूसराः
धूम्राः कर्बुरा पीतलोहिताः॥ चित्रवर्णा विचित्रांगाश्च नीलालावलोलकृताः॥ नानायुधा ९१

धनुष्करा नानावाहनभूषणाः॥ केचिद्व्याघ्रमुखाः केचित्सूकरास्या गजाननाः॥
केचिच्छ्वनक्रवदनाः सारमेयमुखाः परे॥ सृगालवदनाश्चान्ये उष्ट्राश्ववदनाः परे॥
केचिच्छरभभेरुंडसिंहग्रधवकाननाः॥ एकवक्त्रा द्विवक्त्राश्च बहुवक्त्राश्च मुखेऽनि
मुखाः॥ एकहस्ता द्विहस्ताश्च पंचहस्ता सहस्रकाः॥ अपादा बहुपादाश्च बहुकर्णै
ककर्णकाः॥ एकनेत्राश्चतुर्नेत्रा दीर्घाः केचन वामनाः॥ समंतात्सरिवार्येशं भूतना
था उपासते॥ अथागच्छन्महातेजा मुनीनां प्रवरः सुधीः॥ सनत्कुमारो धर्मात्मा
तं द्रष्टुं जगदीश्वरं॥ सदेव देवं विश्वेशं सूर्यकोटिसमप्रभं॥ महाप्रलयसंक्षुब्ध
सप्तार्णवघनस्वनं॥ संवर्त्ताग्निसमाटोपं चटापटलशोभितं॥ अक्षीणभालन
यनज्वालाम्लाननिजाशिषं॥ प्रदीप्तरुज्ञमणिना शशिखंडेन मंडितं॥ तत्सकंधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकरेणेन दक्षिणेन च वामसुकं॥ विभ्राणं कुंडलयुगं रत्ननीलमहाहनुं॥ नीलग्रीवं
महाबाहुं नागहारविराजितं॥ फणिराजपरिभ्राजत्कंकणं मदमुद्रिकं॥ अनंत
फणसाहस्रमणिरंजितमेखलं॥ व्याघ्रचर्मपरीधानं घंटादर्पणभूषितं॥ कर्कोट
कमहापद्मधृतराजधनंजयैः॥ कुंजरस्थरसंघुष्टपादपद्मविराजितं॥ श्यामलो
मरखड्गांगभूलटंकधनुर्धरं॥ अप्रधृष्यमानिर्द्वंद्वमचिंत्याकारमीश्वरं॥
रत्नसिंहासनारूढं प्रणनाम महामुनिः॥ तं भक्तिभावोद्धुसितो नरनामा संस्तुय
वाग्भिः श्रुतिसंमिताभिः॥ कृतांजलिः प्रश्रयनम्रकंधरः प्रपच्छ धर्मानखिलान्छु
भप्रदान्॥ यान्यानपच्छतमुनिस्तांस्तान्धर्मानशेषतः॥ प्रोवाच भगवान् रुद्रो
भयोमुनिरपच्छत॥ सनत्कुमार उवाच॥ श्रुतास्ते भगवन्धर्मास्त्वन्मुखान्मुक्ति
९२ हेतवः॥ ये मुक्तपापा मनुजास्तरिष्यंति भवार्णवं॥ अथापरं महाधर्ममल्पाया ९२

सं महत्फलं॥ ब्रूहि कारुण्यतो मह्यं सर्वोलुक्तिप्रदं नृणां॥ आयासबहुला धर्मा:
गास्त्रदृष्टाः सहस्रशः॥ सम्यक्संसेविताः कालात्सिद्धिं यच्छंति वा न वा॥ अतो लो
कहितं गुह्यं शुक्लं सुक्लेश्यसाधनं॥ धर्मं विज्ञातुमिच्छामि त्वत्तोहं परमेश्वर॥
श्रीमहारुद्र उवाच॥ सर्वेषामपि धर्माणामुत्तमं श्रुतिचोदितं॥ रहस्यं सर्वजंत
नां यच्छ्रित्रिपुंड्रस्य धारणं॥ सनत्कुमार उवाच॥ त्रिपुंड्रस्य विधिं ब्रूहि भगवन्नज
गतां पते॥ तत्त्वतो ज्ञातुमिच्छामि त्वत्तस्साम्प्रतमहेश्वर॥ कतिस्थानानि किं द्रव्यं
का शक्तिः का च देवता॥ किं प्रमाणं च के कर्ता के मंत्रास्तस्य किं फलं॥ एतत्सर्वमशे
षेण त्रिपुंड्रस्य च लक्षणं॥ ब्रूहि मे जगतां नाथ लोकानुग्रहकाम्यया॥ श्रीरुद्र उवाच॥
आग्नेयमुच्यते भस्म दग्धगोमयसंभवं॥ तद्रव्यमित्युक्तं त्रिपुंड्रस्य महामुने॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्यादिभिश्च ब्रह्ममयैर्महामंत्रैश्च पंचभिः॥परिगृह्याग्निरित्यादिमंत्रैर्भस्माभिमं
त्रयेत्॥मानस्तोकेति संमर्द्य शिरो लिंपेत् त्र्यंबकं॥त्र्यायुषादिभिर्मंत्रैर्ललाटे
च भुजद्वये॥स्कंधे च लेपयेद्भस्म जं से लं मंत्रभावितं॥त्रिस्रो रेखा भवंत्येषु स्थानेषु
मुनिपुंगव॥भ्रुवोर्मध्ये समारभ्य यावदंतो भवेद्भ्रुवः॥मध्यमानामिकांगुल्योर्म
ध्ये तु प्रतिलोमतः॥अंगुष्ठेन कृता रेखा त्रिपुंड्राख्याभिधीयते॥तिसृणामपि रेखा
णां प्रत्येकं नव देवताः॥अकारो गार्हपत्याग्निर्भूश्चात्मा च रजोगुणः॥ऋग्वेदश्च क्रि
याशक्तिः प्रातःसवनमेव च॥महादेवश्च रेखायाः प्रथमायास्तु देवताः॥उकारो दक्षि
णाग्निश्च नभः सत्वं यजुस्तथा॥माध्यंदिनं च सवनमिच्छाशक्त्यंतरात्मको॥महेश्व
२५ श्च रेखाया द्वितीयायाश्च देवताः॥मकाराहवनीयौ च परमात्मा तमोदिवौ॥ज्ञान २५

शक्तिः सामवेदस्तृतीयसवनं तथा॥शिवश्चेति तृतीयाया रेखायास्त्वपि देवताः॥
एतान्नित्यं नमस्कृत्य त्रिपुंड्रं धारयेच्छुचिः॥महेश्वरव्रतमिदं सर्ववेदेषु कीर्तितं॥मु
क्तिकामेन नरैः सेव्यं पुनस्तेषां न संभवः॥त्रिपुंड्रं कुरुते यस्तु भस्मना विधिपूर्वकं॥
ब्रह्मचारी गृहस्थो वा वनस्थो यतिरेव वा॥महापातकसंघातैर्मुच्यते चोप
पातकैः॥तथान्यैः क्षत्रविट्शूद्रस्त्रीगोहत्यादिपातकैः॥वीरहत्याश्वहत्याभ्यां
मुच्यते नात्र संशयः॥अमंत्रेणापि यः कुर्यादज्ञात्वा महिमोन्नतिं॥त्रिपुंड्रं भालफ
लके मुच्यते सर्वपातकैः॥परद्रव्यापहरणं परदाराभिमर्शनं॥परनिंदा परक्षेत्र
हरणं परपीडनं॥तस्यारामादिहननं गृहदाहादिकर्म च॥असत्यवाक्यपैशून्यं पा
रुष्यं वेदविक्रयः॥कूटसाक्ष्यं व्रततत्यागः कैतवं नीचसेवनं॥गोभूहिरण्यमहिषी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लो०

तिलकं च लवाससं॥ अन्नपान्यजलादीनां नीचेभ्यश्च प्रतिग्रहः॥ दासीवेश्याभुजं-
गीशूद्रपल्लीशुनदीशु च॥ रजस्वलाशुकंन्याशु विधवाशु च संगमः॥ मांसचर्मरसा-
दीनां लवणस्य च विक्रियः॥ एवमादीन्यसंख्यानि पापानि विविधानि च॥ सद्य एव
विनश्यंति त्रिपुंड्रस्य च धारणात्॥ शिवद्रव्यापहरणं त्रिवानिंदां च कुत्रचित्॥
निंदां च शिवभक्तानां प्रायश्चित्तैर्न शुध्यति॥ रुद्राक्षा यस्य गात्रे तु ललाटे च त्रि-
पुंड्रकं॥ स चंडालोपि संपूज्यः सर्ववर्णोत्तमो भवेत्॥ यानि तीर्थानि लोके स्मिन्
गंगाद्याः सरितश्च याः॥ स्नातो भवति सर्वेत्र ललाटे यस्त्रिपुंड्रधृक्॥ सप्तकोटिम-
हामंत्राः पंचाक्षरमुखाः सराः॥ तथान्ये कोटिशो मंत्राः शैवाः कैवल्यहेतवः॥ ते स-
२४ र्वे तेन जप्ताः स्युर्यो बिभर्ति त्रिपुंड्रकं॥ सहस्रं पूर्वजातानां सहस्रं च जनिष्यतां॥ स्व २४

वंशजानां मर्त्यानां मुद्धरेद्यस्त्रिपुंड्रधृक्॥ इह भुक्त्वाखिलान्भोगान् दीर्घायुर्व्याधि-
वर्जितः॥ जीवितांते च मरणं सुखेनैव प्रपद्यते॥ अष्टैश्वर्यगुणोपेतः प्राप्य दिव्यवपुः
शुभं॥ दिव्यं विमानमारुह्य दिव्यस्त्रीशतसेवितः॥ विद्याधराणां सिद्धानां गंधर्वा-
णां महौजसां॥ इंद्रादिलोकपालानां लोकेषु च यथाक्रमं॥ भुक्त्वा भोगान् सुविपुला-
न् प्रजेशानां पुरेषु च॥ ब्रह्मणः पदमासाद्य तत्र कल्पशतं रमेत्॥ विष्णोर्लोके च र-
मते यावद्ब्रह्मशतत्रयं॥ शिवलोकं ततः प्राप्य रमते कालमक्षयं॥ शिवसायुज्यमाप्नो-
ति न स भूयोपि जायते॥ सर्वोपनिषदां सारं समालोच्य मुहुर्मुहुः॥ इदमेव हि निर्णी-
तं परं श्रेयस्त्रिपुंड्रकं॥ एतत्त्रिपुंड्रमाहात्म्यं समासात्कथितं मया॥ रहस्यं सर्व-
भूतानां गोपनीयमिदं त्वया॥ इत्युक्त्वा भगवान् रुद्रस्तत्रैवांतरधीयत॥ सन-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमारोपिस्तु निर्द्दग्धो लोकं जगाम सः॥ तथापि भस्मसंपर्कात् संजाता विमलामतिः॥
तमपि श्रद्धया पुण्यं धारयस्व त्रिपुंड्रकं॥ सूत उवाच॥ इत्युक्तो वामदेवस्तु शिव
योगी महातपाः॥ अभिमंत्र्य ददौ भस्म घोराय ब्रह्मरक्षसे॥ तेनासौ भालफलके
चकार तिर्यक् त्रिपुंड्रकं॥ ब्रह्मराक्षसतां सद्यो जहौ तस्यानुभावतः॥ स बभौ सूर्य
रु संकाशस्तेजोमंडलमंडितः॥ दिव्यावयवरूपश्रीर्दिव्यमाल्यांबरोज्वलः॥ भक्त्या
प्रदक्षिणीकृत्य तं गुरुं शिवयोगिनं॥ दिव्यं विमानमारुह्य पुण्यलोकाञ्जगाम सः॥
वामदेवो महायोगी दत्वा तस्य परां गतिं॥ चचार लोके गूढात्मा साक्षादिव शिवः
स्वयं॥ एतद्भस्ममाहात्म्यं त्रिपुंड्रस्य गुणान्तरः॥ श्रावयेद्वा पठेद्वापि स याति
९५ परमां गतिं॥ कथयतां शिवकीर्तिं संसक्ते कुक्षि हेतु भ्रमण मतः शिवयोगी ध्यायसी

रां श्रीपदं॥ रचयतां शिवभस्मोद्धासि भाले त्रिपुंड्रं न पुनरिह जनन्या गर्भवा
सं भजध्वं॥ ॥इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे भस्ममाहात्म्यवर्णनं ना
म षोडशोध्यायः॥ ॥ऋषय ऊचुः॥ वेदवेदांगतत्वज्ञैर्गुरुभिर्ब्रह्मवादिभिः॥
नृणां कृतोपदेशानां सद्यः सिद्धिर्हि जायते॥ अथान्यजनसामान्यैर्गुरुभिर्नी
तिकोविदैः॥ नृणां कृतोपदेशानां सिद्धिर्भवति कीदृशी॥ सूत उवाच॥ श्र
द्धैव सर्वधर्मस्य मातेवाहितकारिणी॥ श्रद्धैव नृणां सिद्धिर्जायते लोकयोर्द्वयोः॥ श्र
द्धया भजतः पुंसः शिलापि फलदायिनी॥ मूर्खोपि पूजितो भक्त्या गुरुर्भवति सि
द्धिदः॥ श्रद्धया भजतो मंत्रस्त्वबद्धोपि फलप्रदः॥ श्रद्धया पूजितो देवो नीचस्यापि
फलप्रदः॥ अश्रद्धया कृता पूजा दानं यज्ञस्तपो व्रतं॥ सर्वं निष्फलतां याति पुंसां

लो॰

वंध्यतरोरिव॥ सर्वत्र संस्थापि रः॥ अर्थहीनोऽपि चेच्चलः॥ परमार्थोऽसरिति
भ्रष्टः संस्थितेनैहि मुच्यते॥ मंत्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ॥ यादृशी भाव
ना यस्य सिद्धिर्भवति तादृशी॥ अतो भावमयं विश्वं पुण्यपापं च भावतः॥ ते
उभे भावहीनस्य न भवेतां कदाचन॥ अत्र हि परमाश्चर्यमाख्यानमनुवर्ण्यते॥
अश्रद्धा सर्वमस्तीनां येन सद्यो निवर्तते॥ आसीत्संचोलराजस्य सिंहकेतुरिति
श्रुतः॥ पुत्रः सर्वगुणोपेतः शक्रस्येव धनंजयः॥ स एकदा कतिपयैर्भटैः सुकोम
लबलः॥ जगाम मृगयाहेतोर्वनं सत्याचितं वने॥ तद्भृत्यः शबरः कश्चिद्विचरन्नू
मृगयावने॥ ददर्श जीर्णस्फुटितं पतितं देवतालये॥ तत्रापश्यद्गिनपीठपातितं
५५ स्थंडिलोपरि॥ शिवलिंगं स्फुटं स्वं च भाग्यमिवात्मनः॥ स समादाय वेगेन ५५

स्वैकर्मनिचोदितः॥ तस्मै संदर्शयामास राजपुत्राय धीमते॥ पश्येदं रुचिरं लिंगं मया
दृष्टमिति प्रभो॥ तदेतत्पूजयिष्यामि यथाविभवमादरात्॥ अस्य पूजाविधिं ब्रूहि यथा
देवो महेश्वरः॥ अमंत्रज्ञैस्तथा नीचैः प्रीतो भवति पूजितः॥ इति तेन निषादेन पृष्टः पार्थि
वनंदनः॥ प्रत्युवाच प्रहस्यैनं परिहासविशारदः॥ संकल्पेन सदा कुर्यादभिषेकं नवांभसा॥
उपवेश्यासने शुद्धे शुभैर्गंधाक्षतैर्नवैः॥ वन्यैः पत्रैश्च कुसुमैर्धूपैर्दीपैश्च पूजयेत्॥ चि
ताभस्मोपहरं तु प्रथमं परिकल्पयेत्॥ आत्मोपभोग्येनान्नेन नैवेद्यं कल्पयेत्ततः॥
पुनश्च धूपदीपादीनुपचारान्प्रकल्पयेत्॥ नृत्यवादित्रगीतादीन्यथावत्परिकल्पयेत्॥
नमस्कृत्याथ विधिवत्प्रसादं धारयेत्स्वयं॥ एष साधारणः प्रोक्तः शिवपूजाविधिस्तव॥
चिताभस्मोपहारेण सद्यस्तुष्यति शंकरः॥ स तथेत्युवाच॥ परिहासरसेनेत्थं शासितः स्वामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ०लो०

लो। नामुना॥ स च उत्थ्यः शबरो मूर्धीजग्याहतदचः॥ ततः स्वभवनं प्राप्य लिंगमर्चितमहेश्वरं।
प्रस्यहं पूजयामास चिताभस्मोपहारकृत्॥ यच्चात्मनः प्रियं वस्तु गंधपुष्पासनादिकं।
निवेदयं भवे नित्यमनुपांशुकं ततः स्वयं॥ एवं महेश्वरं भक्त्या सहपत्न्याभ्यपूजयत्॥ शब
रः सुखमामास घनिनायकतिचित्समाः॥ एकदा शिवपूजायै प्रवृत्तः शबरोत्तमः॥ न ददर्श
चिताभस्म पात्रे पूरितमण्वपि॥ अथासौ सरितो दूरमन्विष्यापि परिभ्रमन्॥ न लब्ध्वा
वौ। चिताभस्म श्रांतो गृहमगात्पुनः॥ ततः आहूय पत्नीं स्वां शबरो वाक्यमब्रवीत्॥ न ल
ब्धं मे चिताभस्म किं करोमि वद प्रिये॥ शिवपूजांतरायो मे जातो मे बत पाप्मनः॥ पूजां
विना क्षणमपि नाहं जीवितुमुत्सहे॥ उपायं नात्र पश्यामि पूजोपकरणेहते॥ न गुरो
श्च विहन्येत तच्छासनं सकलार्थदं॥ इति व्याकुलितं दृष्ट्वा भर्तारं शबरांगना॥ सभा
९८ पत माभैस्त्व मुपायं प्रवदामि ते॥ इदमेव गृहं दग्ध्वा वज्रकाष्ठोपबृंहितं॥ अहमग्निं प्रवे ९८

स्वामि चिताभस्म भवेन्नतः॥ शबर उवाच॥ धर्मार्थकाममोक्षाणां देहः परमसा
धनं॥ कथं त्यजामि तं देहं सुखार्हं नवयौवनं॥ अभुक्तानपत्यासमभुक्तविषयास
वा॥ भोगभोग्यमिदं देहं कथं दग्धुमिहेच्छसि॥ शबर्युवाच॥ एतावदेव साफल्यं
जीवितस्य जन्मनः॥ परार्थे यस्त्यजेत्प्राणांच्छिवार्थे किमु तत्स्वयं॥ किं नु तप्तं तपो घोरं
किं वा दत्तं मया पुरा॥ किं वार्चनं कृतं शंभोः पूर्वजन्मांतरे॥ किं वा पुण्यं मनावि
तुः कावा मातु रूतार्थता॥ यच्छिवार्थे समिद्धेऽग्नौ त्यजाम्येतत्कलेवरं॥ इत्थं स्थिरां
मतिं दृष्ट्वा तस्या भक्तिं च शंकरे॥ तथेति दृढसंकल्पः शबरः प्रत्यपूजयत्॥ साभ
र्तारमनुज्ञाप्य स्नाता शुचिरलंकृता॥ गृहमादीप्य तेनाग्निं भक्त्या चक्रे प्रदक्षिणां।
नमस्कृत्वा स्वगुरवे ध्यात्वा हृदि सदाशिवं॥ अग्निप्रवेशाभिमुखीकृतांजलिर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शलो॰

दंजगौ॥ शबरी उवाच॥ दुष्प्राणि संतु नव देव ममेंद्रियाणि धूपो गुरूयै पुरि दंहृदय
प्रदीपः॥ प्राणा हवींषि करणानि नवास्तवास्तोः पूजाफलं प्रजनतु सांप्रतमेव जीवः॥ वीर्यघा
मि नाहमपि सर्वबंधनाधिपत्यं न स्वर्गभूतिमचलां न पदं विधातुः॥ भूयो भवानि यदि
जन्म निजन्मनि स्यां तत्सादपंकजलसन्मकरंदभृंगी॥ जन्मानि संतु मम देव शता
धिकानि माया न मे विरतु चित्तमबोधहेतुः॥ किंचित्क्षणार्धमपि ते चरणारविं
दनापेतु मे हृदयमीश नमोनमोस्तु॥ इति प्रसाद्य देवेशं शबरी दृढनिश्चया॥ विवे
शज्वलितं वह्निं भस्मसाद्भवत्क्षणात्॥ शबरोपि च मंत्रस्य यत्नेन परिगृह्य सः॥
चक्रे दग्धगृहो यां ते शिवपूजां समाहितः॥ अथ तस्मात्पूजांते प्रसादग्रहणोत्सु
१८ कां॥ दयितां निसमायांतीं प्रांजलिं विनयान्वितां॥ स्मृतमात्रां न दापस्वपन्नगतोऽ १८

तः प्रियां॥ पूर्वेणाचयनेनैव भक्तिनम्रां शुचिस्मितां॥ तां वीक्ष्य शबरः पत्नीं पूर्ववत्प्रां
जलिं स्थितां॥ भस्मावशेषं च गृहं यथापूर्वमुपस्थितं॥ अग्निर्दहति तेजोभिः सू
र्यो दहति रश्मिभिः॥ राजा दहति दंडेन ब्राह्मणो मनसा दहेत्॥ किमयं स्वप्न आहोस्वि
त्किंवा माया भ्रमात्मिका॥ इति विस्मयसंभ्रांतमानसां वधूं पर्यपृच्छत॥ अयि प्रिये कथं प्रा
प्ता भस्मीभूतासि पावके॥ दग्धं च भवनं भूयः कथं पूर्ववदास्थितं॥ शबरी उवाच॥ य
दा गृहं समुद्दीप्य प्रविष्टाहं हुताशनं॥ न प्रत्यानं न जानामि न पश्यामि च पावकं॥ न ता
पलेशोप्यासीन्मे प्रविष्टाया इवाम्भसि॥ सुषुप्तेव क्षणार्द्धं हं प्रबुद्धास्मि पुनः क्षणात्॥ ताव
द्गृहं च मध्यस्थं न दग्धमिव सुस्थितं॥ अधुना देव पूजांते प्रसादं लब्धुमागता॥ एवं परस्परं
प्रेम्णा दंपत्योर्भाषमाणयोः॥ प्रादुरासीत्तयोरग्रे विमानं दिव्यमद्भुतं॥ तस्मिन्विमा

अ॰मो॰

नेशानचंद्रभासुरेचत्वारईशानुचराःपुनःस्थिताः॥हस्तेगृहीत्वाथनिषाददंपतीआ
रोपयामासुरस्तुकुविग्रहो॥तयोर्निषाददंपत्योस्तत्क्षणादेवतद्गुः॥शीघ्रंतकरस्प
र्शात्तत्सायुज्यमवापह॥एवंतौशिवमाध्यभक्त्याशबरदंपती॥नीतोपिशाबरःप्राप्यश्र
द्धयायोगिनांगतिं॥किंजन्मनासकलवर्णजनोत्तमेनकिंविद्ययासकलशास्त्रविचारव
त्या॥यस्यास्तिचेतसिसदापरमेशभक्तिःकोन्यस्ततस्त्रिभुवनेपुरुषोस्तिधन्यः॥
इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेभस्मप्रभावकथनवर्णनंनामसप्तदशोध्यायः॥
सूतउवाच॥अथाहंसंप्रवक्ष्यामिसर्वधर्मोत्तमोत्तमं॥उमामहेश्वरंनामव्रतंसर्वार्थ
सिद्धिदं॥आनर्त्तसंभवःकश्चिन्नाम्नावेदरथोद्विजः॥कलत्रपुत्रसंपन्नोविद्वानुत्त
९९ मवंशजः॥तस्यैवंवर्त्तमानस्यब्राह्मणस्यगृहाश्रमे॥बभूवशारदानामकन्याकमल ९९

लोचना॥शीलरूपलक्षणोपेताबालाद्वादशहायनी॥ययाचेपद्मनाभोनोस्योमृतदार
श्चरन्द्विजः॥महाधनस्यशीलस्यसत्कारेरतस्यच॥यांच्याभंगभयात्तस्यतां
कन्यांप्रददौपिता॥मध्यंदिनेकलौकाहःसाविप्रःश्वशुरालये॥संध्यामुपासितुंसायं
सरस्तटमुपाययौ॥उपास्यसंध्यांविधिवत्स्वसागच्छन्तमोद्यते॥मार्गेदष्टोभुजंगेन
ममारनिजकर्मणा॥तस्मिन्मृतेकुतोवाहेसहसातस्यबांधवाः॥चुक्रुशुःशोकसं
तप्तोश्वशुरश्चस्यकन्यका॥निर्दहस्यतंबंधुजनेजग्मुःस्वंस्वंनिवेशनं॥शारदाप्राप्त
वैधव्यापितुरेवालयेस्थिता॥सातदादनभिज्ञेनभर्त्राविरहितासती॥नितांतय
कृताचिन्नासातुसाबालापितुर्मंदिरे॥एकदानैध्रुवोनामकश्चिद्वृद्धतरोमुनिः॥
अंधःशिष्यकरग्राहीतन्मंदिरमुपाययौ॥तस्मिन्वृद्धेगृहंप्राप्तेगतेषुकापिबंधुषु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मो॰

सास्मा दिवास्तनो देवं सा वाक्यं समुपाचरत्॥ स्वागतं हे महाभाग पीठेस्मिन्नुप
विश्यतां॥ नमस्ते मुनिनाथाय प्रियं ते करवाणि किं॥ इत्युक्त्वा भक्तिमास्थाय स्व
त्वोपानयनेजनं॥ वीजयापरिश्रांतं तं मुनिं पर्यतोषयत्॥ श्रांतं पीठे समावेश्य
स्नात्वाभ्यंगं स्वपाणिना रूतेस्नानं च विधिवत्तूस्तत देवार्चने छुनिं॥ सुखासनोपवि
ष्टं तं धूपमाल्यानुलेपनैः॥ अर्चयित्वा वरान्नेन भोजयामास सादरं॥ भुक्त्वा च
सम्यक् कुरानके स्वच्छमश्वानं दनिर्भरः॥ चकारोंघ मुनिस्तस्येस्तु प्रीतः परमाशि
षं॥ विहस्य भर्त्री सह सा च तेन लब्ध्वा स्तुतं सर्वगुणैर्वरिष्टं॥ कीर्तिं च लोके महतीम
वाप्य प्रसादयोग्या भव देवतानां॥ इत्यभिव्याहृतं तेन मुनिनागतचक्षुषा॥ निशा
१०० म्य विस्मिता बाला प्रस्फुवाच कृतांजलिः॥ ब्रह्मंस्त्वद्वचनं सत्यं संकृता विभ्रमः पाभवे १००

तं॥ नदेन मंदभाग्यायां कथमेतद्भविष्यति॥ शिलायामिव सद्दृष्टिः स्तुनष्याभि
वसत्क्रिया॥ विफला मंदभाग्यायां आशीर्वत्तावितामपि॥ सैषाहं विधवा ब्रह्मन्दु
ष्कर्मफलभागिनी॥ नवनारीर्वचनस्यास्य कथं यास्यामि पात्रतां॥ मुनिरुवाच॥
त्वोम्मनालस्य यत्नो कर्मं धेनापिमयाधुना॥ नदेनत्साधयिष्यामि कुरु मद्वासने
भो स्यसि॥ स्नारदोवाच॥ तयोपादिष्टयत्नेन चरिष्याम्यपि दुश्चरं॥ नद्व्रतं ब्रूहि
मे ब्रह्मन्तद्विधानं वद विस्तरात्॥ मुनिरुवाच॥ चैत्रे वा मार्गशीर्षे वा शुक्लपक्षे शुभे
दिने॥ व्रतारंभं प्रकुर्वीत यथावद्गुर्वनुज्ञया॥ अष्टम्यां च चतुर्दश्यां सुभयोरपि पर्व
वनं प्रति॥ संकल्पं विधिवत्कृत्वा प्रातः स्नानं समाचरेत्॥ संतर्प्य पितृदेवादीन्गत्वा स्वगुरु
वनं प्रति॥ मंडपं रचयेद्दिव्यं वितानैर्नानावर्णैरलंकृतं॥ फलपल्लवपुष्पाद्यैस्तोरणैश्च स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्वितं॥पंचवर्णैस्तु सम्यग्रजोभिः परमसुंदरे॥चतुर्द्वारदलैर्वीथीशोभितं त्रिंशद्विस
दंतरे॥तदंतरे षोडशाभिरष्टभिश्च तदंतरे॥एवं पद्मं समुद्धृत्य पंचवर्णैर्मनोरमं॥
चतुरस्रं ततः कुर्यादंतर्वेद्युत्तमं॥व्रीहितंडुलराशींश्च तन्मध्ये च कूर्चकं॥कू
र्चोपरि तु संस्थाप्य कलशं धान्यपूरितं॥कलशोपरि विन्यस्य वस्त्रं स्वर्णमनुत्तमं॥
तस्योपरि ताम्रीं वर्णप्रतिमां त्रिनयोः शुभे॥निधाय पूजयेद्भक्त्या यथाविभववि
स्तरं॥पंचामृतैस्तु संस्नाप्य तथा शुद्धोदकेन च॥रुद्रैकादशकं जप्त्वा पंचाक्षरत्री
लोष्टकं॥अभिमंत्र्य पुनः स्थाप्य पीठे हेममये चैयेत्॥स्वयं शुद्धासनासीनो धौतम
शुक्लांबरः सुधीः॥पीठमामंत्र्य मंत्रेण प्राणायामान्समाचरेत्॥संकल्पं प्रवदेत्तत्र
२०१ रीशाभ्यां विहितांजलिः॥यानि पापानि घोराणि जन्मांतरकृतानि मे॥तेषां सर्ववि २०१

नाशाय शिवपूजां समारभे॥सौभाग्यविजयारोग्यधनैश्वर्याभिवृद्धये॥स्वर्गाप
वर्गसिद्ध्यर्थं करिष्ये शिवपूजनं॥इति संकल्प्य तु आर्यं यथावत्सुसमाहितः॥
अंगन्यासं ततः कृत्वा ध्यायेद्गौरीं च पार्वतीं॥कुंदेंदुधवलाकारं नानाभरणभू
षितं॥वरदाभयहस्तं च बिभ्राणं परशुं मृगं॥सूर्यकोटिप्रतीकाशं जगदानंद
कारणं॥जाह्नवीजलसंसिक्तदीर्घपिंगजटाधरं॥उरगेंद्रफणोद्भूतमहामुकु
टमंडितं॥शीतांशुखंडविलसत्कोटीरांगदभूषितं॥उन्मीलत्पद्मनयनं तथा स
र्येंदुलोचनं॥नीलकंठं चतुर्बाहुं गजेंद्राजिनवाससं॥रत्नसिंहासनारूढं नानाभ
रणभूषितं॥देवीं च दिव्यावयवां बालसूर्यसमद्युतिं॥बालवेषां च तन्वंगीं बा
लशीतांशुशेखरां॥पाशांकुशाभयवरान्बिभ्रतीं च चतुर्भुजां॥प्रसादसुमुखी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनं॰

मेवीलीलारसविहारिणी॥ लसत्कुरवकाशोकपुन्नागवनचंपकैः॥ कृतावतंसा
मुत्फुल्लमल्लिकोत्कलितालकां॥ कांचीकलापविस्तजघनाभोगशालिनीं॥ उदार
किंकिणीश्रेणिनूपुराढ्यपदद्वयां॥ गंडमंडलसंसक्तरत्नकुंडलरोचिषं॥ बिंबाध
रानुरक्तोत्फुल्लसद्दशनकुंभअलकां॥ महार्हरत्नग्रैवेयकोरहाराविराजितां॥ न
वमाणिक्यरुचिरकंकणांगदमुद्रिकां॥ लीलालोलोल्लासीनांकांगीभकांतुग्रहस्ता
यिनीं॥ एवं ध्यात्वा तु हस्ते जगतः पितरौ शिवौ॥ जप्त्वा तन्मूलकं मंत्रं नदं ते वहि
१०२ रर्चयेत्॥ आवाह्य प्रतिमायुग्मे कल्पयेदासनादिकं॥ अर्घ्यं च दद्याद्विधिवद्योमंत्रे १०२
णानेन मंत्रवित्॥ नमस्ते पार्वतीकांत त्रैलोक्यवरदर्षभ॥ त्र्यंबक महादेव
गृहाणार्घ्यं नमोस्तु ते॥ नमस्ते देवदेवेशि प्रपन्नभयहारिणी॥ अंबिके वर
रत्नोंभुक परीधानो रत्नमाल्यानुलेपनां॥ उसीनकुचद्वंद्वानिलांभोजकुअलो ४५

दे देवी गृहाणार्घ्यं नमोस्तु ते॥ इति त्रिवारं तुष्ट्या यं दद्यादर्घ्यं समाहितः॥ गंधपुष्पा
क्षतैः सम्यग्धूपदीपानुप्रकल्पयेत्॥ नैवेद्यं पायसान्नेन घृताक्तं परिकल्पयेत्॥ तु
कृत्वा मूलमंत्रेण हविषाष्टोत्तरं शतं॥ ततः उत्साद्य नैवेद्यं धूपनीराजनादिकं॥ कृ
त्वा निवेद्य ताम्बूलं नमस्कुर्यात्समाहितः॥ अथाभ्यर्च्योपचारेण भोजयेद्द्विजदंपती॥
एवं सायं तनीं पूजां कृत्वा विप्राननुमोदितः॥ भुंजीत वाग्यतो रात्रौ हविष्यं क्षीरभावि
तं॥ एवं संवत्सरं कुर्याद्व्रतं पक्षद्वये शुचिः॥ ततः संवत्सरे पूर्णे व्रतोद्यापनमाचरेत्॥
मानरूढाभिजनैस्तु स्नापयेत्प्रतिमे जलैः॥ आगमोक्तेन मंत्रेण संपूज्य गिरिजाशि
वौ॥ सवत्सं सस्तुवर्णं च फलं रौप्य प्रतिमान्वितं॥ दत्त्वा चार्याय महते सदाचाररताय
च॥ ब्राह्मणान्भोजयेत्तत्पात्मधारान्याभिपूज्य च॥ दद्याद्दक्षिणां तेभ्यो गोहिर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्यां वरादिकं॥ पूजितस्तदनुज्ञातः सहैव जनबंधुभिः॥ एवं यः कुरुते भक्त्या व्रतं त्रै
लोक्यविश्रुतं॥ त्रिःसप्तकुलमुद्धृत्य स भुंक्ते भोगानीप्सितान्॥ इंद्रादिलोकपा
लानां स्थाने सुरमते चिरं॥ ब्रह्मलोके च रमते विष्णुलोके च शाश्वते॥ शिवलोकमथ
प्राप्य तत्र कल्पशतं पुनः॥ भुंक्ते भोगानसौ विपुलांश्चिरमेव प्रपद्यते॥ महाव्रतमिदं
वत्से त्वमपि श्रद्धयाचर॥ अतीव दुर्लभं वापि लप्स्यसे च मनोरथं॥ इत्यादिष्टा मु
नींद्रेण सा बाला मुदिताभवत्॥ प्रसन्नहीस्तु विस्त्रब्धा तत्काम्यं सुमनोहरं॥ अ
थ तस्याः समायाताः पितृमातृसहोदराः॥ ते तु तां सुखमासीनं ददृशुः कृतभो
जनं॥ सहसागत्य ते सर्वे नमश्चक्रुर्महात्मने॥ प्रसीद नः प्रसीदेति गृणंतः पर्य
पृच्छयत्॥ श्रुत्वा च तेन या साध्व्या पूजिते परमं मुनिं॥ अनुग्रहं तैः कृतं तस्यै श्रु
१०३ त्वा हर्षपरं ययौ॥ तेषां तां जलयः सर्वे तं भक्तुं तं निपुंगवं॥ अथ धन्या वयं सर्वे १०३

त्वदागमनमात्रतः॥ पावितं नकुलः सर्वं गृहं च सफलीकृतं॥ इयं च शारदा नाम
कन्या वैधव्यमागता॥ केनापि कर्मभावेन दुर्विलंघ्येन तेजसा॥ सैषा घनतपा
श्चांबरपरमाशरणं सती॥ इमां समुद्धरास्माल्लघोरादुःखसागराद्राज्॥ त्वयापि तू
तावदत्रैव स्थातव्यं नो गृहांतिके॥ अस्मद्गृहमठेप्यस्मिन्स्नानपूजाजपो
चिते॥ एषा बालापि भगवन्कुर्वती त्वत्सदार्चनं॥ भवंतं त्वत्सन्निधावेव चरिष्यति
ति महामुने॥ यावत्समाप्तिमायाति व्रतमस्यास्तदंतिके॥ उषित्वा तावदत्रैव
कृतार्थान्कुरु नो गुरो॥ एवमभ्यर्थितः सर्वैस्तत्रत्याभ्यागतजनादिभिः॥ तथेति स
मुनिश्रेष्ठस्तत्रोवास मठे शुभे॥ सापि तेनोपदिष्टेन मार्गेण गिरिजाशिवौ॥
अर्चयंती व्रतं सम्यक् चचार विमलसती॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महेश्वरव्रताचरणं नामाष्टादशोऽध्यायः ॥ ॥सूत उवाच ॥ एवं महाव्रतं तस्या
श्चरंत्याः गुरुसन्निधौ ॥ संवत्सरोऽप्यतीताय नियमास्तक्रचेतसः ॥ संवत्सरांते सा
बाला ॥ तत्रैव पितृमंदिरे ॥ चकारोद्यापनं सम्यक् शिवभोजनपूर्वकं ॥ दत्वा च दक्षि
णां तेभ्यो ब्राह्मणेभ्यो यथार्हतः ॥ विसृज्य तान्नमस्कृत्वा पितृभ्यामभिनंदिता ॥
उपोषितास्य यं तस्मिन् दिने नियममास्थिता ॥ जजाप परमं मंत्रमुपादिष्टं महा
त्मना ॥ अथ प्रदोषसमये प्राप्ते संपूज्य शंकरं ॥ तस्मिन्महालिंकमठे गुरोस्तस्य
च सन्निधौ ॥ जपार्चनरता साध्वी ध्यायंती परमेश्वरं ॥ तस्मिन् जागरणे रात्रा
वुपविष्टा शिवांतिके ॥ तस्यां रात्रौ तया सार्धं स मुनिर्जगदंबिकां ॥ जपध्यानत
२०४ पोभिश्च तोषयामास पार्वती ॥ तस्याश्च भक्त्या व्रतभावितायामुनेस्तपोयोगस २०४

माधिनाच ॥ तुष्टा भवानी जगदेकमाता प्रादुर्बभूवाथ दयार्द्रमूर्तिः ॥ प्रादुर्भूता य र्भ
दा गौरी तयोरग्रे जगन्मयी ॥ अंधोऽपि तत्क्षणादेव मुनिः प्रापदृशोर्द्वयं ॥ तां वीक्ष्य ज
गद्धात्रीमाविर्भूतां पुरःस्थितां ॥ निपेततुस्तत्पदयोः स मुनिः सा च कन्यका ॥ तौ भक्ति
भावोद्भ्रमितामलाशयावानंदबाष्पोक्षितसर्वगात्रौ ॥ उत्थाप्य देवी कृपया प
रिप्लुता प्रेम्णा बभाषे मृदुवल्गुभाषिणी ॥ प्रीतास्मि ते मुनिश्रेष्ठ वत्से प्रीतास्मि
ते नघे ॥ किं वा ददाम्यभिमतं देवानामपि दुर्लभं ॥ मुनिरुवाच ॥ एषानुग्राह्य द
नामकंन्यानुगतभर्तृका ॥ मया प्रतिश्रुतं चास्यै तुष्टेन गतचक्षुषा ॥ स हभ
र्त्रा चिरं कालं विहृत्य सुतमुत्तमं ॥ लभस्वेति मया प्रोक्तं सत्यं कुरु नमोऽस्तु ते ॥
देव्युवाच ॥ एषा पूर्वभवे बाला द्राविडस्य द्विजन्मनः ॥ आसीद्द्वितीया दयिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाति श्रीमानविमुक्तता ॥ सा भर्तृप्रेयसी नित्यं रूपमाधुर्यपेशला ॥ भर्त्तारं वश
मानिन्ये रूपवृत्त्यादिकैः नवैः ॥ अस्यां निषक्तहृदयः स विप्रो मोहयंत्रितः ॥ कदाचि
दपि नैवागात् ज्येष्ठपत्नीपतिव्रतां ॥ अनन्यागमनाक्लुप्तैः सा नारी पुत्रवर्जिता ॥ त
द्योकेन संतप्ता कालेन विलयं गता ॥ अस्या गृहसमीपस्थो यः कश्चिद्ब्राह्मणो यु
वा ॥ इमां वीक्ष्याथ चार्वंगीं कामार्त्तः करमग्रहीत् ॥ अनया रोषताम्रास्या स विप्र
स्त्ववधीरितः ॥ इमां स्मृत्वा दिवानक्तं निधनं प्रत्यपद्यत ॥ एषा संमोह्य भर्त्तारं ज्येष्ठ
पत्न्यां पराङ्मुखं ॥ चकार तेन पापेन सर्गेऽस्मिन् विधवा भवेत् ॥ याः कुर्वंति स्त्रि
यो लोके जायापत्योश्च विप्रियं ॥ ता सा कौमारवैधव्यमेकविंशति जन्मनि ॥ यदे
तया पूर्वभवे मरुज्जा महती कृता ॥ तेन पुण्येन मत्सायं नष्टं सर्वं तु देवहि ॥ योपि
२०५ श्रीविरहार्त्तः सन्मृतः कामविमोहितः ॥ सोस्याः पाणिग्रहं कृत्वा भवेस्मिन्निध २०५

नं गतः ॥ प्राग्जन्मपतिरेतस्याः पाञ्चरात्रेषु सोऽस्तु मा ॥ [illegible] श्रीमान्
दारः सपरिच्छदः ॥ तेन भर्त्रा प्रतिनिशं सेषा प्रेम्णाभिसंगता ॥ [illegible] सुन्
याति श्रेष्ठजागरणादपि ॥ षण्मुखतरत्रिंशतयोजनदूरस्थो देशादितो द्विजयद्
सचक्रमेगत्या ॥ एतां वधूं प्रतिनिशं मनसोऽभिरामां स्वप्नेषु पश्यति चिरं रतिमा
दधानः ॥ एषो वै स्वप्नसंगत्या पत्युः प्रतिनिशं सती ॥ काले नलस्य तेषु त्वं वेदवेदां
गपारगं ॥ एतस्यां तनयं जानमात्रेन श्रिरसंगमैर्मातृ ॥ सोपि प्राज्ञो निशं स्वप्नेऽ
स्य लिप्रेमभाविता ॥ अनयाराधिता पूर्वे भवे साय महामुने ॥ अस्यैव रमदानी
यप्रादुर्भूतास्मि सांप्रतं ॥ सूतउवाच ॥ अथोवाच महादेवी तां बालां प्रतिसादरं
अयि वत्से महाभागे श्रृणु मे परमं वचः ॥ यत्नाकृतापि भर्त्तारं कापि देशेषु रात
ते ॥ रस्यैसि स्वप्नदृष्टं प्राक् कृत्वा सैषसेतं विचक्षणा ॥ तां रस्याति सवि प्रोपि सुचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रं स्वमलक्षितं ॥ तदापरस्पराळापो युवयोः संभाविष्यति ॥ तदा स्वतनयं भद्रेण
स्नेहेन दृढिकृतं ॥ फलमस्य प्रतस्यार्थं तस्य हस्ते समर्पय ॥ ततः प्रभृति सौख्येन तर
वरोत्तिष्ठतु मध्यमे ॥ युवयोर्दैहिकः संगो माभूत्स्वप्नहि रतोहिते ॥ कालास्त्वचल
मापन्नेतस्मिन्नूब्राह्मणसत्तमे ॥ अग्निं प्रविश्यते नैव सह यास्यसि मस्य दं ॥ पु
त्रस्ते भविता सुभ्रु सर्वलोकमनोरमः ॥ संपदश्च भविष्यति प्रास्यसे परमं पदं ॥
सूत उवाच ॥ इत्युक्त्वा त्रिजगन्माता दत्वा तस्यै मनोरथं ॥ तयोः संपश्यतोरेव
सत्वेन्नादर्शनं गता ॥ सापि बाला वरं लब्ध्वा पार्वत्याः करुणानिधेः ॥ अत्याप परमा
नंदमजयामास तं गुरुं ॥ तस्यां रात्र्यां व्यतीतायां स तु निर्लब्धलोचनः ॥ तस्याः
१०६ पित्रोश्च तत्सर्वं रहस्याचष्ट धर्मवित् ॥ अथ सर्वे नृपामंत्र्यताः रत्नं च यशास्वि ॥

विधायानुग्रहं तेषां ययौ स्वैरगतिर्मुनिः ॥ एवं दिने तु गच्छत्सु सा बाला च पतिस्सपं ॥
भर्तुः समागमं लेभे स्वप्ने सुखविवर्द्धनं ॥ गोधीवरप्रसादेन रत्नाकरसुता विशारद्रता ॥ दधार
गस्य प्रेपि भर्तुः संगानुभावतः ॥ ता स्फला पितृरहिता ॥ रत्नाकरसुता गर्भिणी सती ॥ सर्वे
धिग्धिगेनां गिरश्रोचुर्जारिणीति जगुर्जनाः ॥ सपदि दृष्ट्वा तत्कुले यत्ता तत्कुलबांधवाः ॥
तां शशंसुः प्रयांशकृत्वा ययुस्तास्वित्तं मंदिरं ॥ अथ सर्वे समायाता ग्रामस्थाश्च पंडि
ताः ॥ समाजं चक्रिरे तत्र कुलवृद्धैः समन्विताः ॥ अंतर्वत्नीं समाहूय रत्नाकरसुतां विनतान
नां ॥ अंतर्जयंत्यः सुसंक्रुद्धाः केचिदासन्पराङ्मुखाः ॥ अपि जारिणि दुर्बुद्धे किमेतन्नेवि
चेष्टितं ॥ अस्मत्कुलस्य दुष्कीर्तिरुत्पन्ना सि बालिके ॥ इति संतर्जयंतस्ते ग्रामवृद्धा
मनीषिणः ॥ सर्वे संमंत्रयामासुः किं कुर्म इति भाषिणः ॥ तत्रोचुः केचनेत्वद्धास्तां बालां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिनिर्दयाः ॥ एषा पापमतिः शीला कुलक्षयविनाशिनी ॥ रुष्टास्याः केशवृन्दं छित्वाक
र्णौ च नासिकां ॥ निशायां तां बहिर्ग्रामात् सरित्यस्याः स्वगोत्रजाः ॥ इति सर्वैः समालोच्य तां त
थाकर्तुमुद्यताः ॥ अथान्तरिक्षसंभूता भुश्रवे वागगोचरा ॥ अनयानकृतं पापं न
चैव कुलदूषणं ॥ अनभंगो न चास्यास्मिन्सुचरित्रे यमंगना ॥ इतः परस्मीयं नारी जारि
णीति वदन्ति ये ॥ तेषां दोषविमृष्टानां संघो जिह्वा विदीर्यते ॥ इत्थं तरिक्षजनितां वाणीं
श्रुत्वाशरीरिणां ॥ सर्वे प्रजहृषुस्तस्या जननीजनकादयः ॥ ततः ससंभ्रमा दैवैः सर्वे
ग्रामवृद्धाः सभाजनाः ॥ गुरुर्नभोन्मालंब्य भीताः नम्युरधोमुखाः ॥ नच केचिद
विश्वासा मिथ्यावाणी सर्वादिषु ॥ तेषां जिह्वाद्विधा भिन्ना च मनुस्तेऽक्रिमीन्स्तृणा
२०७ णान् ॥ ततः संत्यज्य ग्रामास्तुस्तां बालां तातिबांधवाः ॥ बंधुस्त्रियश्च वृक्षाश्चदारे २०७

स्तुः साधु साध्विति ॥ मुमुचुः केचिदानंदबाष्पबिंदून्कुलोत्तमाः ॥ कुलस्त्रियः प्रमु
नोस्तामाश्लिष्य समाश्वसन् ॥ अथ तत्र परे प्रोचुर्दैवं वदति नान्यतं ॥ कथमेषा दधौ
गर्भं शीला ऽस्खलिता पि च ॥ इति सर्वान्सभ्यजन्मान्संशयाविष्टचेतसः ॥ विलोक्य
वृद्धस्तत्रैको वभाषे लोकतत्त्ववित् ॥ मायामयमिदं विश्वं दृश्यते श्रूयते च यत् ॥
किं भाव्यं किमभाव्यं वा संसारेस्मिन्भ्रमात्मके ॥ अनिरूप्यमभूतार्थं मायायां जा
यते स्फुटं ॥ ईश्वरस्य वशो माया तस्य कोवेद चेष्टितं ॥ रूपकेतोश्च राजर्षेः शुक्रं निप
तितं जले ॥ सशुक्रं तज्जलं पीत्वा वेश्या गर्भं दधौ किल ॥ मुनेर्विभांडकस्यापि शुक्रं
पीत्वा सहांभसा ॥ हरिणी गर्भिणी भूत्वा ऋष्यशृंगमसूसवत् ॥ सुराकृष्णपतधारा तो
नेरं स्टष्मस्टगां गना ॥ तल्लक्षणा दृर्भिणी भूत्वा मुनिमासूत तापसं ॥ तथा सत्यवती

नारीशाकरीगर्भसंभवा॥तथैव महिषीगर्भो जातोऽग्निर्महिषासुरः॥तथा संतिपुरा
नायीकारुण्या ऊर्ध्वसंभवः॥वल्लोपि वसुदेवेन रोहिण्यास्तनयो भवत्॥देवतानां
महर्षीणां शापेन च वरेण च॥अनुक्रमपि यत्कर्म युज्यते नात्र संशयः॥सांबस्य
जठराज्जातं मुसलं मुनिशापतः॥पुत्रवाश्च गर्भो भूस्तु मुनीनां मंत्रगौरवात्॥तत्
नमेषापि कल्याणि महर्षेः पादसेवनात्॥महाव्रतानुभावाच्च दैवने गर्भमं
भिता॥अस्मिन्नर्थे रहस्यं नो संदेहं कर्तुं यो पिलः॥ततो निरंजनं संदेहो भाविष्य
ति महाजनाः॥ततस्तद्वचनाद्देवता मत्छत्स्विमोत्थिथः॥ताभ्यः शारीसनस्सर्वसा
स्वच्छत्तं महद्भुतं॥विसानाथोस्ततः सर्वे भान्धीत्वानंतः सती॥मोदमानाः प्रशंस
२०८ नः प्रययुः स्वंस्वमालयं॥अथ कालेशुभे प्राप्ते शारदा विमलाशया॥असूतत २०८

यं बालावालार्कसमतेजसं॥सकुमारो महोदारलक्षणः कमलेक्षणः॥अवापम
हतीं विद्यां बाल्य एव महामतिः॥अथोपनीतो गुरुणा काले लोकमनोरमः॥स
शारदेयएवेति लोके ख्यातिमवापह॥ऋग्वेदमष्टवर्षेण नवमे यजुषां गणं॥
दशमे सामवेदं च लीलया ध्यगमत्सुधीः॥अथास्ति लोकमतेसंप्राप्ते शिवकर्मवर्द्धि
णि॥गोकर्णे प्रययुः सर्वे जनाः सर्वत्रवासिनः॥शारदापि स्वपुत्रेण सह बंधुज
नेन च॥सहिता पितृमातृभ्यां कें गोकर्णं प्रययौ सती॥तत्रापश्यत्समायांतं स
दास्य प्रफुल्लसितं॥पूर्वजन्मनि भर्त्तारं द्विजबंधुजनावृतं॥तं दृष्ट्वा प्रेमनिर्वि
ण्णा फुल्लकांचिल विग्रहा॥निरुद्धबाष्पप्रसरा लस्योतन्यस्तलोचना॥सोपि वि
प्रो थतां दृष्ट्वा सुरूपां चारुलक्षणां॥स्वप्रेमसदाख्यं ज्यमाना मात्मनोऽरातिदाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी॥ तं कुमारमपि स्वप्ने दृष्टमात्मशरीरजं॥ विलोक्य विस्मयाविष्टावदंति कृतुपाय
यौ॥ भद्रे त्वां प्रष्टुमिच्छामि यत्किंचिन्मनसि स्थितं॥ इति प्रथममाभाष्य रहस्यानंगनि
नायनां॥ कांतं कथय वामोरु कस्य भार्यासि सुव्रते॥ को देशः कस्य वा पुत्री किं ना
मे सखी पत्नी॥ इति तेन समापृष्टा सा नारी बाष्पलोचना॥ व्याहजहारासनोद्य
नं बाल्ये वैधव्यकारणं॥ पुनः पप्रच्छ तां बालां पुत्रः कस्यायमुत्तमः॥ कथयाद्य तो वा
जठरे बालोयं चंद्रसन्निभः॥ शारदा उवाच॥ एवमेतन्नः स्वामिन्न सर्वविद्याविशा
रदः॥ शारदेय इति प्रोक्तो मम नाम्नैव कल्पितः॥ इति तस्याः वचः श्रुत्वा विलस्य ह
ब्राह्मणोत्तमः॥ प्रोवाच कष्टात्कष्टं हि चरितं तव भामिनी॥ पाणिग्रहणमात्रं तेदृ
१०२ त्वा भर्ता मृतः किल॥ कथं चायं सुतो जातस्तस्य कारणमुच्यतां॥ इति तेनोदितां वा १०२

णी मा कण्ठोत्तीव लज्जिता॥ क्षणं नम्रमुखी भूत्वा धैर्यादिदमभाषत॥ शारदो वा
च॥ नृ दत्तं परिहासोत्थ्यात् त्वं मां वेत्सि महामते॥ त्वामहं वेद्मि चार्थेस्मिन्न प्रमाणं मन
आवयोः॥ इति स्फुटं सर्वं मावेद्य देव्या दत्तं वरादिकं॥ तत्तस्याधे कुमारं च दर्शोल स्ने
ध्वतत्ता॥ सोपि प्रमुदितो विप्रो कुमारं परिगृह्य तं॥ पित्रोरनुमते नैव तां निनाय नि
जालयं॥ सापि स्थिता बहून्मासांस्तस्य विप्रस्य मंदिरे॥ तस्मिन् काल वरां प्राप्य
विरच्याग्निं तमन्वगात्॥ ततस्तौ दंपती भूत्वा विमानं दिव्यमास्थितौ॥ दिव्य भोग
समायुक्तौ जग्मतुः शैव मंदिरं॥ इत्येतत्पुण्यमाख्यानं मया सम्यग्नुवर्णितं॥ पठतां शृ
ण्वतां सद्यो भुक्तिमुक्तिप्रदायकं॥ आयुरारोग्यसंपत्तिधनधान्यविवर्द्धनं॥ स्त्रीणां
मंगल सौभाग्यसंतानसुखसाधनं॥ एतन्महाख्यानमघौघनाशनं गौरीमहेश
व्रतपुण्यकीर्तनं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतान्या सरुद्राः भृगुथाच्य की नैवेनुभुक्ता सभोगान्पदनैतिशाश्वतं॥ ॥इति
श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शारदाख्याने नामैकोनविंशोध्यायः॥ सूत उवा
च॥ अथ रुद्राक्ष महात्म्यं वर्णयामि समासतः॥ सर्वपापक्षयकरं शृण्वतांपठ
तामपि॥ अभक्तो वा विभक्तो वा नीचो नीचतरोपि वा॥ रुद्राक्षान्धारयेद्यस्तु
मुच्यते सर्वपातकैः॥ रुद्राक्षधारणं पुण्यं केनवा सदृशं भवेत्॥ महाव्रतमिदं
प्राहुर्मुनयस्तत्वदर्शिनः॥ सहस्रं धारयेद्यस्तु रुद्राणां धृतव्रतः॥ तं नमंति सु
राः सर्वे यथा रुद्रस्तथैव सः॥ अभावे तु सहस्रस्य बाह्वोः षोडश षोडश॥ एकं शि
खायां करयोर्द्वादश द्वादशैव हि॥ द्वात्रिंशत्कंठदेशे तु चत्वारिंशत्तु मस्तके॥ एकै
ककर्णयोः षट् षट् वक्षस्यष्टोत्तरं शतं॥ यो धारयति रुद्राक्षान्रुद्रवत्सोपि पू
११० ज्यते॥ मुक्ताप्रवालैः स्फटिकरौप्यवैडूर्यकांचनैः॥ समेतान्धारयेद्यस्तु रुद्रा ११०

क्षान्शिवो भवेत्॥ केवलान्वापि रुद्राक्षान्यथालाभं बिभर्ति यः॥ तेन स्पृ
ष्टं न लिंपंति पापानि तमांसीव विभावसुं॥ रुद्राक्षमालया जप्तो मंत्रोनंतफलप्रदः॥ अ
रुद्राक्षो जपकुर्वाणो तावन्मात्रफलप्रदः॥ यस्यांगे नास्ति रुद्राक्ष एकोपि बहुपुण्यदः॥
तस्य जन्म निरर्थं स्यात्त्रिपुंड्ररहितं यदि॥ रुद्राक्षं मस्तके बध्वा शिरःस्नानं करोति
यः॥ गंगास्नानफलं तस्य जायते नात्र संशयः॥ रुद्राक्षं पूजयेद्यस्तु विना तोयाभि
षेचनं॥ यत्फलं लिंगपूजायास्तदेवाप्नोति निश्चितं॥ एकवक्त्रः पंचवक्त्रः एकादशमु
खः परे॥ चतुर्दशमुखाः केचिद्रुद्राक्षा लोकपूजिताः॥ भक्त्या संपूजितो नित्यं रुद्रा
क्षः शंकरात्मकः॥ दरिद्रं वापि कुरुते राजराजसमश्रियं॥ अत्रैव पुण्यमाख्यानं व
र्णयंति मनीषिणः॥ महापापक्षयकरं श्रवणात्कीर्तनादपि॥ राजा काश्मीरदेशस्य भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रसेन इति श्रुतः तस्य पुत्रोभवद्धीमान् सुधर्मो नाम वीर्यवान् ॥ तस्यामात्यसुतः श्री
श्रीमान् रक्तो नाम सद्गुणः ॥ बभूव राजपुत्रस्य सखा परमशोभनः ॥ तावुभौ परम
स्निग्धौ कुमारौ रूपसुंदरौ विद्याभ्यासपरौ बाल्ये सह क्रीडां प्रचक्रतुः ॥ तौ सैंदौ स
दा सर्वगात्रेषु रुद्राक्षकृतभूषणौ ॥ विचेरतुरुदारांगौ सततं भस्मधारिणौ ॥ हार
केयूरकटककुंडलादिविभूषणं ॥ हेमरत्नमयं त्यक्त्वा रुद्राक्षं दधतुस्तनौ ॥ रुद्रा
क्षमालिनौ नित्यं रुद्राक्षकरकंकणौ ॥ रुद्राक्षकंठाभरणौ सदा रुद्राक्षकुंडलौ ॥ हे
१११ मरत्नाद्यलंकारं लोष्ठपाषाणदारीनौ ॥ बोध्यमानावपि जनैर्नै रुद्राक्षं विमुंचतां ॥ १११
तस्य काश्मीरराजस्य गृहं प्राप्तो यदृच्छया ॥ पराशरो मुनिवरः साक्षादिव पिताम
हः ॥ तमर्चयित्वा विधिवद्राजा धर्मभृतां वरः ॥ पप्रच्छ सुखमासीनं त्रिकालज्ञं महा

मुनिं ॥ राजोवाच ॥ भगवन्नेष पुत्रो मे सोपि मंत्रिसुतश्च मे ॥ रुद्राक्षधारिणौ नित्यं
रत्नाभरणनिस्पृहौ ॥ शास्यमानावपि सदा रत्नालंकृत्य परिग्रहे ॥ विलंघितास्मद्
वचनौ रुद्राक्षेष्वेव लालसौ ॥ नोपादिष्टाविमौ बालौ केनापि द्विजकेनाचिलु ॥ एषा स्वाभा
विकी वृत्तिः कथमासीत्कुमारयोः ॥ पराशर उवाच ॥ शृणु राजन्प्रवक्ष्यामि तव
पुत्रस्य धीमतः ॥ तथा त्वन्मंत्रिपुत्रस्य प्रवृत्तिं विस्मयावहां ॥ नंदिग्रामे पुरा काचि
न्महानंदीति विश्रुता ॥ अभवद्वारवनिता शृंगारललिताकृतिः ॥ छत्रं पूर्णेंदुसं
काशं यानं स्वर्णविराजितं ॥ चामराणि सुदंडानि पादुके च हिरण्मये ॥ अंबराणि
विचित्राणि महार्हाणि घनानि च ॥ चंद्ररश्मिनिभाः शय्याः पर्यंकाश्च हिरण्मयाः ॥
गावो महिष्यः शालयो दासाश्च शतसंमिताः ॥ सर्वाभरणदीप्तांग्यो दास्यश्च नव

योषितः॥ भूषणानि पराध्यानि नवरत्नोज्वलानि च॥ गंधकुसुमकस्तूरीकर्पूरा
गरुलेपनैः॥ चित्रमाल्यावतंसश्च षड्रसं मिष्टभोजनं॥ नानाचित्रविताना ढ्यं ना
नाधान्यमयं गृहं॥ चतुरत्नसहस्राढ्यं कोटिसंख्याधिकं धनं॥ एवं विभवसंपन्ना
वेश्या कामविहारिणी॥ शिवपूजारतानित्यं सत्यधर्मपरायणा॥ सदा शिवक
थासक्ता शिवनामजपोत्सुका॥ शिवभक्तोद्यवनिता शिवभक्तिरतानिशं॥ वि
नोदहेतोः सा वेश्या नाट्यमंडपमध्यतः॥ रुद्राक्षैर्भूषयित्वैकं मर्कटं चैव कुक्कुटं॥
करतालैश्च गीतैश्च सदा नर्तयति स्वयं॥ पुनश्च विहसंत्येताः सखीभिः परिवा
रिता॥ रुद्राक्षैः कृतकेयूरकर्णाभरणकुंडलः मर्कटः॥ शिक्षया तस्याः सदा नृत्य
 ति बालवत्॥ शिखाग्रबद्धरुद्राक्षः कुक्कुटः कपिना सह॥ चिरं नृत्यति नृत्यज्ञः प ११२

श्यतां चित्रमावहत्॥ एकदा भवने तस्याः कश्चिद्वैश्यः शिवव्रती॥ आजगाम स रु
द्राक्षस्त्रिपुंड्री निर्ममः कृती॥ स बिभ्रद्दक्षिणे हस्ते प्रकोष्ठे वरकंकणं॥ महारत्नप
रिक्षिप्तं ज्वलंतं तरुणार्कवत्॥ तमागतं सा गणिका संपूज्य परया मुदा॥ तत्प्रकोष्ठ
गतं वीक्ष्य कंकणं प्राह विस्मिता॥ महारत्नमयं सोयं कंकणस्त्वत्करे स्थितः॥ मनो
हरति मे साधु दिव्यस्त्रीभूषणोचितः॥ इति तां नवरत्नाढ्ये सस्पृहां करभूषणे।
वीक्ष्योदारमतिर्वैश्यः सस्मितं समभाषत॥ अस्मिन् रत्नमये दिव्ये यदि ते सस्पृ
हं मनः॥ त्वमेवाधत्स्व सुप्रीता मौल्यमस्य ददासि किं॥ वेश्योवाच॥ वयं हि स्वैरचा
रिण्यो वेश्यास्तु न पतिव्रताः॥ अस्मत्कुलोचितो धर्मो व्यभिचारो न संशयः॥ यद्ये
तद्रत्नरचितं ददासि करभूषणं॥ दिनत्रयमहोरात्रं तव पत्नी भवाम्यहं॥ वैश्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उवाच॥ तथास्तु यदि ते सत्यं वचनं वीरवल्लभे॥ दत्तमिदं रत्नवरं त्वयैव त्रिरात्रं भवन
द्युः॥ एतस्मिन्नेव यदाहारे तु प्रमाणं शशिभास्करौ॥ त्रिवारं सत्यमित्युक्त्वा हृदयं मे स्पृ
शाभिये॥ वेश्या उवाच॥ दिनत्रयमहोरात्रं पत्नी भवामि तव प्रभो॥ सधर्मचरामीति सा
तद्धृदयमस्पृशत्॥ अथ तस्यै स वैश्यस्तु प्रददौ रत्नकंकणं॥ लिंगं रत्नमयं चास्या
हस्ते सोदत्वेदमब्रवीत्॥ रदं रत्नमयं शैवं लिंगं मत्प्राणसन्निभं॥ रक्षणीयं त्वया
कांते तस्य हानिर्मृतिर्मम॥ एवमस्त्विति सा कांता लिंगमादाय रत्नजं॥ नाट्यमं
डपिकास्तंभे निधाय प्राविशद्गृहं॥ सा तेन संगता रात्रौ वैश्येन विटधर्मिणा॥
सुखं सुष्वाप पर्यंके मृदुतल्पोपशोभिते गतनो निशीथसमये नाट्यमंडपांतरे॥
११३ अकस्मादुत्थितो वह्निस्तमेव सहसावृणोत्॥ मंडपे दह्यमाने तु सहसोत्थाय सं ११३

संभ्रमात्॥ सा वेश्या मर्कटं तत्र मोचयामास बंधनात्॥ स मर्कटो मुक्तबंधः कु
क्कुटेन सह द्रुतं॥ भीतो दूरं प्रदुद्राव विधुताग्निकणान्बहून्॥ स्तंभेन सहानि
च दग्धं तल्लिंगं शकलीकृतं॥ दृष्ट्वा वेश्या वैश्यश्च दूरं तेऽदुःखमापतुः॥ दृष्ट्वा प्राणस
मं लिंगं दग्धं वैश्यः परिस्तता॥ स्वयमप्यात्मनिर्वेदो मरणाय मतिं दधौ॥ निर्विण्णो
नितरां खिन्नो वैश्यस्तामाह दुःखितो॥ शिवलिंगे तु निर्भिन्ने नाहं जीवितुमुत्स
हे॥ चितां कारय मे भद्रे तव भक्त्ये वराधिके॥ शिवे मनः समाधाय प्रवेक्ष्यामि
हुताशनं॥ यदि ब्रह्मेंद्रविष्ण्वाद्या वारयेयुः समेत्य मां॥ तथाप्यस्मिन्क्षणे धीरः प्र
विश्याग्निं सज्जाम्यसून्॥ तमेवं दृढनिर्बंधं सा विज्ञाय सुदुःखिता॥ स्वभृत्यैः का
रयामास स चितां स्वनगराद्बहिः॥ ततः स वैश्यः शिवभाक्तिपरतः प्रदक्षिणीकृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्लो०

समिद्धमग्निं ॥ विवेश पश्यत्सु जनेषु धीरः सा चानु तां पञ्चमतिः प्रपेदे ॥ अथ साऽऽ
खिला नारीस्थलौ धर्मसुनिर्मलं ॥ सर्वान्बंधुजनान्वीक्ष्य बभाषे करुणं वचः ॥ रत्न
कंकणमादाय मया सम्यगुदाहृतं ॥ दिनत्रयमहं पत्नी वैश्यस्यास्य सम्मता ॥ क
र्मणा मनसा वाचा यत्र तस्य नैवं परः शिवव्रती ॥ तस्मादहं प्रवेक्ष्यामि सहानेन हुताशनं ॥
सधर्मचारिणा कृत्यं सत्यं नहि हि न नश्यति ॥ सत्येन प्राप्तिमायान्ति देवास्त्रिभुवने
२१४ श्वराः ॥ सत्याश्रयः परो धर्मः सत्ये सर्वं प्रतिष्ठितं ॥ सत्येन स्वर्गमोक्षौ च नासत्ये
न परा गतिः ॥ तस्मात्सत्यं समाश्रित्य प्रवेक्ष्यामि हुताशनं ॥ इति सा दृढनिर्बन्धा
वार्यमाणापि बंधुभिः ॥ सत्यलोपभयान्नारी प्राणांस्त्यक्तुं मनो दधे ॥ सर्वस्वं शिव
भक्तेभ्यो दत्वा ध्यात्वा सदाशिवं ॥ तमग्निं त्रिः परिक्रम्य प्रवेशाभिमुखी स्थिता ॥ २१४

लौ पतंतीं समिद्धेग्नौ स्वपदार्पितमानसां ॥ वारयामास विभ्यासा प्रादुर्भूतः शिवः स्व
यं ॥ सालं विलोक्याखिलदेवदेवं त्रिलोचनं चंद्रकलावतंसं ॥ शशांकसूर्यानलकोटि
भासं स्तब्धेव भीतेव न चैव तस्थौ ॥ तां विह्वलां परिश्रान्तां वेपमानां जडीकृतां ॥ समा
श्वास्य गलद्बाष्पां करे गृह्याब्रवीन्मृडः ॥ सत्ये धर्मे च ते धैर्ये भक्तिं च मयि निश्चलां ॥
निरीक्षितुं तत्सत्कारं वैश्यो भूत्वाहमागतः ॥ माययाग्निं समुत्थाप्य दग्धवानस्मि
मंडपं ॥ दग्धं कृत्वा रत्नलिंगं प्रविष्टोस्मि हुताशनं ॥ वेश्याः कैतवकारिण्यः जनवंच ६ स्वैरि
२१५ काः ॥ सा त्वं सत्यमनुत्सृज्य प्रविष्टाग्निमथासह ॥ अतस्ते संप्रदास्यामि भोगांस्त्रि ण्यो
दशदुर्लभान् ॥ आयुष्यं परमैश्वर्यं धर्मारोग्यं च सन्ततिं ॥ यद्यदिच्छसि सुश्रोणि
तत्तद्देयं ददामि ते ॥ इति ब्रुवति गौरीशे सा वैश्या प्रत्यभाषत ॥ वैश्योवाच ॥ न
मे वांछास्ति भोगेषु भूमौ स्वर्गे रसातले ॥ तव पादांबुजस्पर्शादन्यत्किंचिन्न कामये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममाएलेभ्दस्माश्च दास्यश्च ये चान्ये बांधवाः॥ सर्वेषां मे देनपरात्वयि सन्यस्ता रत्नयः॥
सर्वानेताननयासार्धं नीत्वात्वत्परं पदं॥ पुनर्जन्म भयं घोरं विमोचय नमोस्तु ते॥
तथेति तस्याः वचनं प्रतिनंद्य महेश्वरः॥ तान्सर्वान्नयासार्धं निनाय्यात्मपदं परं॥
नाट्यमंडपिका याहे यो दूरे विदुलो पुरा॥ तत्रावासिष्ठो तावेव कुक्कुटो मर्कटस्तथा॥
कालेन निधनं यातः स तस्या नाट्यमर्कटः॥ असौ मत्तकुमारोभूत्कुक्कुटो मंत्रिणः
सुतः॥ रुद्राक्षधारणोद्भूतात्पुण्यात्सर्वं भवाजितान्॥ कुले महति संजातौ वर्ते
ते बालकाविमौ॥ रुवीच्यासेन रुद्राक्षान्दधाते शुद्धमानसौ॥ अस्मिन् जन्मनि तत्कौ
कं रौवं सपुज्य यास्यतः॥ एषा प्रवदतिस्तेन योर्बालयोः समुदाहृता॥ कथा च शि
११५ वभक्तायाः किमन्यत्स्रोतुमिच्छसि॥ ॥इति श्री स्कंदपुराणे ब्रह्मोत्तरखंडे रुद्रा ११५

क्षमहिमानुवर्णनं नाम विंशतितमोध्यायः॥ सूत उवाच॥ एवं ब्रह्मर्षिणा प्रोक्तां श्री
णीषीरूपसन्निभां॥ आकर्ण्य मुदितो राजा प्रांजलिः पुनरब्रवीत्॥ राजोवाच
अहो सत्संगमः प्रस्ताम रोषाघप्रणाशनः॥ कामधेनुरिवाभीष्टदोग्ध्री सर्वेन
नस्य हि॥ अघमाधालमोनष्टे त्वा नदृष्टिः प्रकाशिता॥ तव दर्शनमात्रेण प्रायो ह
ममरोत्तमः॥ श्रुतं च पूर्वं चरितं बालयोः सम्यगेनयोः॥ भविष्यदपि इच्छामि मनु
चाचरणं मुने॥ अस्याः पुः कातिवर्षाणि भाग्यं च वद कीदृशं॥ विपाकश्चेश्वरा कि
श्चश्चदाभाक्कि श्च कीदृशी॥ एतत्सर्वमशेषेण मुने त्वं वक्तुमर्हसि॥ तव शिष्योस्मि
भ्दस्योस्मि शरणं त्वां गतोस्म्यहं॥ पराशर उवाच॥ अनयोर्बालयोर्हि यत्किंचित्कथं शि
कोस्मि रौसितुं॥ यधुत्वाप्यतिमेतो पिविषादं प्राप्स्यसे नाः॥ तथापि नियंतलोके
नभावेन परिपृच्छतः॥ अवाच्यमपि वस्यामि तव स्नेहान्महीपते॥ अनुप्यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमारस्य वर्षाणि द्वादशास्य तु॥ इतः परं प्रदेयेत सप्तमे दिवसे मृतिं॥ इति तस्य वचः
श्रुत्वा कालकूटमिवोदितं॥ रुदितैः सह सा भर्त्रा पपात नृपतिः शुचा॥ तमुत्थाप्य समा
श्वास्य स मुनिः करुणार्द्रधीः॥ उवाच मा भैष्ट नृप नेतुं नवेस्यामितेहितं॥ सगौशुरानि
रा लोकं यदेकं निष्कलं परं॥ चिदानंदमयं ज्योतिः सः आद्यः केवलः शिवः॥ स एवादौ
रजोरूपं स्रष्टा ब्रह्मणामा स ना॥ स्थितिकर्मनियुक्ताय तस्मै वेदांश्च दत्तवान्॥ उत्त
श्च जगतामीशा आत्मतत्वैकसंग्रहं॥ सर्वोपनिषदां सारं रुद्राध्यायं च दत्तवान्॥ य
देकमव्ययं साक्षाद्ब्रह्म ज्योतिः सनातनं॥ शोधात्मकं परं तत्वं रुद्राध्याये प्रतिष्ठितं॥
स आत्मभूः स्वजन्विभ्यं चतुर्भिर्यदनैर्विराट्॥ ससर्ज वेदांश्चतुरो लोकानां स्थि
११८ तिहेतवे॥ तत्राद्यं यजुषां मध्ये ब्राह्मणो दक्षिणास्तु स्वान्॥ अशेषोपनिषत्सारोरु २२५

द्राध्यायः समुद्धृतः॥ स एव मुनिभिः सर्वैर्महर्षिभिः पुरोगमैः॥ सह देवैश्च ध्येतस्तेभ्यस्त
च्छिष्या जगत्यभूत्॥ तच्छिष्यशिष्यैस्तद्वंशैः सोमेश्च क्रमागतैः॥ ध्वनो रुद्रात्मकः सो
यं वेदसारं प्रसारितः॥ एवमेव परो मंत्र एवमेव परं तपः॥ रुद्राध्यायः परंधूसांपरं
कैवल्यसाधनं॥ ये महापातकैर्युक्ता उपपातकिनश्च ये॥ रुद्राध्यायजपात्सद्यस्ते
पियांति परां गतिं॥ भूयोपि ब्राह्मणास्त्रेष्ठाः सदसन्मिश्रयोनयः॥ देवा तिर्यङ्मनु
ष्या ध्यास्ततः संसृतिं जगत्॥ तेषां कर्माणि सृष्टानि स्वजन्मानुगुणानि च॥ लो
कास्तेषु प्रवर्तन्ते भुंजंते चैव तत्फलं॥ लोकस्थितिप्रवाहार्थं स्वयमेव प्रजापतिः
धर्माधर्मौ ससर्जाग्रे स्वकर्मफलभागतः॥ धर्ममेवानुतिष्ठतः पुण्यं विंदति
तत्फलं॥ अधर्ममनुतिष्ठंतस्ते पापफलभागिनः॥ पुण्यकर्मफलं स्वर्गो नरकस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विपर्ययः॥ नयोक्षावधिपीधात्रारुनोरातमरवांतको॥ कामः क्रोधश्च लोभश्च म
दमानादयः परे॥ अधर्मस्य सुता आसन् सर्वे नरकनायकाः॥ गुरुतल्पस्तु शाप
ने नथान्यः पुल्कसीगमः॥ कामस्य तनयाश्चैते प्रधानाः परिकीर्तिताः॥ क्रोधा-
सिन्त्वधोजातास्तथामात्त्ववधोपरः॥ ब्रह्महत्यापकं न्याहा क्रोधस्य तनयाअ
मी॥ देवस्वहरणं चैव परस्वहरणं तथा॥ स्वर्णस्तेय इति ह्येते लोभस्य तनयाः स्मृ
ताः॥ एतानाहुर्यथा डालान्यमः पातकनायकान्॥ नरकस्य विरुध्यर्थमाधि
पत्यं च कारयत्॥ ते ये मे तेन समादिष्टा नवपातकनायकाः॥ नरकान्पालयामासुः स्व
भ्रष्टैश्चोपपातकैः॥ रुद्राध्यायेभ्युर्यंप्राप्तेसासाके नल्पसाधने॥ भीताः प्रदुद्रुवुः
११७ सर्वे ते मीपातकनायकाः॥ सर्वे ते संगता भूयो घोराः पातकनायकाः॥ यमं विज्ञा ११७

पयामासुः सहान्ये रूपपातकैः॥ जय देव महाराज वयं हि नव किंकराः॥ नरक
स्य विरुध्यर्थं नोधिकाराह्वनास्त्ययं॥ अधुना वर्तितुं लोके नराकाः स्मो वयं प्र
भो॥ रुद्रजाप्यानुभावेन निर्दग्धाश्चैव विद्रुताः॥ ग्रामे ग्रामे नदीकूले पुण्यस्थाय
तनेषु च॥ रुद्रजाप्ये तु पर्याते कथं लोके चरेमहि॥ आयश्चित्तसहस्रेणो गणया
मो न किंचन॥ रुद्राजाप्यास्तराण्येव सोढुं वलनराकुमः॥ महापातकमुख्यानां
नस्माकं लोकघातिनां॥ रुद्रजाप्यं भयं घोरं रुद्रजाप्यं महद्विषं॥ अतो दुर्विष
यं घोरमस्माकं व्यसनं महत्॥ रुद्रजाप्येन संप्राप्तमपनेतुं त्वमर्हसि॥ इति विज्ञा
पिताः सासाधनः पातकनायकैः॥ त्रसणोतिकमासाधनस्ते सर्वे व्याजितपतु
देव देवजगन्नाथस्तामहं शरणं गताः॥ सर्वा नियुक्तो मत्तो नां नियहे पापकारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णां ॥ अधुना पापिनो मर्त्यान्संतितीर्षवीनलके ॥ रुद्राध्यायेन निहतं पातकानां
महत्कुलं ॥ पातकानां कुले नष्टे नरकाः शून्यतां गताः ॥ नरके शून्यतां याते मम
भ राज्यं हि निष्फलं ॥ तस्मात्त्वयैवं गत्वा तु पायः परिचिन्त्यतां ॥ यथा मे नहि विघ्नं मे
नस्यान्नित्यं मत्स्ये देहिनां ॥ इति चिन्तापितो धाता यमेन परिखिघलौं रुद्रजाप्ये
विघातार्थमुपायं परिकल्पयत् ॥ अश्रद्धां चैव दुर्मेधां अविद्यायां सुतेउभो
श्रद्धा मेधा विद्या तिस्यो मर्त्येषु समचोदयत् ॥ तां भ्यां विमोहिते लोके [redacted]
रुद्राध्यायपराङ्मुखे ॥ यमः स्वस्थानमासाद्य कृतार्थ इव सोऽभवत् ॥ पूर्वजन्मकृ
तैः पापैर्जीयंतो त्वाग्रुणो नराः ॥ नानि पापानि नश्यंति रुद्रजाप्यवतां नृणां ॥ सौणे
११८ षु सर्वपापेषु दीर्घमायुर्यलंघ्यते ॥ आरोग्यं ज्ञानमैश्वर्यं वर्द्धते सर्वदेहिनां ॥ रुद्रा ११८

ध्यायेन ये देवं स्नापयंति महेश्वरं ॥ लज्जलैः कुर्वते स्नानं ते मुक्ताः संसरंति च ॥
रुद्राध्यायाभिजप्तेन स्नानं कुर्वंति ये भुवि ॥ तेषामक्षयं नास्ति शिवलोके वसंति
ते ॥ शतरुद्राभिषेकेण राजा नाशु जीयते नरः ॥ अशेषपापनिर्मुक्तः शिवस्य दयितो भ
वेत् ॥ एवं रुद्राध्याप्तस्नानं करोति तु नरो तु यकः ॥ दशवर्षसहस्राणि मोदते भुवि शक्रव
त् ॥ अध्याहतबलैश्वर्यो हन्ता शत्रुगणानमघः ॥ निर्दग्धाशेषपापौघः शास्ता राज्यमकं
टकं ॥ विप्राश्च वेदविदः शांता दान्तास्तिनः शंसितव्रताः ॥ स्नानयत्नतपोनिष्ठाः शिवभ
क्तिपरायणाः ॥ रुद्राध्यायजपं सम्यक् कुर्वंतु विमलाशयाः ॥ तेषां जपानुभावेन
सर्वः श्रेयो भविष्यति ॥ इत्युक्तवंतं तं पतिं महामुनिं नमे ययौ प्रथमं क्रियागुरुं
अध्यापरान् स्वमलाशयान्मुनीनां शापयामास सहस्रशः क्षणात् ॥ ते विप्राः शांत
मनसः सहस्रपरिसंमिताः ॥ कल्याणां शालेस्यप्युण्यवत्सरसेतुते ॥ रुद्राध्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येन संजप्यन्मुचरं च पातिनुत्तकं ॥ विधिवत्स्नापयामासुः संप्राप्ते समये दिने ॥ स्ना
प्यमानो मुनिवरैः स राजन्यकुमारकः ॥ अकस्माद्दिवसंत्रस्तः सणंमुघोमवाप
ह ॥ सह सैव प्रसुतो सो मुनिभिः कृतरक्षणः ॥ प्रोवाच कश्चित्पुरुषो दंडहस्तः स
मागतः ॥ मां प्रहर्तुं कृतमतिर्भीमदंष्ट्रो भयानकः ॥ सोपि चान्यैर्महावीरैः पुरु
षैरभिताडितः ॥ बध्वा पाशेन महता दूरं नीतश्च वाभवत् ॥ १० तावदहमप्रासं
भवाद्भिः कृतरक्षणः ॥ इत्थं कथं तेन नृपतेः सत्सुतं मुनिसत्तमाः ॥ आशीर्भिः पूजया
मासुर्भयं राजा मुमोच ह ॥ अथ सर्वान्द्विप्रेंद्रान् दक्षिणाभिस्तपोधनः ॥ पूज
यित्वा वरान्नेन भोजयित्वा च भक्तितः ॥ प्रतिगृह्याशिषस्तेषां मुनीनां ब्रह्मवा
११९ दिनां ॥ सुहृत्बंधुजनैः सार्द्धं सभायां समुपाविशत् ॥ तस्मिन्सभागते वीरे मुनि ११९

भिः सह पार्थिवे ॥ आजगाम महायोगी देवर्षिर्नारदः स्वयं ॥ तमागतं प्रेक्ष्य गुरुं मु
नीनां सार्द्धं सदस्यैरखिलैर्मुनींद्रैः ॥ प्रणम्य भक्त्या विनिवेश्य पीठे कृतोपचारं नृ
पतिर्बभाषे ॥ राजोवाच ॥ दृष्टं किमस्ति न त्वयाखिललोकेषु किंचिदद्भुतं ॥ न त्वोऽत्र हि
वयं सर्वे त्वत्प्रसादान्मलालसाः ॥ नारद उवाच ॥ अद्य चित्रं महद्दृष्टं व्योमावतरता
मया ॥ तवैव पुष महाराज सहैभिर्मुनिपुंगवैः ॥ अद्य मत्स्यकारिहायातो विहर्तुं तव
पुत्रकं ॥ दंडहस्तो दुराधर्षो लोकदुःसहयत्नस्ता ॥ ईश्वरोपि विदिते नं त्वत्सुतं हं
तुमागतं ॥ स हेयपार्षदैः कैश्चिद्वीरभद्रमचोदयत् ॥ स आगत्य हठान्मृत्युं त्वत्सु
तं हंतुमागतं ॥ गृहीत्वा सुदृढं बध्वा दंडेनाभ्यहनद्रुषा ॥ तं नीयमानं जगदीश
संनिधिं ॥ शीघ्रं विदित्वा भगवान्यमः स्वयं ॥ कृतांजलिर्देवजयेत्युदीरयन् प्रण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली०

ध्यक्षो निजगाद शूलिने ॥ यमउवाच ॥ देवदेवशिवा हर्यक्ष रुद्र वीरभद्र नमोस्तु ते ॥
निरागसि कथं क्रोधो कोप स्तव समुत्थितः ॥ निजकर्मानुबंधेन राजपुत्रं गतायुषं ॥
गृहीतुमुद्यते क्रोधो कोपराधो वद प्रभो ॥ वीरभद्र उवाच ॥ दशवर्षसहस्रायुः स्मरा
जननयः कथं ॥ विपन्निमं नरा या निरुद्ध्यान हतो सुभः ॥ अस्ति चेन्न वसंदेहो मद्वा
क्येप्यानिवारितेः ॥ चित्रगुप्तं समाहूय पृच्छाशो धेयमाचिरं ॥ श्रीनारद ॥ अथांत
तश्चित्रगुप्तो यमेन सहसागतः ॥ आयुः प्रमाणं तत्सूनोः परिपृष्टः स चाब्रवीत् ।
षोडशाब्दं च तस्यायुरिष्ठकोथ विस्मयश्च ॥ पुनर्लेख्य गतं प्राह सवर्षायुतजीवि
तं ॥ अथ भीतो यमो राजा वीरभद्रं प्रणम्य च ॥ कथंचिन्मोचयामास स्कंदुवीर
१२० बंधनान् ॥ वीरभद्रेण मुक्तोथ यमो गान्निजमंदिरं ॥ वीरभद्रश्च कैलासमगं प्राभ १२०

स्त्रवांत्लिकं ॥ अनस्तवकुमारो येरुद्रजाप्यानुभावतः ॥ मृत्योर्भयमतिक्रम्य सुखी
जातोस्तु ते समाः ॥ इत्थं क्षांतपमाम्यनारदो त्रिदिवं गतो ॥ महर्षयः प्रभुताः स्वस्वं
जग्मुरथाश्रमं ॥ इत्थं काश्मीरन्नृपतिः रुद्राध्यायप्रभावतः ॥ निस्तीर्थी शोषदुःखा
निरुत्तीर्थो भक्तपुत्रकः ॥ ये कीर्तयंति मनुजाः परमेश्वरस्य माहात्म्यमेतद्य
कर्णपुटैः पिबंति ॥ ते जन्मकोटिकृतपापगणैर्विमुक्ताः शांताः प्रयांति परमं पदमिं
दुमौलेः ॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे रुद्राध्यायमहिमानुवर्णनं नाम
एकविंशतिमोध्यायः ॥ ॥ सूत उवाच ॥ ॥ एवं शिवनमः पंथाः शिवेनैव प्रदर्शितः ॥
न्नृणां संसृतिवशानां स घो मुक्तिफलप्रदः ॥ अथ दुर्मेसांप्रसांचे देपनधिकारि १२
णां ॥ स्त्रीणां द्विजातिबंधूनां सर्वेषां च शरीरिणां ॥ एष साधारणः पंथा साक्षात्कै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वल्पसिद्धिदः ॥ महामुनिजनैः सेव्यो देवैरपि सुपूजितः ॥ यत्कथाश्रवणं शंभोः संसा
रभयनाशनं ॥ सद्योमुक्तिकरं श्लाघ्यं पवित्रं सर्वदेहिनां ॥ अज्ञानतिमिरध्वांतदी
पोयं ज्ञानसिद्धिदः ॥ भवरोगनिवन्नानां सुसेव्यं परमौषधं ॥ महापातकशैलानां व
ज्रघातसुदारुणं ॥ भजेनं कर्मवीजानां साधनं सर्वसंपदां ॥ येऽश्रृण्वंति सदा शंभोः
कथां भुवनपावनीं ॥ ते वै मनुष्या लोकेस्मिन् रुद्राएव न संशयः ॥ श्रृण्वतां शूलिनो
गाथां तथा कीर्तयतां सतां ॥ तेषां पादरजांस्येव तीर्थानि मुनयो जगुः ॥ तस्मिंस्मिंश्रे
यसं गंतुं ये भिलषंति देहिनः ॥ ते श्रृण्वंतु सदा भक्त्या शैवीं पौराणकीं कथां ॥ यद्य
शक्तः सदा श्रोतुं कथां पौराणिकीं नरः ॥ मुहूर्तं वापि श्रृणुयान्नियतात्मा दिने दिने ॥
अतः प्रतिदिनं श्रोतुमशक्तो यदि मानवः ॥ पुण्यमासेषु वा पुण्यदिने पुण्यतिथिष्वपि ॥
२११ यः श्रृणोति कथां रम्यां पुराणैः समुदीरितां ॥ स निस्तरति संसारं दग्ध्वा कर्ममहाट १२७

वीं ॥ मुहूर्तं वा तदर्धं वा क्षणं वा पावनीं कथां ॥ येऽश्रृण्वंति नरा भक्त्या न तेषाम
स्ति दुर्गतिः ॥ यत्फलं सर्वयज्ञेषु सर्वदानेषु यत्फलं ॥ सकृत्तत्पुराणश्रवणात्तत्फलं
विंदते नरः ॥ कलौ युगे विशेषेण पुराणश्रवणादृते ॥ नास्ति धर्मः परः पुंसां नास्ति मुक्ति
पथः परः ॥ पुराणश्रवणं शंभोर्नामसंकीर्तनं परं ॥ उभेएव मनुष्याणां कल्पद्रुमहा
फले ॥ कलौ हीनायुषो मर्त्या दुर्बलाः श्रमपीडिताः ॥ दुर्मेधसो दुःखभाजो धर्माचा
रविवर्जिताः ॥ इति संचित्य कृपया भगवान्बादरायणः ॥ हिताय तेषां विदधे पु
राणाख्यं सुधारसं ॥ पिबन्नेवामृतं पत्नो देकः स्यादजरामरः ॥ शंभोः कथामृ
तं कुर्यात्कुलमेवाजरामरं ॥ बालो युवाथवा वृद्धो दरिद्रो दुर्बलोपि वा ॥ पुराणज्ञः
सदा वंद्यः पूज्यश्च सुकृतार्थिभिः ॥ नीचबुद्धिं न कुर्वीत पुराणज्ञे कदाचन ॥ य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य वक्त्रोत्कृता वाणी कामधेनुः शरीरिणां ॥ गुरवः संति लोकस्य जन्मतो गुणतश्च
ये ॥ तेषामपि च सर्वेषां पुराणज्ञः परो गुरुः ॥ भवकोटिसहस्रेषु भ्रष्टाभ्रस्तावसी
नां ॥ यो ददाति पुनर्वृत्तिं कोन्यस्तस्मात्परो गुरुः ॥ पुराणज्ञः शुचिर्दांतः शांतो वि
जितमत्सरः ॥ साधुः कारुण्यवान्वाग्मी वदेत्पुण्यकथां सुधीः ॥ व्यासासने समारू
ढो यदा पौराणिको द्विजः ॥ आसमाप्तेः प्रसंगात्तु नमस्कुर्यान्न कस्यचित् ॥ ये धू
र्त्ता ये च दुष्टा ये चान्ये विजिगीषवः ॥ तेषां कुटिलवृत्तीनामग्रे नैव वदेत्कथां ॥
न दुर्जनसमाकीर्णे न शूद्रश्वापदावृते ॥ देशे न द्यूतसदने वदेत्पुण्यकथां सु
धीः ॥ सुग्रामे सुजनाकीर्णे सुक्षेत्रे देवतालये ॥ पुण्ये नदनदीतीरे वदेत्पुण्यक
१२२ थां सुधीः ॥ श्रद्धाभक्तिसमायुक्ता नान्यकार्येषु लालसाः ॥ वाग्यताः शुचयो व्य १२२

ग्राः श्रोतारः पुण्यभागिनः ॥ अभक्त्या ये कथां पुण्यां श्टण्वंति मनुजाधमाः ॥ तेषां
पुण्यफलं नास्ति दुःखं स्याज्जन्मजन्मनि ॥ पुराणं ये तु संपूज्य तांबूलाद्यैरुपायनैः ॥
श्टण्वंति च कथां भक्त्या दरिद्राः स्युर्न पापिनः ॥ कथायां कीर्त्यमानायां ये गच्छंत्यन्य
तो नराः ॥ भोगांतरे प्रणश्यंति तेषां दाराश्च संपदः ॥ सोष्णीषमस्तका ये च कथां श्ट
ण्वंति पावनीं ॥ ते बलाकाः प्रजायंते पापिनो मनुजाधमाः ॥ तांबूलं भक्षयंतो ये क
थां श्टण्वंति पावनीं ॥ श्वविष्ठां खादयंत्येतान्नरके यमकिंकराः ॥ ये च तुंगासनारू
दा कथां श्टण्वंति दांभिकाः ॥ असंख्यान्नरकान्भुक्त्वा ते भवंत्येव वायसाः ॥ ये
च वीरासनारूढा ये चान्यासनसंस्थिताः ॥ श्टण्वंति सत्कथां ते वै भवंत्यर्जुनपाद
पाः ॥ असंप्रणम्य श्टण्वंतो विषवृक्षा भवंति ते ॥ शयानाः श्टण्वंतो भवंत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगरा नराः॥ यः शृणोति कथां चकुः सभानां सनमास्थितः॥ गुरुतल्पसमं पापं संप्रा
प्य नरकं व्रजेनु॥ ये निंदंति पुराणस्यानू कथां वा पापहारिणीं॥ ते वै जन्मशतं मर्त्याः शु
नकाः संभवंति च॥ कथायां वर्तमानायां ये वदंति दुरुत्तरं॥ ते गर्दभाः प्रजायंते ततः क
लासास्ततः परं॥ कदाचिदपि ये पुण्यां न शृण्वंति कथां नराः॥ ते भुक्त्वा नरकान् घो
रान् भवंति वनसूकराः॥ ये कथामनुमोदंते कीर्त्यमानां नरोत्तमाः॥ अशृण्वंतोपि
ते यांति शाश्वतं परमं पदं॥ कथायां कीर्त्यमानायां विघ्नं कुर्वंति ये शठाः॥ कोट्यब्दा
न्नरकान् भुक्त्वा भवंति ग्रामसूकराः॥ ये श्रावयंति मनुजान् पुण्यां पौराणिकीं क
१२३ थां॥ कल्पकोटिशतं साग्रं तिष्ठंति ब्रह्मणः पदे॥ आसनार्थं प्रयच्छंति पुराणज्ञस्य
ये नराः॥ कंबलाजिनवासांसि मंचं फलकमेव वा॥ स्वर्गलोकं समासाद्य भुक्त्वा भोगा १२३

न्यये स्थिता नू॥ स्थिता ब्रह्मादिलोकेषु पदं यांति निरामयं॥ पुराणस्य प्रयच्छंति ये स
त्रं च वसनं नवं॥ भोगिनो ज्ञानसंपन्नास्ते भवंति भवे भवे॥ ये महापातकैर्युक्ता उपपा
तकिनश्च ये॥ पुराणश्रवणादेव ते यांति परमं पदं॥ अत्र वक्ष्ये महापुण्यमितिहा
संद्विजोत्तमाः॥ शृण्वतां सर्वपापघ्नं विचित्रं सुमनोहरं॥ दक्षिणापथमध्ये वै ग्रा
मो बाल्कसंज्ञितः॥ आसंस्तत्र जनाः सर्वे स्वधर्मविवर्जिताः॥ ब्राह्मणाश्च दुरा
चाराः श्रुतिस्मृतिपराङ्मुखाः॥ जपस्वाध्यायरहिताः परस्त्रीविषयातुराः॥ कृ
षीवलाः शस्त्रधरा निर्वैरा जिह्मवृत्तयः॥ न जानंति परं धर्मं ज्ञानवैराग्यलक्षणं॥
स्त्रियश्च पापनिरताः स्वैरिण्यः कामलालसाः॥ कुहकाः कुटिलगाः सद्वृत्ताचारव
र्जिताः॥ तत्रैको विडुरो नाम दुरात्मा ब्राह्मणाधमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसीद्देश्यापतिर्योसौ सरोपि कुमार्गगः ॥ तत्पत्नी वंजुलाख्या महिला पतिनिशील
या ॥ वेश्याभवनमासाद्य रमते स्मरपीडितः ॥ साधितस्यां गता रात्रौ विट्युक्ता नवयौव
ना ॥ असहंती स्मरावेशं रेमे जारेण संगता ॥ लोकत्याचतुराचारा जारेण सह सं
गता ॥ दृष्ट्वा तस्याः पतिः क्रोधाद्दभिद्राव सत्वरः ॥ जारे पलायिते पत्नीं गृहीत्वा
मुदारामः ॥ स तां अमुष्टिबंधेन पुनः पुनरताडयत् ॥ सा नारी पीडिता भर्त्रा कुपि
ता प्राह निर्भया ॥ भवान्प्रतिनिशं वेश्यां रमते कामगास्तिमेम ॥ अहं रूपवती योषा
रूपयौवनशालिनी ॥ कथं सहिष्ये कामार्तानुसंगविवर्जिता ॥ इत्युक्तः स तयात
न्वीं प्रोवाच क्रोधनाधमः ॥ युक्तमेवत्तयोक्तं हि तस्माद्दस्यामि ते हितं ॥ जारेभ्यो
धनमाकृष्य तेभ्यो देहि परां रतिं ॥ तद्धनं देहि मे सर्वं पण्यस्त्रीणां ददामि तत् ॥ १२६

रवं संस्पर्यते कामो मम मापि वधूरानने ॥ तथेति भर्त्रुर्वचनं प्रतिजग्राह सा व
धूः ॥ एवं तयोस्तु दंपत्योर्दुराचाररवर्त्तयोः ॥ कालेन निधनं प्राप्तः स विप्रो दपत्नीप
तिः ॥ मृते भर्त्तरि सा नारी पुत्रैः सह निजालये ॥ उवास रुचिरं कालं किंचिदुक्तानये
ना ॥ एकदा दैवयोगेन संप्राप्ते पुण्यपर्वणि ॥ सा नारी बंधुभिः सार्द्धं गोकर्णं क्षेत्रमाय
यौ ॥ तत्र तीर्थजले स्नात्वा कस्मिंश्चिद्देवतालये ॥ सुश्राव देवज्ञमुखात्पुण्यां पौराणि
कीं कथां ॥ योषितां जारसक्तानां नरके यमकिंकराः ॥ संतप्तलोहपरिघं क्षिपंति स्म
रमंदिरे ॥ इति पौराणिकेनोक्तां सा श्रुत्वा धर्मसंहितां ॥ तत्क्षणाच्च रहस्येव भीता प्रास
णपुंगवं ॥ ब्रह्मन्पापमजानंत्या मयाचरितमुल्बणं ॥ यौवने कामचारेण कोटिस्त्वे
नमवर्जितं ॥ इदंत्वद्वचः श्रुत्वा पुराणार्थविजृंभितं ॥ भीतिर्मे महती जाता रारीरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेपते मुहुः॥धिग्जीवं दुरिंद्रियासक्तं पापास्मरविमोहितं॥अल्पस्य वस्तुनस्स्वार्थे
घोरं यास्यामि दुर्गतिं॥कथं पश्यामि मरणे यमदूतानहं भयंकरान्॥कथं पाशैर्बं
द्धोऽहं नेष्यमाणोऽतिलिलमे॥कथं सहिष्ये नरके खंडशो देहकृंतनं॥पुनः कथं पति
ष्यामि संतप्ते सारकर्दमे॥कथं च योनिलक्षेषु कृमिकीटखगादिषु॥परिभ्रमामि
दुःखौघैः पीड्यमानो निरंतरं॥कथं हि रोचते मह्यं मधुमष्टान्नभोजनं॥रात्रौ
कथं च सविष्ये निद्रां दुःखपरिप्लुतां॥हा हा हतोऽस्मि दग्धोऽस्मि विदीर्णहृदयोऽस्मि
च॥हा विधे मां महापापं दत्वा बुद्धिमपानयः॥पतनं स्तु गरौलाग्याधूतां क्रांतस्य
देहिनः॥यद्दुःखं जायते घोरं तस्मात्कोटिगुणं महत्॥अश्वमेधशतं कृत्वा गंगास्नानम
२२५ तो रातं समाः॥नस्युद्धिजायते भ्रातुर्यो मसापस्य गरीयसः॥किं करोमि क्व गच्छामि १२५

कं यास्यारणमाश्रये॥को मां त्रायते लोके पतंतं नरकार्णवे॥त्वमेव मे गुरुः श्रेष्ठं
स्त्वं माता त्वं पिता सि च॥उद्धरोद्धर मां दीनं त्वमेव शरणं गतं॥इति तं जालभिर्वदं
पतितं चरणद्वये॥उत्थाप्य कृपया धीमान् मनुर्वभाषे द्विजपुंगवः॥ब्राह्मण उवाच॥
दिष्ट्या कालेन तु ज्ञातिरश्रुवेमं महतीं कथां॥मा भैषीस्तव वस्यागतिश्चैव तु स्वाव
हं॥सत्कथाश्रवणादेव जातोऽनेमतिरीदृशी॥इंद्रियार्थेषु वैराग्यं पश्चात्तापो महा
नभत्॥पश्चात्तापो हि सर्वेषां मघानां निष्कृतिः परः॥तेनैव कुरुते सद्यः प्रायश्चि
त्तं सुधीर्नरः॥प्रायश्चित्तानि सर्वाणि कृत्वा च विधिवत्तु नः॥अपश्चात्तापिनो म
र्त्यो न यांति गतिमुत्तमां॥सत्कथाश्रवणान्नित्यं सज्जनानां निषेवणात्॥पुण्यसे
त्रानि वासाच्च चित्तशुद्धिः प्रजायते॥यथा सत्कथया नित्यं चित्तं याति विपक्वतां॥
तथान्यैः सद्व्रतैर्जनो न भवेन्मतिरुत्तमा॥यथा मुहुः शोध्यमाने दर्पणे निर्मलं भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौ॰

वेतु ॥ तथा सत्कथया चेतो विशुद्धिं परमां व्रजेत् ॥ विशुद्धे चेतसि स्थाणोर्ध्यानं
सिद्ध्यत्युमापतेः ॥ ध्यानेन सर्वसमलं मनोवाक्कायसंभवं ॥ सद्यो विधूय प्रकृतिनो
यांति शंभोः परं पदं ॥ अतः समस्तपुण्यानां सत्कथा साधनं परं ॥ कथया सि
ध्यति ध्यानं ध्यानात्कैवल्यमुत्तमं ॥ असिद्धः परमध्यानः कथामेव शृणोति यः ॥
सोन्यजन्मनि संप्राप्य ध्यानं याति परां गतिं ॥ नामोच्चारणमात्रेण जितास्मत्क
मजामिलः ॥ पश्चात्तापसमायुक्तो ध्यानेनाप परां गतिं ॥ सर्वेषां श्रेयसां बीजं स
त्कथाश्रवणं स्मृतं ॥ यस्तद्विहीनो नृपशुः कथं मुच्येत बंधनात् ॥ अतस्त्वमपि
सर्वेभ्यो विषयेभ्यो निवृत्तधीः ॥ भक्त्या परां समास्थाय सत्कथां शृणु सर्वदा
श्टण्वंत्याः सत्कथां नित्यं चेतस्ते शुद्धिमेष्यति ॥ तेन ध्यायसि विश्वेशं ततो मुक्ति
१२६ मवाप्स्यसि ॥ ध्यायतोः शिवपादाब्जं मुक्तिरेकेन जन्मना ॥ भविष्यति न संदेहः १२६

सत्यं सत्यं वदाम्यहं ॥ इत्युक्तास्तेन विप्रेण सा नारी बाष्पलोचना ॥ पतिता पादयो
स्तस्य कृतार्थास्मीत्यभाषत ॥ तस्मिन्नेव महाक्षेत्रे तस्माद्देवाद्द्विजोत्तमात् ॥ शुश्राव
सत्कथां साध्वी कैवल्यफलदायिनीं ॥ स उवाच द्विजस्तस्यै कथां वैराग्यबृंहितां ॥
यां श्रुत्वा मनुजः सद्यस्त्यजेद्विषयवासनां ॥ तस्याश्चित्तं यथा शुद्धं वैराग्यरसधा
रया ॥ तथोवाच द्विजः शैवीं कथां भक्तिसमन्वितां ॥ यथा यथा मनुस्तस्याः प्रसाद
मधिगच्छति ॥ तथा तथा शनैः शंभोर्ध्यानयोग्यमुपाविशत् ॥ शनैः शनैर्ध्वस्तर ग॰
जस्तमोमलं विविक्तसर्वेंद्रियभोगविग्रहं ॥ विशुद्धसत्वे हृदये द्विजस्त्रियो विवेश
विश्वेश्वररूपचिंतनं ॥ इत्थं सद्गुरुमाश्रित्य सा नारी प्राप्तसन्मतिः ॥ दध्यौ सुकृ
ऊः शंभोश्चिदानंदमयं वपुः ॥ नित्यं तीर्थजले स्नाता जटावल्कलधारिणी ॥ भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मोद्धूलितसर्वांगी रुद्राक्षकृतभूषणा ॥ शिवनामजपासक्ता योग्यतामिव
भोजना ॥ बहूपवासनाथ्यग्रा सत्कथाश्रवणोत्सुका ॥ गुरुशुश्रूषणरताप्र
स्कापत्यसुहृज्जना ॥ गुरूपदिष्टयोगेन शिवमेव मनोषयत् ॥ विश्वेशाधिष्ठ
यिलयस्थितिजन्महेतो विश्वैकबंधशिवरा श्वलविश्वमंत्रे ॥ विश्वस्तकाल
भयवीतगुणावभासश्रीमन्महेशान मदेहि कृपाकटाक्षं ॥ शंभोशशांक
नशेखरशांतमूर्ते ॥ गंगाधरामरवरार्चितपादपद्म ॥ नागेंद्रभूषणनगेंद्रनि
केतनेशान मां निहन्मयि धेहि कृपाकटाक्षं ॥ श्रीविश्वनाथकरुणाक १२८
१२८ रभूषणे भूतेशामगोभृवनत्रयगीतकीर्ते ॥ श्रीनीलकंठ मदनांतकविश्वना

थै गौरीपते मयि निधेहि कृपाकटाक्षं ॥ इत्थं प्रतिदिनं भक्त्या प्रार्थयंती महेश्व
रं ॥ अष्टण्वनीसत्कथां पुण्यां कुर्वबंधसमाधिना ॥ अथ कालेन सा नारी समु
त्सृष्टकलेवरं ॥ मेहेशानुचरैर्नीता जगाम शिवमंदिरं ॥ तत्र देवं महादेवं स
र्यमानं सनातनैः ॥ गणेशनंदिभृंगीशवीरचंडेश्वरादिभिः ॥ उपास्यमानं गौ
रीशं कोटिसूर्यसमप्रभं ॥ त्रिलोचनं पंचमुखं नीलग्रीवं सदाशिवं ॥ वामांके
विभ्रतं गौरीं विद्युत्पुंजसमप्रभां ॥ दृष्ट्वा ससंभ्रमं नारी साप्रणम्य पुनः पुनः ॥
आनंदाश्रुजलोत्सिक्ता रोमहर्षसमाकुला ॥ समानिनायी करुणया पार्वसाशं
करेण च ॥ तस्मिन् लोके परानंदघनज्योतिषि शाश्वते ॥ लब्ध्वा निवासमचे
लं भजे सुखमनाहतं ॥ सा कदाचिदुमां देवीमुपसृत्य प्रणम्य च ॥ पप्रच्छ तन्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भर्त्ता कां गतिं गतवानिति॥ तामुवाच महादेवी स ते भर्त्ता उरगायः॥ श्रुत्वा नर
कदुःखानि विंध्ये जातः पिशाचकः॥ श्रुत्वेति पप्रच्छ सा नारी देवीं त्रिभुवनेश्वरीं॥
केनोपायेन मे भर्त्ता सद्गतिं प्राप्नुयादिति॥ देव्युवाच॥ सोस्मात्कथां महा
पुण्यां कदाचिच्छृणुयाद्यदि॥ निस्तीर्य दुर्गतिं सर्वां निमंलोकं प्रयास्यति॥ इ
ति गौर्या वचः श्रुत्वा सा नारी विहितांजलिः॥ प्रार्थयामास तां देवीं भर्त्तुः पा
पविशोधने॥ तयोस्तु प्रार्थ्यमाना सा पार्वती करुणाकुला॥ तुंबुरुं नाम गंध
र्वं समाहूयेदमब्रवीत्॥ तुंबुरो गच्छ भद्रं ते विंध्यशैलं सहानया॥ आस्ते पिशा
चकस्तत्र योस्याः पतिरसन्मतिः॥ तस्याग्रे परमां पुण्यां कथामस्य कुरुष्व तां॥ १२८

आख्याय दुर्गतेर्मुक्तं तमानय शिवांतिकं॥ इति देव्या समादिष्टस्तुंबुरुर्नौ
रदप्रियः॥ तया सह विमानेन विंध्याद्रिं सहसाययौ॥ तत्रापश्यन्महाकायं य
रक्तनेत्रं महाहनुं॥ ग्रहसन्तं रुदंतं च वल्गंतं च पिशाचकं॥ वल्गत्कूहीलां तं पा
रौर्विध्यास्तु पदे स्थितं॥ तुंबुरुर्वल्लकीहस्तो जगौ गौरीपतेः कथां॥ स पिशाचो
महापुण्यां कथां श्रुत्वा पुरारिद्विषः॥ विधूय कल्मषं सर्वं सद्यस्तापस सद्गतिं॥
स पैशाचं वपुस्त्यक्त्वा स्वरूपं दिव्यमास्थितः॥ जगौ स्वयमुपि श्रीमच्चरितं पार्वती
पतेः॥ विमानमारुह्य स दिव्यरूपधृक् स तुंबुरुः पार्श्वगतः स्वकांतया॥ गाय
न्महेशस्य गुणान्मनोरमान्॥ जगाम कैवल्यपदं सनातनं॥ सूत उवाच॥
इत्येतत्कथितं पुण्यमाख्यानं दुरितापहं॥ महेश्वरप्रीतिकरं निर्मलं मानसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रो०

धनं ॥ यद्दर्शनीये ये मर्त्याः श्रुत्वा तां समाहिताः ॥ शंभोर्गुणानुकथनं विचित्रं
पापनाशनं ॥ परमानंदजनकं भवरोगमहौषधं ॥ शंभुलोके हि विविधानुभोगा
न्भुक्त्वा यांति परां गतिं ॥ धन्यं वत महाभागाः कृतार्था मुनिसत्तमाः ॥ ये संव
तं सदा शंभोः कथामृतरसं नवं ॥ ये जन्मभाजः खलु जीवलोके येषां मनो ध्या
यति विश्वनाथं ॥ वाणी गुणान्स्तौति कथां शृणोति श्रोत्रद्वयं ते भवमुत्तरंति ॥
विविधगुणविभेदैर्नित्यमस्पृष्टरूपं जगति च बहिरंतर्भासमानं महिम्ना ॥
स्वमहसि विहरंतं वाङ्मनोऽचिंत्य दूरं परमशिवमनंतानंदसांद्रं प्रपद्ये ॥
॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे पुराणश्रवणफलानुवर्णनं नाम द्वाविं
१२९ ॥ शोध्यायः ॥ छ ॥ छ ॥ छ ॥ छ ॥ इदं पुस्तकं गणेशरामेण लिखितं स्वार्थं परार्थं च ॥२ ॥१२९॥

॥ इदं पुस्तकं ब्रह्मोत्तरखंडस्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.08.19 11:16
,TRANSFERRED=2019/08/13 at 11:51:06
,PAGES=130
,TYPE=STD
,NAME=S0001448
,Book Name=M-810-SHRI SAKANDPURANE BRAHAMOTAR KHAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection